CC-0. Digitized by eGangotri and MIDF- Delhi



देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्

महाकाव्यकारः
आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्



आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतिः : **देवाधिदेवश्रीनिलकण्ठमहाकाव्यम्**

लेखकः : आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलः

प्रकाशकः : सनातन प्रेस, बानेश्वर, काष्ठमण्डपः

प्रकाशनसहयोगिनः : प्रकाशचन्द्रढुङ्गेलः, आदित्यचन्द्रढुङ्गेलः
रीतिकेश्वरी, नीतिकेश्वरी

सर्वाधिकारः : प्रकाशके

संस्करणम् : प्रथमम्–२०७८ कोजाग्रतपूर्णिमा

प्रकाशनसंख्या : १०००।

आवरणम्/पृष्ठसम्पादनम् : प्रमिलापोखेलः

मुद्रकः : सगुन प्रिन्टर्स प्रा.लि., ९८५११५६३४४

वितरकः : दुर्गा पुस्तक भण्डार, प्रदर्शनीमार्गः, काष्ठमण्डपः

मूल्यम् : व्यक्तिगतम् रु. ५००।–
संस्थागतम् रु. ८००।–

Devadhidevashreeneelakanthamahakavyam

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समर्पणम्

सभक्ति सश्रद्धं सादरं समर्पणम्
सर्वविघ्नहर्त्रे श्रीमहागणाधिपतये नमो नमः ॥

१.श्रीमहावंशपावनीपतिव्रताशिरोमणिपार्वतीप्राणेश्वरदेवाधिदेवजगज्जिघत्सु प्रचण्डविषहरणरक्षितसर्वलोकानां (न विश्वमूर्तेरवधार्यते वपुः कालिदासः, वन्दे गुरूणां गुरुम्) सर्वविद्याज्ञानविज्ञानपरमतीर्थानां भगवतां परमेश्वराणां परमप्रीत्यर्थम्, २.ऋग्वेदप्रथममण्डलस्थात् १६५सूक्तादारभ्य १९१सूक्तान्तानां सप्तविंशतिसूक्तानां मन्त्रद्रष्टृमहानुभावानां तपोबलद्वारा समुद्रशोषकेल्वलदैत्यगर्वहारकाणां सगर्वविन्ध्याचलगुरुवराणां मन्त्रद्रष्ट्र्या पराम्बया ललितोपासकया पातिव्रत्यधर्ममुख्यया लोपामुद्राप्राणेश्वर्या युतानां (क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे) प्रचण्डतापसानामगस्त्यगोत्रप्रमुखानां सुप्रीत्यर्थम्,

३. पुत्रचतुष्टयपुत्रीत्रयसमुत्पादिकया तद्वर्धिकया तद्रक्षिकया विदुष्या पतिव्रतया नर्मदेश्वरीनामिकया मात्रा सहितानां पितृचरणानाञ्ज्यौतिषशास्त्रे प्रकाण्डप्रवीणानां पूर्ववर्माराष्ट्र(सम्प्रति म्यानमारराष्ट्र)वासिनां ग्रामोद्यानक्षेत्रपशु-पालनादिकर्मभिर्नेपालदेशे आवासकार्ये कृतप्रयत्नानां दूरदर्शिनां पितृपादानां पण्डिताग्निप्रसादढुङ्गेलमहोदयानां प्रमोदार्थम्,

४. मह्यं मन्त्रराजगायत्रीमन्त्रप्रददीक्षाप्रदशुक्लयजुर्वेदनव्यव्याकरणनव्यन्याय-ज्यौतिषसांख्ययोगपुराणेतिहाससाहित्यब्रह्मविद्योपनिषत्कर्मकाण्डज्ञानप्रदातृ(गुरुरादि-रनादिश्च गुरुः परमदैवतम् । गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ येषां स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् । य एव सर्वसम्प्राप्तिर्गुरुभ्यो मे नमो नमः ॥ स्वेष्टदेवे यथा भक्तिस्तथैव परमे गुरौ ।)गुरुवर्याणां परमसन्तोषार्थं कमलकोमलकर-कमलेषु सभक्ति सश्रद्धं सादरं महाकाव्यमिदं समर्प्यतेतरामोम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संख्या :

योगी आदित्यनाथः

लोक भवन
लखनऊ -226001

मुख्य मंत्री
उत्तर प्रदेशः

दिनांकः 7-07-2020

अस्माकं गोरक्षनाथसंस्कृतविद्यापीठस्य पूर्वप्राचार्येण श्रीपूर्णचन्द्रोपाध्याय-महोदयेन लिखितं 'देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्' इति नामकं संस्कृत-महाकाव्यं प्रकाश्यमानमस्तीति वार्तां श्रुत्वा नितरां प्रसन्नोऽस्मि । संस्कृतभाषा खलु विश्वस्य समस्तभाषासु नितान्तं परिष्कृता शुद्धा वर्तते ।

इदानीं कराले कलिकाले द्वित्रा एव विद्वांस एतादृशे महत्त्वपूर्णे कार्ये प्रवर्तन्ते । तत्राऽपि देवाधिदेवस्य योगिराजस्य भगवतः शङ्करस्य गरलपानं कृत्वा विश्वसंरक्षणकार्यमत्यन्तं महत्त्वपूर्णं वर्तते ।

श्रीगोरक्षनाथस्य कृपया ऐतिहासिकमिदं कार्यं विद्वज्जगति समादरं लप्स्यत इति मन्ये । अस्य महाकाव्यस्य प्रकाशने मदीया हार्दिक्यः शुभकामनाः सन्तीति ।

दूरभाष : 0522-2236181/2239296 फैक्स -0522-2239234

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्र.जि.अ.द.नं:१९३ जि.२०५१/५२ फोन नं ०५६-५०००३५

ॐ

श्री परमात्मने नमः

श्रीहरिहरसंन्यासआश्रमः

देवघाटधाम (आदि प्रयागः)
तनहुँ, नेपालः

शुभसम्मतिः

अखिलप्रपञ्चाऽध्यासाऽधिष्ठानं निर्विशेषं ब्रह्म आमन्दबुद्धिवेद्यं न भवतीति सविशेषं ब्रह्म निरूप्यं भवति । स्वरूपतो निर्विशेषोऽपि नानाविधो पाध्यवच्छिन्नः परमात्मा अनेकविधगुणगणवैशिष्ट्यं लभमानोनैकां संज्ञां लीलाञ्च विधत्ते । निखिलब्रह्माण्डनायको महेशः कदाचिज्ज्योतिर्लिङ्गस्वरूपेण भगवन्तौ ब्रह्मनारायणौ परीक्षते । कदाचित् कामक्रोधादिक्रूरदैतेयत्रासत्रस्तत्रिपुरं दग्ध्वा स्वयन्तत्र राजते । कदाचिच्च क्षीरोदमथनोद्भूतकालकूटविषज्वलनज्वलिताखिलदेवासुरमनुजादिपरिबृंहित-ब्रह्माण्डं गरलपानेन गोपायन् कण्ठेकालो भवति । परानुग्रहार्थं स्वयं परितप्यन्नप्यतप्यन् स एव महेशो 'नीलकण्ठः' इति नाम भजते । तस्यैव भगवतो नीलकण्ठस्य महिमानं प्रकटयता अद्वितीय वैदुष्येण वैदिकवाङ्मयाकाशे पूर्णचन्द्र इव भासमानेनऽऽचार्यवरेण श्रीपूर्णचन्द्रमहोदयेन सप्तविंशतिसर्गात्मकं 'देवाधिदेव-श्रीनीलकण्ठमहाकाव्यम्' विरचितं सत् प्रकाशनपथमधिरोहतीत्याकर्ण्यातीव ह्लादते मे चेतः ।

अस्मदाचार्यचरणानां ब्रह्मलीनस्वामिपरमानन्दसरस्वतीमहाराजानां सुशीत-लच्छायाधिगततत्त्वदृशा विचारिते सांसारिका विषया एव कालकूटाख्यविषाणि, विषवत्तापकत्वात् संसारविषाग्निदग्धानामाश्रयश्चाशरणशरण्यो महेश्वरो नीलकण्ठः । यैस्तावच्छङ्करो भवाग्निदन्दह्य मानपरित्राणः मर्च्यते, तेषामेव जीवनम्, पठिता विद्या, परमार्थसाधनानि च कर्माणि सफलायन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलतरङ्गभङ्गवत् क्षणनाश्यानि वस्तूनि, तेषु मिथ्यावस्तुषु मायामोहादिवशाज्जाता नित्यत्वादिबुद्धिर्जीवात्मानं दृढं बन्धयति, तादृशबुद्धि-प्रशमनेनामृतत्वप्रदायको भगवान् शिव एव । अमृतत्वं भगवत्स्वरूपं भगवद्धर्म, यद्यस्य धनं तत्तेनैव प्रदीयते नान्येनेति भवबन्धमोचकं भगवन्तं परिस्तुवता तस्यैवाभिधानेनेदं महाकाव्यं विद्वन्मण्डलचक्रवर्तिना पूर्णचन्द्रेण व्यरचि । सरलसरसप्राञ्जलभाषया सुबोधमञ्जुलशैल्या महाकाव्यगुणोपेतां शिवचरितमालां ग्रथित्वा संस्कृतवाङ्मयमूर्तौ समर्प्य पण्डितप्रवरेण विदुषा महानुपकारो विहितः । विशेषतोऽत्र महाकाव्ये भगवतो महेश्वरस्य वास्तवतत्त्वावगत्यर्थं पृथिव्यप्तेजोवाय्वाकाशसूर्यशशियजमानाभिधाष्टमूर्ति-स्वरूपेण वर्णनमस्ति । 'दुःखालयमशाश्वतम्' इति भगवद्वचनेन दुःखमयेऽस्मिन्भवसागरे नानारूपेण वारं वारमवगाहमानानामुद्धरणाय शिवोपासना श्रेयसी, तया च विना कुपितानि सन्ति इमानि अष्टतत्त्वानि मनुष्यान्/प्राणिनः बाधन्ते, अतः शिव उपास्यः इति महाकाव्यस्याशयः । कविना अनेककष्टकरजीवनयात्रामतीत्याऽनुभूतविविध-प्राकृतिकविपत्तिभूस्खलनभूकम्पजलाप्लावनवनदाहचक्रवाताद्युग्रविषता-पतप्तानां द्वितीयविश्वजन्यनिर्ममप्रहारविदीर्णानां त्यक्तसर्वस्वबन्धुबान्धवानां पलायितुकामानां वने दुर्गीतियुतमरणानामतिकारुण्यचित्रमत्र चित्रितम् । जागतिकानीमानि दुःखानि परिज्ञायानेकानर्थव्रातविषयान् बुद्ध्वा तेषु जायमानकामनां परिहृत्याऽ कारणकरुणावरुणालयो नित्यसुखस्वरूपो महेशः समाराध्य इति निष्कर्षः कर्षितः ।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन ! विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो !
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥

इति जगज्जिघत्सुविषं पिबता महेशेन जगद्विषं किन्न पीयेत ? एवं शिवोपासनायाः कर्तव्यताऽत्र साधिता । यद्यप्युपासना एव न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोक्षदा तथापि मोक्षार्थं चित्तशुद्धये उपासना विधेया इत्याशयः । इदञ्च ग्रन्थरत्नं संस्कृतसाहित्येतिहासे वंशमणिसोमनाथकाशिनाथकृष्णप्रसाद-घिमिरेप्रभृतिनैपालककविलिखितग्रन्थेष्वतिशयं वैशिष्ट्यं धृत्वा भारतीया-दिसकलसंस्कृतकाव्यक्षेत्रे विशिष्टं स्थानं लभत इत्यहं विश्वसिमि ।

अन्ते च, मातृभूमिनेपालभूमौ गुरुकुलमाध्यमेन संस्कृतावाङ्मयोत्थापनाय त्यक्तजीवनानां तपःपूतानाम् 'परमानन्दसरस्वती'स्वामिचरणानाम् आयामे कृतभूरिसहाय्याः, अन्ताराष्ट्रेष्वपि नैजविशिष्टप्रातिभद्वारा लब्धसपर्याः, 'विद्वच्चक्रचूडामणिः' 'व्याख्यानवाचस्पतिः' इत्याद्यन्वर्थसंज्ञामादधानाः, अनेकविषयेषु समुत्तीर्णाचार्यपरीक्षाः, विद्वच्चयपूज्याः, लौकिकसम्पत्तिसंवलिता अपि विगतरागक्रोधादिविकारगणा एते आचार्यवर्याः, यैरिदं महाकाव्यं विरचितम् । तेषामाचार्यवराणामिदं काव्यं समग्रसंस्कृतवाङ्मये महते उपकाराय भवति । शान्तसरलस्वभावप्रतिमूर्तेः विद्वद्वरेण्यस्यास्याः कृतेः पाठकाः सर्वे विद्वांसः, छात्राश्च लाभान्विता भवन्त्येव । एवंविधोपकारकसुधीगणाग्रणीर्दीर्घायुष्येण सुस्वास्थ्यं लभेत इति भगवन्तौ हरिहरौ सम्प्रार्थ्य काव्यरत्नस्यास्य प्रकाशनसाफल्याय शुभसम्मतिं व्यनज्मि ।

॥ हरि ॐ तत्सत् ॥

स्वामी ज्ञानानन्दसरस्वती
पीठाधीशः, अध्यक्षश्च
श्रीहरिहरसंन्यासआश्रमः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभसम्मतिः

– आचार्यहरिशरणउपाध्यायः
गैंडाकोटनवलपुरम्

श्रीनीलकण्ठस्य कृपाविशेषा
श्रीपूर्णचन्द्रस्य कृतिर्विशिष्टा।
श्रीपूर्णचन्द्रस्य कलेव कान्ता
आभासयन्तीव भुवो दिगन्तम्॥

प्राचार्यचरोध्यक्षचरश्च
व्याकरणदर्शनविभागः
निम्बार्कमहाविद्यालय
मथुरा

शुभसम्मतिः

–प्रा. मुकुन्दशरणोपाध्यायः

पूर्णचन्द्र उपाध्यायो बहुविद्याविशारदः।
गुरुर्बहूनां छात्राणां बहुदेशकृताश्रयः॥
व्याख्याता बहुशास्त्राणां कविभिरपि वन्दितः।
महाकाव्यानि रचयन् जीवेद् वर्षशताधिकम्॥

अध्यक्षः
श्रीराधाकृष्णदेवस्थान–व्यवस्था–समितिः
टंगालकाष्ठमण्डपः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभसम्मतिः

परममाहेश्वरेण आचार्यश्रीपूर्णचन्द्रउपाध्यायेन विरचितं "देवाधिदेव-श्रीनीलकण्ठमहाकाव्यम्" इत्याख्यं महाकाव्यमद्यतनसमये विश्वस्मिन् विश्वे दरीदृश्यमाणानामनुदिनं सर्वैरनुभूयमानानां विविध-विध-विषम-विषमयाणां मानवीय-भावानां सरसं मनोहरं च चित्रणं करोति । काव्यमिदं पूर्ववर्ति-महाकाव्येभ्यो विलक्षणं विद्यते । अतोऽत्र बहुआयामिन्या राष्ट्रव्यापिसंस्कृतेः प्रतिबिम्बः प्रत्यक्षं परिलक्ष्यते । गुणालङ्कार-रीति-वृत्ति-प्रवृत्तयो यथास्थानमिदं विभूषयन्ति । रस-भावादयः सहृदय हृदयमाह्लादयन्ति ।

एवं निज-काव्य-सौष्टवेन आगामिनि समये काव्यविधायिनां पथप्रदर्शकं भूयादिति शम् ।

स्थानेश्वरकाफ्लेः
निवृत्तप्राचार्यः
श्री सनातन-धर्म-संस्कृतमहाविद्यालयः
मुक्तीश्वरनाथः, गोरक्षपुरम् ।
वर्तमाननिवासः भैरहवा, रुपन्देही, लुम्बिनी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाधिदेवश्रीनीलकण्ठमहाकाव्याकूतम्

पावका नः सरस्वती

'देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्' द्योतयति कामप्यपूर्वताम् । शिवशक्तिनिरूपणपरवाग्बुद्धिव्यापारकौशलन्तदुद्भावनायालमिति नापेक्षा हेत्वन्तरस्य । अनपेक्षत्वेऽपि उपजीव्यत्वालम्बनापेक्षा भवत्येव तेन प्रामाणिकत्वसंशयो निवर्तितो भवति, दृश्यते हि महाकविकालिदासादिप्रणीतरघुवंशादिमहाकाव्योपजीव्यं रामायणमहाभारतादि विद्यानिरूपकं शास्त्रम् । तद्वत् किमस्योपजीव्यमिति सुस्पष्टमभिधातव्यम् ।

विद्याप्रत्यायिका त्वं मे वेद्योहं प्रत्ययात्तव ।
विद्यावेद्यात्मनोरेव विश्लेषः कथमावयोः ॥ (शि.पु.७।१।२७।१७)

इत्युमां प्रति शिवोक्तिः शिवाभिधेयः प्रत्यग्रूप आत्मा तद्बोधिकोमाभिधा वृत्तिरूपा ब्रह्मविद्येत्यैकान्तिकन्तथ्यमुद्घाटयति । तयोर्विभूतीः संश्रयति प्रकृतं महाकाव्यमिति केनचित्तन्निरूपकेण शास्त्रेण भाव्यम् । शास्त्रमनन्तम् तदन्तःपाति पुराणम् तदप्यनेकम् - तत्रान्वेष्टव्यं भवति देवाधिदेवस्य नीलकण्ठत्वम् पुराणेषु विप्रसृतन्तदेवास्योपजीव्यं भवति ।

यत्रामृतमथनचर्चा अनेकरत्नानां विषस्य च संभूतिरपरिहार्या तत्र - ततो विनिःसृतस्य गरलस्य लोकत्रासकता, तन्निरसनसामर्थ्यं नान्यत्र शिवमृत इति तस्य स्तवनम्- देवादिभिः, ततः प्रसन्नो देवाधिदेवः शिवो लोकस्वस्तये गरलं पीतवान्, तत्पार्श्वपतितविषपानेन सर्पवृश्चिकादयो विषालवोऽभवन्- इति प्रासङ्गिकम् ।

अभ्यर्हितं त्वत्र शिवस्य नीलकण्ठत्वम् - तच्च संभूतहालहलगरलपानाव्यवहितोत्तरकालाश्रयम् । ग्रन्थप्रणेतृभिः- 'तदाभवन्नीलगलस्त्रिलोचनः' (१६।४९) 'स नीलकण्ठो ह्यभवद् विभुः क्षणात्' 'गले भवच्छाश्वतिकं विभूषणम्' (१६।५-४) इत्यनेकधा निरूपितम् ।

भवतु नाम किन्तेन ? इति नियताकाङ्क्षाशामकं 'गले पुनः शुक्लकृते च निश्चितमैतिह्यनाशाद्धि भवेत्सुदुःखम्' । 'तदस्य नाम्नः सुमहत्त्वमस्ति यत्' (१६।१३-१४) 'न नीलकण्ठत्वविनाशने युतः' (१९।८) इत्याद्यन्वय-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यतिरेकविधया सूपवर्णितं नीलकण्ठवैभवरूपं महित्वम् ।

भेदेनाभिहितः शिव अधिदेव इत्यधिगतिः सा न ज्ञानफलपर्यवसायिनी- अध्यात्मविदस्तदधिकारित्वमिति 'विज्ञातारमरे केन विजानीयात्' (बृ.उ.४।५।१६) 'विज्ञानघन एव' (बृ.उ.२।४।१२) 'न ह्यनात्मवित् कश्चित् क्रियाफलमुपाश्नुते' (मनु ६।८२) 'आत्मैव देवताः सर्वाः' (मनु १२।११९) इत्यादि श्रुतिस्मृतिनिर्देशात् । अतः प्रकृतं महाकाव्यं कथयन्तदनुरोधीतीत्थम्- यथा वर्तमानमेवाव्यक्तं नवनीतं निस्सरति मथ्यमानस्य दध्नस्तथैव निःसृतिर्हालाहलस्येति यथाश्रुतिः । तथ्यन्तु वृक्षाग्रेऽवाक् शीर्ष्णो लम्बमानस्य तपस्तप्यमानस्यानन्तस्य वदनात्कालकूटं भूमौ पतितम् - तेन तता भूः, स्थावरं जङ्गमञ्चाक्रान्तन्तेन, महीयते च भुजङ्गवृश्चिकादौ, अन्यत्र तु जङ्गमे क्रोधात्मिका वृत्तिरिति- 'सर्वत्रानुगतं तीक्ष्णं भुजङ्गेषु महीयते । जङ्गमं स्थावरञ्चैव सर्वत्रानुगतं विषम्' (हरिवंशः ३।२८।३५) इति व्यासोक्तिः समुद्बोधयति । अतोऽनर्थबीजभूतः क्रोधादिस्तच्छामकं नीलकण्ठस्तवनम् -यत्कृतं देवादिभिः, तेनात्मनः स्वास्थ्यम्-उत्तमा गतिश्चेत्यध्यात्मपरकता काव्यस्येति त्रय्यन्तचिन्तकानामतिरोहितम्। अव्यक्तन्तदेव विषमुद्भूतममृतमथनेन व्यक्तम् । युक्तिरियं पर्याप्ता-अन्वर्थत्वेऽपीति न तदर्थं पृथक् प्रयासः ।

सार्थवादो विधिर्गूढात्मबोध आर्थिक इति च द्वयी मुमुक्षुप्रवृत्त्यङ्गभूता । एतद् व्याजेन शिवतत्त्वप्रतिपादनमपवर्गप्रयोजकमित्यपि ध्वनितं शिववैशिष्ट्यनिरूपणात्मकेन द्वादशाद्व्यष्टादशान्तसर्गसप्तकेन । पूर्वोत्तराङ्गतया तत्र तत्र विषयान्तराणां निविष्टिः काव्यनिष्पत्तिमूला- शोभाधायिनी च । तदनुरुध्य मङ्गलान्तर्गतं- जन्मभूमिवर्णनं स्वगोत्रप्रवर्तकागस्त्यऋषिवैभवाख्यानञ्चेति । अन्ते राजवंशनिर्देशः -कतिपयतीर्थानां नेपालवर्तिनां महिमाख्यानम् - काव्यघटकत्वेन निविष्टम् ।

विविधच्छन्दःसु पद्यसंख्येषन्यूना सहस्रद्वितयी- तया काव्यसंघटनमस्ति, प्रतिसर्गान्तं पुष्पिकावाक्यं पद्यनिबद्धन्तदपि स्वस्य सर्गस्य चेत्यभिधानद्वितयघटितमित्यनुहरति नैषधीयं महाकाव्यं नलचम्पूकाव्यं वा ।

इत्थमनेकविषयसंश्लिष्टस्य श्रीनीलकण्ठमहाकाव्यस्य प्रणयनं, विद्यापरिशीलनविशदमतीनां प्रथितयशसां विदुषाम् आचार्यपूर्णचन्द्रोपाध्याय- ढुङ्गेलानां कृते नो चित्रम् । ते हि व्याकरणन्यायादिशास्त्रेषु कृतपरिश्रमाः । दाङ्गस्थस्य जनतामहाविद्यालयस्य गोरखपुरस्थस्य गोरक्षनाथसंस्कृत-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाविद्यालयस्य च प्राचार्याः - नेपालसंस्कृतविश्वविद्यालयस्योपकुलपतयः । तत्तत्काले तत्तत्पदभाजः सञ्जाताः ।
एते विद्वांसः स्वचरमे वयसि नीलकण्ठत्वरूपात्मचिन्तनेन स्वजीवनं धन्यमात्मनः कृतकृत्यताञ्च कृतवन्तः । स्वाभाविकमेतद् विद्यानुशीलनजविशदधियाम् । विद्यावैभवावनतानां तेषां मम मैत्री प्राक् पञ्चाशद्वर्षेभ्य इति सुपरिचितास्ते । तेषां 'देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्' इति कृतिर्विद्वज्जन मोदावहा-अनुसन्धित्सुस्पृहणीया च भवत्विति- प्रत्यग्रूपमुमाधवमन्तर्यामिणं पशुपतिमभ्यर्थयते ।

दिनाङ्कः
आश्विनशुक्ला सप्तमी-२०७८ प्रा.डा. दीर्घराजधिमिरेः
९-१-२०२२ ई.
चावहिल, काष्ठमण्डपः

सम्मतिः

मृत्युञ्जयमहादेव त्राहि नः शरणागतान् ।
जन्ममृत्युजरादुःखैः पीडितान् कर्मबन्धनैः ॥

विशालभारते नेपालदेशे च स्वकीयेन वैदुष्येण सुपरिचिताः प्रख्याता महाकवय आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलमहोदयाः । ते देवाधिदेवश्रीनीकलण्ठमहाकाव्यं सप्तविंशतिसर्गात्मकं रचितवन्तः । अस्य महाकाव्यस्य अनेके विषयाः केवलं विद्वद्भिरेवाधिगम्याः । अतो महाकाव्यञ्चेदं तथा विदुषां पुरतो गच्छेदित्याशासे । सर्वं ग्रन्थगर्भस्थमेवातो विज्ञेषु किमधिकम् । भगवान् श्रीनीलकण्ठो ग्रन्थदर्शकानां सर्वेषां संरक्षणं कुर्यादिति प्रार्थयन् विरमेऽहम् ।

प्राध्यापकः
शिवगोपालरिसालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमामि काव्यं कविमुत्तमञ्च

आचार्य जगन्नाथशर्म्मकण्डेलः (स्वामी जगन्नाथाचार्यः)
पीठाधीशोऽध्यक्षः प्रधानसंरक्षकश्च
श्रीलक्ष्मीवैकुण्ठनाथमन्दिरम् तदन्तर्गतं सञ्चालितं वैकुण्ठनाथ-
परमवैदिकविद्याप्रतिष्ठानम् (आवासीयसंस्कृतगुरुकुलम्)
भरतपुरमहानगरपालिका-४, चितवन, वाग्मतीप्रदेश, नेपालः।
पूर्वप्राध्यापकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी,
उत्तरप्रदेशः भारतम्।

श्रीनीलकण्ठजगदीश्वरदिव्यलीला-
संवादवैभवविभासितभव्यवाचः।
मोचाफलीयरससारमुचोऽत्र शस्ता-
स्तास्ता जयन्तु जयिनः सुकवेः सुकाव्ये ॥१॥

लीला अनेका भगवान् व्यधत्त
श्रीनीलकण्ठः प्रथमो दयालुः।
जीवान्ननादेः समयान्निमग्नान्
संसारसिन्धौ दययोद्दिधीर्षुः ॥२॥

सङ्गृह्य ता विमलवेदपुराणशास्त्रात्
सम्भूष्य भूषणगुणैरपि शम्भुभक्त्या।
काव्यं व्यधाद् य इह धर्म्यमुदारकीर्ति-
स्तस्मै नमः सुकवये रवये नवाय ॥३॥

कवेर्हि देहो नवतेः परस्तात्
काव्यं ततो भव्यतमं कुतोऽभूत्।
आद्योऽत्र हेतुः शिवशक्तिरिच्छा
अन्त्यः कवौ श्रीहरभक्तिभूमा ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाः प्राच्यो विद्याः सकलविषयाः सर्वसुलभाः
सतीरत्नं पत्नीद्वयममलसत्पुत्रधिषणम् ।
गणः सच्छात्राणां जगति विततो यस्य विनतः
ततः पूर्णाच्चन्द्रात् क इह कलिकालेऽधिकतमः ॥५॥

अनाघ्रातावद्यं बहुगुणगणं काव्यमतुलं
पदानां सौहार्दादनिमिषनिषेव्यं मधुमयम् ।
प्रसादस्योत्कर्षात् परिचितमिवाथापि गहनं
यतोऽभूद् वन्द्योऽसौ पशुपतिरतोऽधर्मविरतः ॥६॥

हरस्य कीर्तिं हरिरात्मदासात्
स्तौतीति चित्रन्न कथञ्चिदेतत् ।
शव्दद्वयन्नैतदनेकमूलं
भेदः प्रतीतेः प्रकृतेर्न्यभेदः ॥७॥

दोषा न चिन्त्या जगदीशकीर्तौ
सम्बन्ध ऐशः समदोषहन्ता
आयान्तु केचित् त इहाचिरेण
सुसंस्कृताः सद्गुणतां भजेयुः ॥८॥

गैंडाकोटे सुभगवसतौ दिव्यगङ्गाभिरामे
धर्म्ये रम्ये नगरतिलके गण्डकीप्रान्तरत्ने ।
येनानीतं त्रिदशसुगिरां वृद्धये कालिकाख्यं
विद्यापीठं स किल नु कथं विस्मृतिं यातु धन्यः ॥९॥

नीलाद्रिनाथेन समो हि नाम्ना
यत्काश्यतां लाङ्गवताञ्च यातः ।
श्रीवैष्णवः शम्भुचरित्रचित्तो
नमामि काव्यं कविमुत्तमञ्च ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विराजतां काव्यमिदं चिराय

– प्रो. हरिप्रसाद अधिकारी

श्रीबर्म्मदेशे जनिमाप्तवद्भ्यः शास्त्रेषु सर्वेषु कृतश्रमेभ्यः
अग्निप्रसादात्मजविद्वरेभ्यः समर्पये काशिपतेः प्रसादम् ॥१॥

नैकानि शास्त्राणि विलोक्य सम्यगवाप्य बोधं विमलं विशालम् ।
संसेव्य विद्यानिलयानि सम्यग्राराजते पूर्णविधुर्धरित्र्याम् ॥२॥

अधीत्य काश्यां ननु बाल्यकालात् प्रौढिं प्रकृष्टामधिगत्य शास्त्रे ।
गोरक्षनाथस्य पुरे सुरम्ये योऽध्यापयच्छात्रगणान् विपश्चित् ॥३॥

स पूर्णचन्द्रो बुधवृन्दवन्द्यो नेपालदेशेऽपि समादृतोऽभूत् ।
विधाय सेवां शुभविश्वविद्यालयेऽप्यसौ ख्यातिमवाप रम्याम् ॥४॥

वार्धक्यकालेऽपि सदैव विद्वान् विरच्य काव्यं सुधियां समक्षम् ।
प्रस्तौति शम्भोर्महिमप्रकाशप्रभान्वितं मोदकरं जनानाम् ॥५॥

महेश्वरावाप्तकृपाप्रसादो देवाधिदेवस्य गुणान् समस्तान् ।
संगृह्य काव्यं व्यदधात् सुरम्यं छन्दोमयं सर्वगुणैरुपेतम् ॥६॥

समासेनास्य काव्यस्य विषयान् शास्त्रसम्मतान् ।
विलोक्य मानसे मोदो नूनं स्याच्छास्त्रसेविनाम् ॥७॥

शास्त्रेषु शिवमाहात्म्यं वर्णितं यत्र तत्र हि ।
चतुर्वर्गप्रदः शम्भुर्मन्यते सर्वविद्वरैः ॥८॥

शम्भुनारायणौ भिन्नाविति केचित् प्रचक्षते ।
भेददृष्ट्या प्रवर्तन्ते कलहञ्च प्रकुर्वते ॥९॥

एकमेव परं ब्रह्म विष्णुरुद्रादिभेदतः ।
भ्राजते सर्वजीवेषु न भेदो विद्यते तयोः ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परस्परं प्रशंसन्तौ स्तुवन्तौ चापि तावुभौ ।
दृश्येते सर्वशास्त्रेषु ज्ञायते तद्विदांवरैः ॥११॥

सप्तविंशतिसर्गेषु महाकाव्येऽत्र धीमता ।
विश्वेशमहिमा सम्यग् वर्णितो बहुविस्तरात् ॥१२॥

ह्यन्येऽपि विषयाश्चात्र लोककल्याणदृष्टिना ।
वर्णिताः पृथ्विसम्बद्धा जलेन च समन्विताः ॥१३॥

महादेवकृतानां वै कर्मणाञ्च विभागशः ।
कविवर्येण ग्रन्थेऽस्मिन् कृतं वर्णनमुत्तमम् ॥१४॥

सृष्टिस्थित्यादिकार्याणां कृते देवास्त्रिरूपकाः ।
न भेदस्तेषु मन्तव्यः सृष्ट्यर्थं भेदकल्पना ॥१५॥

मातृपितृगुरुस्थाने ब्रह्मविष्णुमहेश्वराः ।
त्रिदेवाः सन्ति सर्वेषां कर्तव्यं विद्यते पृथक् ॥१६॥

यथा सर्वस्थलान्नद्यो वहन्ति सागरं प्रति ।
तथैव सर्वदेवानां पूजनं शिवतोषणम् ॥१७॥

यस्य भक्तस्य या श्रद्धा यस्मिन् देवे प्रवर्तते ।
तत्रैव वर्धमाना सा परां तुष्टिं प्रयच्छति ॥१८॥

भावस्यैकस्य यो द्रष्टा सर्वेषामपि तत्त्वतः ।
भावबोधे समर्थः स्यात् स एव नात्र संशयः ॥१९॥

एवं विज्ञाय कविना महाकाव्यस्य नायकः ।
शिवभक्तिपरेणात्र नीलकण्ठः कृतो मुदा ॥२०॥

संस्कृतात्मा कविवरो विश्वस्मिन् संस्कृतं शुभम् ।
प्रसारणपरो यत्नं विधत्ते बहुकालतः ॥२१॥

भारते चाथ नेपाले भूटानेऽपि च संस्कृतम् ।
प्रतिष्ठितं स्यादित्यर्थं कविवर्यैर्विचेष्टितम् ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साम्प्रतं विश्वमञ्चेषु विभ्रमन् कविपुङ्गवः।
सन्मार्गस्थापने यत्नं कुर्वन्नास्ते विदां वरः ॥२३॥

निवृत्तोऽप्यनिवृत्तोऽसौ काव्यकृल्लोकसेवनात्।
प्रेरयन् संस्कृतप्राणान् जागर्त्यत्र दिवानिशम् ॥२४॥

विश्वेश्वरप्रसादेन सर्वविद्याविशारदः।
मनसा कर्मणा वाचा संलग्नः शास्त्रचिन्तने ॥२५॥

प्रपञ्चानि बहून्यत्र भवन्ति मर्त्यजीवने।
तान्यनादृत्य सद्विद्याचिन्तने रमते सुधीः ॥२६॥

एतस्य विदुषः कीर्तिः पूर्णचन्द्रस्य धीमतः।
सर्वत्र प्रसरेच्छुभ्रा विश्वेश्वरप्रसादतः ॥२७॥

संहर्षणं त्यागविशारदानामुत्तेजनं मन्दपराक्रमाणाम्।
करोतु काव्यं निखिलेऽपि लोके शम्भोः प्रसादादिति भावयामि ॥२८॥

हरिप्रसादनामाहं हरिपादाप्तसन्मतिः।
पूर्णचन्द्रकवेः काव्यं भ्राजतामिति कामये ॥२९॥

देव-दीपावली
वाराणसी

(प्रो. हरिप्रसाद अधिकारी)
आचार्योऽध्यक्षश्च
तुलनात्मकधर्मदर्शनविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभ्युक्तिः

डा. उमाकान्तशर्मा पौडेलः
सेवानिवृत्तप्राध्यापकः,
श्रीगोरक्षनाथ-संस्कृत-विद्यापीठस्य गोरखपुरस्थस्य (भारतस्य)
वर्तमानसंकेतः - दल्दले - १३, देवचुली न.पा., जि. नवलपुरम्
लु.अ. (नेपालः)

विद्यावाचस्पतिविद्वच्चूडामणि प्रभृतिविशिष्टोपाधिद्वारा समलङ्कृतैराचार्यपूर्णचन्द्रोपाध्यायैः प्रणीतं देवाधिदेवस्य महादेवस्य महिमपूर्णं-**'देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्** नाम ग्रन्थरत्नं प्रकाश्यमानमस्तीति श्रुत्वाहमतितरां मोमुद्यमानोऽस्मि । व्याकरणशास्त्रे, न्यायशास्त्रे, साङ्ख्यशास्त्रे वेदान्त-साहित्य-ज्यौतिषादिषु च विषयेषु धुरन्धराणां विद्वत्पुङ्गवानां नामानुरूपयशस्विजीवनानां विश्रुतवैदुष्याणाम् आचार्यपूर्णचन्द्रोपाध्यायानामनेकशो रचना बहुत्र पत्रपत्रिकासु प्रकाशिता आसन् किन्तु दिव्यतमेषु व्यञ्जनेषु सैन्धवाभाव इव तथाविधस्य विद्वत्तापूर्णस्य ग्रन्थविशेषस्याभाव आत्मीयजनानां हृदि खिन्नतामपूर्णतां वा जनयति स्म, पानकरसे बालुकाकण इव वा अरतिं समुत्पादयति स्म । रचनारत्नमेतदात्मीयजनानां विदुषां च हृदयालङ्करणरूपं प्राप्स्यतीति मे द्रढीयान् विश्वासः ।

उपाध्यायसमाना विद्वांस इदानीमङ्गुलिषु गणनीयाः सन्ति । विद्याचणस्यैतस्य प्रौढितापूर्णं पाण्डित्यं विदुषां नास्तीति न तिरोहितम् । स्यूतेषु पाथेयं भरित्वा कृतेऽप्यन्वेषणे व्याकरण-न्याय-साहित्य-विषयत्रये आचार्यः सुदुर्लभ एव ऋते उपाध्यायादिति च मे मतम् । 'आकृतौ गुणा वसन्ती'ति सामुद्रिकशास्त्रवचनं यथार्थरूपेणोपाध्यायस्यास्य जीवने चरितार्थम् । अत्र भवति आचार्ये यथा शास्त्रीयं ज्ञानं विद्यते तथैव विनीतत्व-सौमनस्त्व-सरलत्व-गाम्भीर्यादयो गुणा अपि पदे पदेऽवलोकयितुं शक्यन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्, इति वचनम् आचार्यस्य जीवने चरितार्थतां गच्छति। आचार्यजीवनस्य पञ्चषाणि वर्षाणि विहाय अशीतिवर्षाणि अध्ययनाध्यापन एव गतानि । अनेकेषु विद्यालयेषु महाविद्यालयेषु चान्यतमं पदं ससम्मानमलङ्कृत्याचार्यैरेभिः संस्कृतेः संस्कृतस्य च महती सेवा कृतास्ति। विद्वत्ताया अनुरूपं शैक्षिकक्षेत्रस्य गौरवपूर्णं महेन्द्र–संस्कृत–विश्वविद्यालयस्य दाङ्गनेपालस्थस्योपकुलपतेः पदरूपपर्वतशिखरमपि आचार्यैः सारल्येनानायासेनवासमारूढम्।अपारपारावाररूपस्यसंस्कृतसाहित्यस्य विविधविषयरूपतरङ्गेषुअबाधगत्या विहरणशीला इमे विद्वांस इदानीन्तमे समय उदाहरणरूपा एव। सनातनवैदिकसंस्कृतौ देववाण्यां संस्कृतभाषायां देवाधिदेवे महादेवे च अद्वितीया निष्ठा अनुरक्तिर्वास्ति विद्याचुञ्च नामुपाध्यायानम्।

सनातनवैदिकसंस्कृतिर्हि मानवानां कृते प्राणरूपा आत्मरूपा विधिरूपा चास्ति यां विना मानवजीवनं व्यर्थं निष्प्राणं वा स्यात्।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।

इदं हि खलु वैदिकसंस्कृतेः सूत्रमस्ति, सारतमतत्त्वमस्ति, सनातन–संस्कृतिमाध्यमेनैव यत्र विश्वं भवत्येकनीडम्, कृण्वन्तो विश्वमार्यम्, आत्मवत्सर्वभूतानि एवंविधा विचारा भावा वा उदयं गच्छन्त्याविर्भवन्ति च तथाविधसनातनसंस्कृतिं विना जीवनं जीवनरूपतां न धत्ते। एवंविधा संस्कृतिः संस्कृतभाषामेवाश्रित्याधितिष्ठति। अर्थात् संस्कृतेराधारभूमिः संस्कृतमेवेति।

संस्कृतं खलु विश्वजनीनम् । देवभाषा देववाणी वेदवाणीत्यादीनि संस्कृतस्य सार्थकनामानि । देववाणीं पठत्सु देवत्वमायाति, यथा भाषा तथा गुणाः, इति वचनात्। एवंविधगुणा देववाणी मानवान् संस्करोति, मानवेषु देवत्वं कुरुते तदादधाति वा। समग्रा संस्कृतिर्निखिलं ज्ञानं च संस्कृत एवास्ति। ज्ञानं विज्ञानं वेदा उपनिषदः पुराणानि धर्मशास्त्राणि नीतिशास्त्राणि ज्यौतिषं गणितं भूगोलीयं खगोलीयं ज्ञानञ्चेति सृष्टितः समारभ्याद्यावधिको निखिल इतिहासश्च साङ्गोपाङ्गरूपेण संस्कृत एव समुपलभ्यते । वस्तुतः संस्कृतसाहित्यं विश्वसाहित्यस्य विश्वज्ञानस्योपजीव्यमेवेति सुनिश्चितम् । संस्कृतसमाना ज्ञानदायिनी परमार्थसाधिनी विश्वजनीना नान्या कापि भाषा । सर्वाङ्गपूर्णं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साहित्यं ज्ञानं वा ऋते संस्कृतान्नान्यत्र सुलभम्। समस्तभाषाणां जननी इयमेव संस्कृतभाषेतिसर्वसम्मतंमतम्। संस्कृतस्यसंस्कृतेश्चकारणादेवदेशोऽयंविश्वगुरु रूपेण विश्रुतः सम्मानितश्चासीत्। तयोरपमानकारणादेव जनेषु परस्परं वैमनस्यं सङ्घर्षः शत्रुत्वमुच्चत्वनीचत्वादयोऽनेके दुर्भावा विविधविपत्तयश्चागता भूयांश्च रक्तपात आसीत्।

देशे मानवसमाजे वा यथा संस्कृतेः संस्कृतस्य चावश्यकता भवति तथैव पञ्चदेवोपासनायाश्च । विघ्ननिवारणार्थं गणेशस्य, शक्तिपुरुषार्थं दुर्गायाः, नैरुज्याय सूर्यस्य, स्वरक्षायै विष्णोः, ज्ञानाय परमोन्नतये च सदाशिवस्य स्मरणम्, अर्चनं वन्दनं चानिवार्यमेव। यतो हि देवबलमेव बलम्। दैवेऽनुकूले एव सर्वं साधयितुं शक्यते नान्यः पन्था विद्यतेऽयनाय।

अस्माकं नेपालराष्ट्रं शालिग्रामक्षेत्रं मुक्तिनाथस्य विशेषतः पशुपतिनाथस्य च क्षेत्रमस्ति। अतोऽत्रत्यैः सर्वैरपि जनैः पशुपतिनाथस्य पूजनं नमनं स्मरणं चावश्यमेव करणीयम् अन्यथा नैव तेषां कल्याणम्। यथोक्तम्–

यस्य क्षेत्रस्य यो देवस्तस्यानर्चा महाक्षतिः ।

मुक्तिदायिक्षेत्रविशेषस्य मुक्तिनाथस्य विषये सर्वैः कथावस्तुतत्त्वं सुविज्ञेयम्। एकदा सृष्टिप्रारम्भकाले चराचरात्मकजगत्पालनाय पालनशक्तिं वार्जयितुं भगवान् विष्णुः शिवमुद्दिश्य सुघोरं तपश्चचार। शिवेन दर्शनं वरदानानि च दत्तानि । घोरतपस्यायां विष्णोर्गण्डस्थलात् स्वेदजलधारा निर्गता । सा एव जलधारा विष्णुगण्डस्थलनिर्गमनकारणात् कृष्णागण्डकीनाम्ना नदीरूपेण विश्रुता। विष्णुना च सदाशिवाज्जगतः पालनसामर्थ्यस्य मुक्तिदायिक्षेत्रस्य च वरदानं लब्धम्। ततो हि विष्णुर्मुक्तिनाथस्य शिवस्य स्थापनां कृत्वा सम्पूज्य च जगत्पालने क्षेमतां दधौ, इति गण्डकीमाहात्म्यादिषु बहुत्र मुक्तिनाथस्य चर्चास्ति।

एवमेव शिवपुराण–लिङ्गपुराण–देवीपुराणादिषु यत्र तत्र सृष्टिकर्तुर्ब्रह्मणः पालनकर्तुर्विष्णोश्च श्रेष्ठताविवादे देवाधिदेवेन शिवेन दिव्यमनिर्वचनीयं वा ज्योतिर्लिङ्गं समुद्भाव्य कृतेन विवादशमनेन महादेवस्य देवस्य निर्णायकत्वं न्यायाधीशत्वं महनीयत्वं वा सुप्रसिद्धमस्ति । वस्तुतो भगवतः शिवस्य स्वभावो विचित्रोऽस्ति सामर्थ्यं चानिर्वचनीयम्। यथा –

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वेश्वरत्वे सति भस्मशायिने गौरीपतित्वे सति चोर्ध्वरेतसे ।
वित्तेशभृत्ये सति चर्मवाससे निवृत्तरागाय नमस्तपस्विने ।।

अनन्तकोटिब्रह्माण्डाधिपतेः कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य देवाधिदेवस्य महादेवस्य महिमा न केनापि ज्ञातुं पार्यते । यतो हि शिवः सामान्यदेवो नास्ति, अपि तु देवदेवो महेश्वरोऽस्ति । महाकविना कालिदासेन रघुवंशमहाकाव्ये सम्यगेवोक्तम् –

हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः, इति ।

एवमेवामृतार्थं देवानां समुद्रमथनेऽवार्यहालाहलमहाविषेण जगद्भस्म कर्तुं प्रवृत्ते ब्रह्मविष्णुमहेन्द्रादिसुरेष्वसहायेषु विपद्ग्रस्तेषु उपायशून्येषु सत्सु यदा सर्वशक्तिमता त्रिभुवनपालकेन कल्याणमूर्तिना सदाशिवेन महेश्वरेण अन्यैरदम्यमप्रतिकार्यं तथाविधं प्रलयकारिमहाविषं पीत्वा नीलकण्ठत्वं **नीलकण्ठः** इति माङ्गलिकं कल्याणकारि च नामधेयं प्राप्तम् । शिवस्य सहस्रनामसु नीलकण्ठनामान्यतमकल्याणकारीत्यत्र नास्ति कस्यापि वैमत्यम् ।

संस्कृतं संस्कृतिः शिवश्चैतत्त्रितयमेव मानवानां कल्याणकारि तत्रापि शिवस्य हालाहलपानेन समस्तसृष्टेः संरक्षणविशेषनिर्वाहकतादृशा विशिष्टकल्याणकारित्वं सुसिद्धमेव । तत्र च पुनः शिवस्य नीलकण्ठ इति नाम सर्वातिशयहितकारि । एतत् सर्वं नीलकण्ठस्य महनीयं सुयोग्यं सर्वातिरेककल्याणकारिमहत्त्वं तत्त्वं रहस्यं वा ख्यापयितुं प्रकाशयितुं च विद्वद्वरेण्यैराचार्यैः पूर्णचन्द्रोपाध्यायैरस्य ग्रन्थरत्नस्य नामकरणं **'देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्** इति कृतं भवेदिति न कापि मे संशीतिः । उक्तञ्च –

ग्रन्थनाम तथा कार्यं विशेषार्थप्रकाशकम् , इति ।

संस्कृतकाव्यानामभावग्रस्ते दौर्भिक्ष्ये वा वर्तमानकाल एतत् काव्यं संस्कृतं संस्कृतिं शिवं प्रति च जनान् समुन्मुखान् करिष्यति । भगवान् विघ्नहर्ता गणेशः पशुपतिनाथो मुक्तिनाथः शालिग्रामो भगवती दुर्गा च महाकाव्यकर्तृणां पूर्णचन्द्रमहाभागानां समस्तस्य लोकस्य च कल्याणं कुर्वन्त्विति मे भूयो भूयोऽभ्यर्थना ।

इति शम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाधिदेवनीलकण्ठमहाकाव्ये मुकुलिता दृष्टिः

प्रा. डा. वेणीमाधवढकालः

निखिलप्रपञ्चनायकस्य नटराजस्यानन्यया करुणया समये समये सम्भवतितद्भक्तसज्जनानांविदुषामिह जननम्। नेपालाद्वर्मादेशंप्रतियातस्यकुलीनस्य सदाचारसम्पन्नस्य ढुङ्गेलपरिवारस्य गृहे जन्मजन्मान्तरीयसंस्कारवशात् सन्दीप्तसनातनसंस्कारः पूर्णचन्द्र इव दीप्तः पूर्णचन्द्राभिधानो बालकोऽजायत। कैशोर्य एव प्राक्तनविद्यासंस्कारसम्पत्सम्प्रेरित इव बालोऽयं स्वकीयेन पितृव्येन साकं भगवतो विश्वनाथस्य नगरीं वाराणसीं विद्यावारांनिधिरूपां वेदवेदाङ्गादिविद्याध्ययनार्थं समागतवान् । तत्र द्वादशवर्षपर्यन्तं स्थित्वा देवगीर्निबद्धानि सकलशास्त्राण्यधीत्य विशेषतः पदवाक्यप्रमाणान्यात्मसात्कृत्य व्याकरणन्यायादिषट्शास्त्रपारावारीणः समपद्यत।

विश्वविद्यालयीयमध्ययनं समाप्य कतिचिद्वर्षाणि तत्र वाराणस्यामेवाध्याप्येष विपश्चिद् दाङमण्डलस्थैः श्रद्धालुभिराहुतो दाङमागत्य जनतामहाविद्यालयस्य प्राचार्यत्वं विभ्रद् द्वादशवर्षाणि तत्र विद्याधारां प्रवाहयन् व्यराजत्। तदनन्तरं समादरणीयेन योगिना विद्यासागरेण साकं भारतभ्रमणं कुर्वाणो हरिद्वारं प्रापत्। तत्र च तद्द्वैदुष्यानुगृहीतैः सम्प्रर्थितः सन्नुत्तराखण्डे विश्रुतस्य श्रीभगवान्दास-संस्कृत-महाविद्यालयस्य प्राचार्यपदवीं समलञ्चकार । समयेऽस्मिन्नन्यैश्छात्रैः साकं सहस्राधिकान् संन्यासिनश्छात्रानपि वेदाङ्गानि वेदान्तशास्त्रञ्च चारु सम्पाठ्य सर्वानपि कृतार्थीकृतवान् । कतिपयवर्षाणि तत्राध्याप्य विश्वविख्यातस्य महर्षेर्महेशानन्दयोगिनः प्रार्थनायामृषिकेशनगरस्थशङ्कराचार्यविद्यापीठे स्नातकोत्तरस्तरीयच्छात्रानेवापाठयत्।

ततो गोरक्षपुरमायातो भारतीयलोकसभासदस्येन गोरक्षपीठाधिपतिना माननीयेन श्रीमताअवेद्यनाथेन सादरमाहूतोऽसौ गोरक्षपुरे विराजितस्य गोरक्षविद्यापीठस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राचार्यत्वंस्वीकृतवान्। ततश्च निवृत्तिसमयपर्यन्तंतत्रैवाध्यापयन्लक्षाधिकानां-छात्राणां कल्याणमकरोत् । तत्राध्यापनकाल उत्तरप्रदेशीयप्राध्यापक-सङ्घस्याध्यक्षतां कुर्वाणः संस्कृतस्य विश्वव्यापिप्रचारदिशि महनीयं योगदानं विहितवान् । आजीवनमुच्चस्तरीयशैक्षिकसंस्थानेषु क्रियाशीलेनानेन विद्वद्धुरन्धरेणसहस्राधिकालेखनिबन्धाः प्रकाशिताः,शताधिकाः शोधप्रबन्धाश्च पर्यालोचिताः । तत्रैव सेवासमये सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयेन 'विद्यावाचस्पतिः' इत्युपाधिना सम्मानितः साक्षाद्वाचस्पतिरिव विद्योतते।

गोरक्षपुरतः सेवानिवृत्तोऽसौ महामनीषी निजां जन्मधरणीं नेपालं समागत्य नैपालकैर्विद्वद्भिः शिष्यैश्च समाहुतो नेपाल-संस्कृत-विश्वविद्यालयस्योपकुलपतिपदमलङ्कृतवान् । चत्वारि वर्षाणि तत्र महनीयां सेवां विधाय नेपालस्य राजधानीं काष्ठमण्डपमागत एष कुलपरम्परागतशिवशेवी सिम्प्रति शिवसाहित्यमनुशीलयन् भगवतः पञ्चाननस्य पशुपतेराराधनया सच्चिदानन्दमग्नो विराजते । निरन्तरं शिवाराधनया प्रस्फुटितकवित्वोऽसौ 'देवाधिदेवनीलकण्ठमहाकाव्यम्' नाम्ना समलङ्कृतं महाकाव्यं सप्तविंशतिसर्गात्मकं देववाण्यां प्रणयनेन साम्प्रतं तद्विरचनसामर्थ्यसम्पादकस्य भगवतः श्रीपशुपतिनाथस्यानिर्वचनीयां करुणामात्मन उपरि समापतितां मन्यमानो महाकाव्यस्यैतस्य विरचनमपि पशुपतिं प्रति कृतज्ञतावचनततिसमर्पणमिवाकलयन् कृतकृत्यतामनुभवति।

नेपाले भारते च प्रथितेन वैदुष्येण विभूषित एष सुधीर्लक्षाधिकानां छात्राणां परमगुरुरिदानीं शिवप्रदत्तयाधर्षण्यया प्रतिभया चमत्कृतो व्युत्पत्तिप्रतिभाविशिष्टः सर्जने समीक्षणे च समानतयैव विचक्षणो विलक्षणशक्तिमान् प्रतीयते । केचन व्युत्पत्तिमन्त एव भवन्ति, केचन पुनः प्रतिभया केवलया पूर्णा भवन्ति कवयः परमस्माकं सौभाग्यमस्ति यदयं कविः पूर्णचन्द्रः शिवाराधनया शिवरूपो मनीषी समालोचकत्वेन कवित्वेन च समलङ्कृतः सन्दृश्यते। उक्तञ्च राजशेखरेण-

कश्चिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति ।
न ह्येकस्मिन्नतिशयवतां सन्निपातो गुणाना-
मेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ॥

एवमुभयत एव प्रतिभाभासितेनानेनेदानीं पूर्णचन्द्रेणेव पूर्णचन्द्रेण विद्यावाचस्पतिपदवीसमलङ्कृतेन देवाधिदेवनीलकण्ठमहाकाव्यं यद्रचितं तश्छिवोज्ज्वलभक्तिभावगभीरं भावसाम्राज्यस्याद्वितीयं रत्नमिवाभाति । जगद्धर-पुष्पदन्तादीनां भावप्रधानानि काव्यानि यथा जगति सन्ति प्रथितानि तथैवेदं महाकाव्यं भावोज्ज्वलं श्रीपशुपतिनाथप्रकाशप्रकाशितं निजैरनिर्वचनीयैर्गुणैर्देदीप्यमानमस्ति । प्राचीनानां लक्षणशास्त्रकृतां यानि महाकाव्यलक्षणानि सन्ति तत्र तत्र युगानुसारेण परिवर्तनमावश्यकमिति वदन्निवैष महाकविर्यत्र यत्र सर्वातिशायिप्रतिभाप्राचुर्यं तत्र तत्र महाकाव्यत्वमिति निजामवधारणां प्रकाशयति किल महाकाव्यस्यास्य विरचनेन ।

महाकाव्येऽस्मिन् साक्षाद् भगवती शिवा नायिका साक्षाद् भगवान् शिवश्च नायकः । जगत्प्रपञ्चमेतद्धि तयोर्विहारस्थलमिति शक्तिशिवसामरस्यं महाकाव्यस्यास्य महनीया प्राप्तिः। प्राधान्येन शिवविषयिण्या रतिभावस्याङ्गितायां करुणबीभत्सादयो रसा आस्वादपदवीमधिरूढा विलसन्त्यत्र । विशेषतो द्वितीयविश्वयुद्धस्य समये वर्मादेशे सङ्कटसङ्कुले जाते तं विहाय नेपालं भारतञ्चाप्याजिगमिषूणां नारीणां नराणां वृद्धानां बालबालिकानाञ्च मध्येमार्गं मरणान्तिका या दुर्दशा सञ्जाता तस्याः प्रत्यक्षदर्शी तादृशकारुण्यावस्थायां समापतितश्च स्वयमसौ महाकाविरासीत् । अत्र च महाकाव्ये प्रपञ्चविप्लावाङ्गरूपेण सहृदयोऽसौ प्रारम्भिकेषु सर्गेषु तच्चित्रणं चारु कृतवान्। अत्र कथावस्तु तदेव वर्तते यद् भगवतो नीलकण्ठस्य विषपानसम्बद्धमाख्यानं यत् पुराणेषु समुपलभ्यते। तदेव वस्तु प्रतीकरूपेणोपयुज्य वर्तमानसमये शिवं विरुध्य विषपायिनां नग्नविचारव्यवहाराणां जनानामपि महाकाव्येऽस्मिन् हृदयस्पर्शितया वर्णनं कृतमुपलभ्यते ।

वर्मादेशतो नेपालमाजिगमिषूणां जनानां कारुणिकं चित्रणं यथा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हा हा हता बान्धवा मे गजेन ....(८/२८), तदा मे .... (८/४०), कियन्तः .... (८/२४), भयानकः- न्यरुन्धन् .... (८/२६)।

काव्येऽस्मिन्महाकविनाशिवस्यनेपालस्यचभावप्रवणंवर्णनंविहितम्।नेपालस्य किरातकाल-लिच्छविकाल-मल्लकाल-शाहकाल-राणाकालानां सपरिचयं तत्तच्छासनकालस्य वैशिष्ट्यमपि निरूपितम्। पाथीभरा-अन्नपूर्ण-वराहनाथ-सप्तकौशिकी-सप्तगण्डकी-गोस्वामिनाथ-देवघट्ट-मुक्तिनाथ-गलेश्वर-स्वर्गद्वारी-नामकानि तीर्थानि सश्रद्धं वर्णितानि। शैलराड् हिमालयो वचसा पूजितः। हिमालयनन्दिनी भवानी च वारं वारं शब्दकुसमाञ्जलिभिः सादरं सत्कृता। विशेषतो नेपालमातुः श्रद्धासिक्तं चित्रणं सहृदयानां हृदयं द्रावयति।

नेपाले नेपालभारतवन्दितेन विदुषा महाकविना परम्पराविलक्षणं भक्तिविशिष्टञ्च महाकाव्यंप्रणीयनेपालमातुःशीर्षोत्थानंकृतमितिमहाकविरसौ धन्यवादार्हो वर्तते। स्वस्य महाकवित्वं स्वकीयकाव्यस्य महाकाव्यत्वञ्च विषयप्रस्तुतिसन्दर्भे स्वयमेव प्रतिपाद्य तद्विषयकविश्लेषणविधौ शङ्काकुलाः समीक्षकाः स्वत एव निःशङ्काः सम्पादितानेन महाकाव्यकारेण। उक्तञ्च स्वर्गद्वारीवर्णने-

स्वर्गद्वारी सुशैलः ... (२७/१०७)

महाकाव्येऽस्मिन् के के विषयाः प्रामुख्यं भजन्त इति विषयोऽपि महाकविना प्रतिसर्गं पुष्पिकाश्लोके संक्षिप्तरूपेण सूचितमुपलभ्यते। यथा-

आचार्याग्रिमपूर्णचन्द्ररचिते .... (२७/१७)

पर्यन्ते च महाकाव्यस्यास्य कमनीयां कीर्तिं कामयन् सुतरां महर्षिकल्पस्य नितरां सम्माननीयस्य लोकगुरोः पूर्णचन्द्राभिरामस्य पूर्णचन्द्राभिधानस्य महाकवेरस्य शतविंशतिवर्षीयं सच्चिदानन्दरमणीयं स्वस्थञ्च जीवनं स्यादिति पञ्चमुखं भगवन्तं पशुपतिनाथं गुह्यकालीं भगवतीञ्च प्रार्थयन् विरमामि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाधिदेवश्रीनीलकण्ठमहाकाव्यं महाकविराचार्यपूर्णचन्द्रढुङ्गेलश्च

नारायणप्रसादखनालः
लब्धविद्यावारिधिकप्राध्यापको विभागाध्यक्षचरश्च
वीरेन्द्रबहुमुखिमहाविद्यालयः, त्रि.वि.

श्रीमदाचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलमहोदयोऽगस्तिगोत्रे पराशरजैमिनिदधीचिप्रवरत्रयान्विते माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायिनां विप्राणां कुले जनिं लब्धवान्, यस्य पितरः प्रथममोखलढुङ्गामण्डल निवासिनोऽपि पश्चात्ताप्लेजुङमण्डले समायाता आसन् । अस्य पितामहः कपिलदेवः आसीत्। सकलसैनिकगणस्य पण्डितपदमधिकृत्य कृतसेवस्य विद्वद्धौरेयस्य ज्योतिर्विदो विदुषश्चन्द्रप्रसादोपनाम्नः कपिलदेवस्य निजधर्मपत्न्यां सरस्वत्यां त्रयः पुत्राः जाताः । तेषु ज्येष्ठपुत्ररत्नो ज्योतिर्विद् पण्डितोऽग्निप्रसाद आचार्यपूर्णचन्द्रस्य पिता आसीत् । अस्य माता च नर्मदादेवी । अग्निप्रसादस्य चत्वारः पुत्रा जातास्तेष्वसौ तृतीयपुत्ररत्नो वर्तते। भारतवर्षोपपन्नोर्वरभूमिप्रान्ते तदानीन्तनाङ्ग्लसर्वकाराशासिते तदानीं वर्माभिधानके सम्प्रति 'म्यान्मार'-इत्यभिधेये देशे चेरावतीनदीनेदीयसीभूते 'मिचिना'मण्डलान्तर्गत'मखानी'नामकसुरम्यनगरे लब्धजनिस्तत्र सुखपूर्वकं बाल्यावस्थां व्यतीतवान्। कियत्कालानन्तरं मध्यमपितरि ज्योतिर्वित्पण्डिततल्लजे लक्ष्मीकान्तोपाध्याये सपरिवारं वाराणसीं प्रति प्रस्थिते संयोगादार्थिकसमृद्ध्याधारभूतेष्वनेकेषु पशुष्वज्ञातपशुरोगैर्मृतप्रायेषुबाध्यतयातङ्कितस्तदीयपरिवारजनोकृषिगोपालनपौरोहित्यकर्मभिः साकं निजनिवासभूमिं मखानीनगरं त्यक्त्वा चाङ्किन्-इति नामके सुरम्येऽन्यदीये ग्रामकटीकानेदीयसि स्थाने स्थानान्तरणं कृत्वा गृहगोष्ठादिकञ्च पुनर्निर्माय तत्रैव पूर्ववज्जनजीवनं सहजं विनिर्मितवान् किल । एतस्मिन् काले पूर्णचन्द्रः शुक्लपक्षीयचन्द्र इव पूर्णतामधिगन्तुमिव निरन्तरं प्रवर्धमानः पित्रोः स्नेहरसैः सुष्ठु लालितः पालितः पोषित उत्प्लुत्योत्प्लुत्य क्रीडनपरायणः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहमेधिजनानां कृते परमाह्लादपरायणः पटुवटुकतरलीलारसासिञ्चनकैशोर्यं प्रतीक्षमाणआसीत्।अथचपितुःसकासात् पठितानामरकोषलघुसिद्धान्तकौमुदीनां सचातुर्यं पाठाभ्यासयोगेन प्रतिदिवसं द्विगुणिततया संवर्धितयोग्यतो बाल्यादेव प्रतिभावानयं सुखदभविष्यत्कालं सङ्केतयन् पुनरग्रे धावति स्म । तदानीं परिवारजनेषु सुखसौविध्यं धनधान्यादिसमृद्धिविलासं क्षेत्रगोष्ठादिगृह-सम्भारसुखसारञ्चाधिकमासीत् । धवित्रेषूर्वरवरसस्यशालिक्षेत्रेषु हविष्यान्नाहविष्याद्यन्नानि लहलहाकाराणि वातप्रेरितनूतननृत्तसहितानि प्रस्तुवन्ति स्म । सौष्ठवेषु गोष्ठेषूधस्य गावो रोमन्थयन्ति स्म । अमृतकल्पानां दुग्धघृतानां कुल्यैव प्रवहति स्म । समन्दुरमन्दुरायां धावनचतुरघोटका ह्रेषन्ते स्म । प्राङ्गणेष्वनुजाग्रजाश्चाधिकं सस्नेहानुरागं कन्दुकेन प्रक्रीडन्ति स्म ।

अस्मिन्नेव सहकालकाले जर्मनदेशीयेन 'एडोल्फहिट्लर' इत्याख्येन समहत्वाकाङ्क्षं क्रूरतया शासनपरेण द्वितीयविश्वयुद्धमुद्घुष्टम्। ततश्चोद्वेलि-तजापानसैनिकातङ्केन समुत्पादितेषु भीषणविभीषिकाकोलाहलेषु सन्त्रस्ता वर्मा-देशजनास्ततो विचलिता जाताः। तदनु च निजनिजमूलदेशग्रामभाषाभूषामातृभूमिं प्रति जनितप्रगाढानुरागेण विक्षिप्तमानस इव सहस्रजनसङ्घो विषण्ण-मानसिकावस्थो भारतनेपालभूमिं प्रति प्रस्थितो विषममार्गेण। तदानीं ढुङ्गेलपरि-वारोऽपि परित्यक्तपशुक्षेत्रादिसकलाचलसम्पत्सङ्घः प्राणनमात्रैकहृदयः प्रथमं घोटकवृषभादिस्कन्धारोपितसकलसम्भारयात्रोऽपि कठिनतरमार्गस्य कारणात् सर्वमपि ससम्भारजातं तत्रैव परित्यज्य पुनरपि यथाशक्तिस्कन्धारो पितखाद्यपदार्थसुवर्णरजतमुद्रादिधनराशिसहितो गड्डुरिकाप्रवाहेणेव प्रस्थान-मकरोत्।अविलम्बञ्चजङ्गलाज्जङ्गलमपरिचितविषमपदमार्गमतिक्रम्यगताःखा द्याखाद्यपदार्थखादनाविमलजलपानादिजनितैरुग्रव्याधिभिर्लोकाः सबाल युव-वृद्धवनिता न केवलं तन्वा जनुषापीह लोकं प्रियं परित्यजन्ति स्म। सकलचन्द्र इव पूर्णचन्द्रोमार्गव्यतिकरव्यतिपातव्यथावियोगव्याकुलकालकवलिताग्रजावरजान् दर्शं दर्शं सरोदनं विहितमातृपितृक्रोडप्रक्षिप्त भगवन्नीलकण्ठाराधनैकाशा-पाशजीवितो भारतवर्षस्यासामप्रदेशे समानितोऽपि दैववशादेकैकशोऽत्य-ल्पकालानन्तरं पितृमातृविरहमवाप । प्राप्तविद्यालयैकशरणः स्वावलम्बन-क्रियाशीलतयोर्बलेन समधिगतगुरुगृहपठनभरणपोषण परिधानकः स्वकीयां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मेधामुपयुञ्जन् योग्यतामसाधारणीमर्जयन् स्वजनानां विवाहकरणाय सबलं समाह्वानेनोद्वेल्लितहृदयोऽपि कथङ्कथङ्कारं वारं वारं निवारयन्नात्रयोदश-वर्षाद्धृषीकेशहरिद्वारलक्ष्मणवनवृन्दावनवाराणसीप्रभृतीनि विद्यास्थानानि सम्प्राप्य लब्धविशेष वृत्तिकः प्रदत्तासु सर्वासु रीक्षासु लब्धविशिष्टयोग्यताको नव्यव्याकरणनव्यन्यायसाहित्यसाङ्ख्ययोगपुराणेतिहासज्योतिषशाङ्कर-वेदान्तविषयेषु सप्रथमश्रेणि-प्राप्ताचार्यपदवीको लब्धानेकस्वर्णपदको वाराणसीस्थकेशरसंस्कृतविद्यालयवेदवेदाङ्गसंस्कृतमहाविद्यालयार्जुनायु-र्वेदमहाविद्यालयकलेज-प्रभृतिशैक्षिकनिकायेष्वध्यापयन् बहुवारं प्राचार्यपदेऽपि विराजमान आसीत्। तत्रैव निवसतोऽस्य पुरतः त्रिविधच्छात्रसङ्घस्य समाहार तः प्राप्तैकशाखस्य निर्वाचने प्राप्तविजयपताको वर्षद्वयमध्यक्षपदमलञ्चकार। शास्त्रार्थवादविवादसम्भाषणप्रवचनप्रभृतिप्रतियोगितासु विचक्षणतया समधिगतप्रथमस्थानकोऽयं लोकैरिहापि वारं वारमनुरुध्यमानोऽपि वैवाहिकबन्धने सहजतया नायातः। परं वयसस्त्रयस्त्रिंशतितमे वर्षेऽध्ययनस्यापि निश्चितसीमायामधिगतायां नेपालस्य पूर्वाञ्चले विराटनगरनिवासिनः काश्यपवत्सनैध्रुवेति त्रिप्रवरयुतस्यात्रिसगोत्रपण्डितस्य श्रीमद्रत्नकुमारगौतमस्य तदीयभार्यायाः श्रीमत्या जानुकीदेव्याः कुक्षिजाय कोइरालापरिवारस्य भागीनेय्याः शीलवत्या कन्यारत्नाया रमाकुमार्या पाणिं वैदिकविधिनाधिजग्राह।

वाराणसीस्थहिन्दूविश्वविद्यालयस्याचार्यकक्षायामनुसन्धानकर्मरतोऽपि नेपाले दाङस्थजनतामहाविद्यालये प्राचार्यपदं नैकविधेषु विद्यालयेषु प्राचार्यपदञ्चालङ्कुर्वतानेन न जाने कति वर्षाणि सहधर्मिण्या सहैव रमया व्यतीतानि परं सन्तानाभावात्पुनर्द्वितीयविवाहस्य कृते जनानामनुरोधं निराकुर्वतापि विंशतिवर्षानन्तरं पुनरस्यैव प्रथमविवाहसमुपस्थितसहाध्यायिन-स्तेजप्रसादकाफ्लेमहोदस्यातिशययोग-बलात्स्वकीयज्ज्येष्ठभ्रातुः पञ्चप्रवरयु-तसावर्णिसगोत्रस्य श्रीमद्यज्ञप्रसादकाफ्ले-महाभागस्य तदीयभार्यायाः श्रीमतिसुशीलादेव्या तृतीयपुत्र्या पर्वतपुत्र्या पार्वत्या सह शिवेनेव द्वितीयविवाहबन्धनता स्वीकृता। सफलकुक्षिकायास्तस्या विलसन्ति पठनपाठनचतुराश्चत्वारः सुपुत्रसुपुत्र्यो हीदानीं योग्यतमकुटुम्बकुलविवाहिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालामेरिकाक्यानाडादिदेशेषु प्रविचरन्ति ससन्तानवितानं परमेक एवामेरिकायां पठनविवशः प्राप्तडीभीकोऽविवाहितः कनिष्ठपुत्रो लसति कुमारो मारवदधुनापि।

भारतदेशस्योत्तरप्रदेशस्थेषु संस्कृतमहाविद्यालयेषु हरिद्वारहृषीकेशादिस्थेषु विशेषतः गोरक्षनाथसंस्कृतविद्यापीठे प्राचार्यपदमलङ्कुर्वतानेन तत्रस्थसं-स्कृताध्यापकसङ्घस्याध्यक्षतामपि स्वीकृतं किल । पुनरसौ तत्रत्यायाः संस्कृतरक्षासमितेश्चाध्यक्षपदमप्यलञ्चकार । अस्मादेवात्राध्यापनकालाद् विद्यावारिधिमहाविद्यावारिधिशोधानुसन्धानरतैर्बहुभिश्छात्रैर्भारतनेपालदेशी-यैर्विविधविश्वविद्यालयीयैः सश्रद्धं सनामाङ्कनमस्यैव विदुषो निर्देशकत्वेमहान् विद्यापारावारः समुत्तीर्णः । भारतवर्षोत्तरप्रदेशसर्वकारतो लब्धातिविशिष्टपुर-ष्कारसम्मानो विराटनगरदाङगण्डकूटचितवनप्रभृतिषु स्थलेषु लब्धभूमिको नारायणगढक्षेत्रे विनिर्मितातिविशालावासोऽप्यसौ सम्प्रति बूढानीलकण्ठनगर-पालिकायां चिकित्सालययातायातादिसकलसौविध्यसम्पन्ने स्थले क्रीतविशालशोभनहर्म्यो भारतवर्षराज्योत्तरप्रदेशसर्वकारोपलब्धनिवृत्ति-भरणनिर्व्यूढजीवनवृत्तो रमापार्वतीभ्यां पत्नीभ्यां सुसुखमन्वहं निवसति ।

आचार्योपाध्यायस्य ढुङ्गेलमहोदयस्य संस्कृतवाङ्मयोपरि-विद्यमानामसाधारणोद्भटयोग्यतां संस्कृतवाङ्मयसेवां समर्पणनिष्ठाञ्च प्रविभाव्य नैपालकविद्वद्वर्गस्य ध्यानाकृष्टिर्जाता । तदीयव्यक्तित्वस्य समुचितमूल्याङ्कनञ्च विधाय शिक्षामन्त्रिणो माननीयस्यामोदप्रसादोपाध्यायस्य परामर्शेस्वर्गवासीनेपालनरेशः पञ्चश्रीकवीरेन्द्रवीरविक्रमशाहदेवस्तदानीन्तन-महेन्द्रसंस्कृतविश्वविद्यालयस्य (साम्प्रतिकनेपाल-संस्कृतविश्वविद्यालयस्य) कुलपतित्वेनामुं विद्वद्धौरेयमुपकुलपतिपदे चतुर्वर्षं यावत् (२०५७-२०६१) नियुक्तवान् खलु। इतः पूर्वं वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयेनायं जनः मानार्थविद्यावाचस्पतिरित्याख्येन 'डाक्टर अफ लिटरेचर (डी.लिट.), इत्युपाधिना च समलङ्कृतः किल । विद्वच्चक्रचूडामणीत्युपाधिनाप्ययं हिन्दूमहासभाख्यप्रथितसंस्थानेन भारतवर्षस्थेन सम्मानितः किल । नेपालदेशस्थप्रसिद्धतरपत्रिकया 'अन्तरराष्ट्रियमञ्च'- इत्याख्यया कृतेन सर्वेक्षणकर्मणाप्ययं जनश्शताब्दिचर्चितनैपालकविद्वत्पुरुषकोटौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मूल्याङ्कनविधानपुरःसरं राष्ट्रियव्यक्तित्वस्य प्रतिष्ठायामप्यधिष्ठापितः । आचार्यस्य पूर्णचन्द्रमहोदयस्य वैदुष्यमहोदधिं निभाल्य प्रभाविताभिर्नेपालभार-तस्थाभिराध्यात्मिकधार्मिकसामाजिकराजनीतिकशैक्षिकबौद्धिकादिविविध-क्षेत्रसम्बद्धाभिः सङ्घसंस्थाभिर्नैकवारमभिनन्दनं कृतम् ।

तदसौ विद्वत्तल्लजश्छात्रावस्थात एव गद्यपद्यप्रणयनमौलिकरचना-रचनपटुरासीत् । विलसन्त्यधीयन्ते चाद्यापि कवितारत्नानि तद्रचिताश्चानेके पद्यमयगद्यमयलेखा नेपालीसंस्कृतहिन्दीभाषामयाः स्वतन्त्रलेखभूमिकाः शुभकामनाशीर्वचनमन्तव्यप्रचुराः प्रख्याततमविविधपत्रपत्रिकास्म... स्मृतिग्रन्थप्रभृतिव्यक्तित्वप्रकाशनपरकग्रन्थेषुपरन्त्वेतेषां सङ्कलनाभावादधुनापि ते विकीर्णतयैवोल्लसन्त्युताहो नामशेषमात्रा विषादप्रदायकाश्च किल । परिणामतयास्य सकासं नेपालीसंस्कृतहिन्दीविद्याभाण्डागारे विद्वज्जनपुरः सरञ्च समुपहर्तुं नास्ति किमपि ग्रन्थाकारपुस्तकमिदानीन्तनम् । अस्माद्धेतोः पञ्चविंशत्यधिकवर्षपूर्वमेव मङ्गलाचरणादिकं विलिख्य प्रारब्धो नीलकण्ठमहाकाव्यलेखनप्रयासो मध्ये मध्ये लब्धावसरे पल्लवितः पुष्पितश्च सन्नधुना अष्टाविंशतितमसर्गयुतः पूर्णतां प्राप्तः प्राकाश्यतामानीयत इति शुभसमाचारं श्रुत्वा मे मनोमयूरो वर्षर्तुमप्यप्रतीक्ष्यैव नरीनृत्यति किल ।

लोकपरम्परया प्राप्तसंवादाः कथासूत्राणि च वेदेषूपलभ्यन्ते, तेषु यमयम्यूर्वशीपुरुरवोऽगस्त्य-लोपामुद्रेन्द्रादितीन्द्रेन्द्राणीसम्बद्धाः संवादाः प्रसिद्धा एव । अथ च भूमिसूक्तसूर्यसूक्तोषःसूक्तप्रभृतीनि बहूनि सूक्तिरत्नानि काव्यसाहित्यस्य पूर्वरूपं परम्पराञ्च वितन्वन्ति । अन्ये चानेके सन्ति स्वरूपाणि वेदवाङ्मयेषु काव्यकरणतायाः परं सूक्ष्मेक्षिकानिरीक्षणस्यावश्यकता दरी-दृश्यते किल । महर्षिर्हि वाल्मीकिः स्वविरचितस्य रामायणनामकमहाकाव्यस्य कारणेन संस्कृतकाव्यप्रणयने प्रथमो महाकविः संस्कृतस्यादिकविश्च सञ्जातः, उपमहाकविस्त्वद्यावधि व्यासस्तदीयमहाकाव्यञ्च महाभारतमेव द्वितीयं महाकाव्यं मनुते विद्वद्वर्गः । इमे महाकाव्ये लौकिकजगति न खलु महाकाव्यसिद्धान्तान्तर्गतत्वेन विविच्यन्ते परं महाकाव्यकारास्तु कालिदासाश्व-घोषभारविमाघभवभूतिश्रीहर्षादय एव सन्ति । तेषां महाकाव्यसंसारं विलोक्यैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तल्लक्षणं महाकविना दण्डिनोद्घुष्टम्-

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥
इतिहासकथोद्भूतमितराद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥
नगरार्णवशैलर्तुचन्द्रसूर्यादिवर्णनैः ।
अलङ्कृतमसङ्क्षिप्तं रसभावनिन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः ॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ॥
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति ॥

महाकाव्यलक्षणमिदमनुसृत्य काव्यप्रणयनपरा बभुवुश्च महाकवयो बहवो भारतवर्षे नैकविधा राज्याश्रिताः स्वतन्त्राश्च जाता यैश्चारचितानि नैकप्रकारकाणि महाकाव्यानि । सा च महाकाव्यप्रणयनपरम्परेदानीमपि दृष्टिपथायते किल ।

नेपालावनिपालानां विभिन्नसमयसञ्जातभूभुजां सभामण्डितैरमण्डितैश्च पण्डितैः काले काले संस्कृतभाषानिबद्धानि महाकाव्यानि रचितानि तेषु महाकवीषु मध्ये वंशमणिशर्मणो हरिकेलिमहाकाव्यम् (रचनाकालः-१६७०, प्रकाशनम्-२०५१), काशीनाथशर्मणो यदुवंशमहाकाव्यम् (लेखनसमयः-१६७५), यज्ञदत्तशर्म (कोइराला) सूरिणः चन्द्रसम्भवमहाकाव्यम् (लेखनसमयः- २०० वर्षपूर्वम्, प्रकाशनम्- २०५८), सुकृतिदत्तपन्तस्य कार्तवीर्योदयमहाकाव्यम् (रचना- १९२८, प्रकाशनम्-२०५१), पूर्णप्रसादब्राह्मणस्य सत्यहरिश्चन्द्रमहाकाव्यम् (२०१७), भरतराजशर्ममन्थलीयस्य महेन्द्रोदयमहाकाव्यम् (२०१७), हरिप्रसादाचार्यस्य गोरक्षशाहवंशमहाकाव्यम् (२०२२), कृष्णप्रसादघिमिरे-महोदयस्य श्रीकृष्णचरितामृत (२०२८) ययातिचरित (२०२९) नाचिकेतस (२०३१) वृत्रवध (अ.प्र.) गौरीगिरीश (२०४४) नामधेयानि पञ्चमहाकाव्यानि, झोपाह्वपशुपतेर्नेपालसाम्राज्योदयमहाकाव्यम् (२०३७), भीमकान्तपन्थिनो जगदम्बिकावैभवजगदीश्वरवैभवमित्याख्यं महाकाव्यद्वयम्, माधवभट्टराईमहोदयस्य सत्यसाईचरित-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकाव्यम् (२०५८), अर्यालोपाह्वविष्णुराजात्रेयस्य हनूमदयनमहाकाव्यम् (२०७५) चेति दृश्यन्ते संस्कृतमहाकाव्यानि । एवञ्च वेणीमाधवढकालस्य पृथुलतराकारस्य पृथूदयमहाकाव्यस्य त्रिण्येव सर्गरत्नानि प्रकाशितानि । अप्रकाशितमहाकाव्यमध्ये दिवङ्गतस्य ठाकुरप्रसादाचार्यस्य शिवलहरी-महाकाव्यम्, माधवप्रसादबरालस्य मागधविजयमहाकाव्यञ्च विशेषरूपेण चर्चाप्राकारे सन्ति । इमानि सर्वाण्यपि महाकाव्यानि सर्वैरपि महाकाव्यकारैः प्रायो रामायणस्य महाभारतस्य वोपजीव्यतामधिकृत्यैव रचितानि भवेयुरिति । नेपालेऽन्येषामार्यभाषाकलितानां महाकाव्यानां सङ्ख्या त्रिंशदधिकं प्राप्तेव विलोक्यते ।

एतेषां संस्कृतमहाकाव्यानां पङ्क्तौ प्रथितयशसामाचार्यपूर्णचन्द्रोपाध्यायढुङ्गेल-महोदयानां सद्यः प्रकाश्यमानं प्रसिद्धपौराणिकसमुद्रमन्थनप्राप्तोत्कटविषपानवि षयावलम्बितविषयवस्तुविद्योतकं शश्वत्सृष्टिस्थितिध्वंसविधानानुग्रहरूप-पञ्चविधकृत्येन भासमानं विहितभगवच्छङ्करनतिरूपमङ्गलाचरणात्मकं श्रीनीलकण्ठमहाकाव्यं स्वजीवनोद्योतनपुरःसरं प्रणीतं सकलवैदग्ध्योल्लसितं कीदृगिति तु लब्धावलोकनपठनपश्चादेव कथयितुं वा समीक्षितुं शक्यते विपश्चिद्भिस्तथापि विद्वद्धौरेयस्य दीर्घजीवनस्यानुभवजनितकाव्यामृतनिः-ष्यन्दसमान्वितं महाकाव्यमेतद् बृहदाकारं निःशङ्कं प्रसादादिगुणशालिरसाल-ङ्काराध्वनिभिरुल्लसितं स्यादिति कोऽनुमानं न कुर्यात् ?

अन्ततो गत्वा अस्माकमभिभावककल्पस्य परमादरणीयगुरुवर्यस्य प्रख्याततरनेपालदेशीयविद्वद्भास्करस्य नवतिवर्षकल्पस्य महाकाव्यकर्तुः सुस्वास्थ्यदीर्घायुष्यं महाकाव्यस्य कालजयिप्रख्यातिञ्च कामयमानोऽहम-स्मिन्नवसरेऽत्रभवते शुभकामनाकुसुमावलीं वितरन्नेव विरमामि । श्रीरस्तु प्रसीदतु च भगवान् भूतनाथो दयालुर्नीलकण्ठो नीलकण्ठेनानेन महाकाव्ये-नानिशं कुर्याच्च शमिति प्रार्थये ।ॐ ।

२०७७/०६/३०

९८४५१५४३५७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवस्य नीलकण्ठत्वप्रख्यापकं श्रीनीलकण्ठमहाकाव्यम्

डा. जीवन अधिकारी

१. उपक्रमः

संस्कृतभारती तादृशी वर्तते या च कामधेनुरिव स्वयं काव्यरसास्वादमयं सुस्वादु पयः स्रवन्ती किल भावुकान् काव्यरसिकाञ्जनान् तथा प्रेरयति यया च प्रेरणया ते स्वकीयभावनाया वर्णनार्थं समुत्का जायन्ते तस्यामेव सुरभारत्याम्। परिणामतश्च कालिदासप्रमुखाः कवयः संस्कृते काव्यनाटकादीनि नैकविधानि मौलिककृतिजातानि विरचितवन्तोऽमरतामधिरूढा आकल्पान्तम् । तत्र न केवलं भारतीयैरपि तु नैपालैरपि कविभिर्वंशमणिकाशिनाथसुकृतिदत्त-प्रभृतिभिः संस्कृतगिरा भगवतो लीलाविस्तारादि-विविधविषयसंवलितानि पुराणेतिहासस्रोतोमूलानि खण्डकाव्यमहाकाव्यनाटकादीनि प्रणीतानि । एतेन च कर्मणा संस्कृतकाव्यरचनापरम्परायां भारतीयसंस्कृतकवीनां समानान्तररूपेण नैपालसंस्कृतकाव्यकाराणां योगदानमपि विद्वद्गणगण्यं सम्पन्नमस्तीति समेषामस्माकं कृते मोदावहो विषयः । तत्र पङ्क्तौ सम्प्रति बृहत्तरं देवाधिदेवश्रीनीलकण्ठाभिधं महाकाव्यं प्रणीय वार्धक्यबाधिते द्व्यशीतिवर्षात्मके वयस्यपि युवत्वं काव्यप्रणयनपाटवप्रकाशनविधौ विराजन्तआचार्यपूर्णचन्द्रढुङ्गेलमहाभागाः षट्शास्त्राचार्याविद्यावाचस्पतयश्चेति समुल्लेखनेऽपि मोमुद्यतेऽतितरां चेतः। सन्दर्भोऽयं नेपालस्य यशोवृद्धिदृशा सर्वथा सम्मान्यो मान्यमानितश्च विभाति। साम्प्रतं प्रकाशनस्य पूर्वसज्जीकरणसरणौ वर्तमानमिदं महाकाव्यमन्तिमशुद्धिपरीक्षणार्थं सङ्गणकयन्त्रतो मुद्रयित्वा प्रकाशनसंस्थया मत्पार्श्वप्रेषितं सत् दृष्टिपथावतीर्णं पुनरपि जातमिति महाकाव्यकाराणां श्रीमतां ढुङ्गेलगुरुचरणानामाग्रहस्य परिपूर्तिनिमित्तकं समीक्षात्मकालेखलेखनप्रयोजनकं किमप्युल्लेखं कर्तुमुद्यतोऽहं मनुवंशवर्णने स्वल्पनौकया समुद्रसन्तरणोद्यतस्य महाकवेः कालिदासस्येवासमञ्जसमयीं स्थितिमनुभवन् प्रस्तुवन्नस्मि सोपक्रमं किमपि वाग्विलासमात्रम्।

२. नीलकण्ठमहाकाव्यस्य कथावस्तु

महाकाव्यस्य नामत एव बुद्धौ समारूढं भवति यदस्य महाकाव्यस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कथा शिवचरित्रमाधृता विद्यते। शिवचरित्रं हि वैदिकवाङ्मयमारभ्य विशेषतः पुराणप्रसिद्धं समधिगम्यते। पुराणेषु प्रायेण सर्वेष्वपि शिवचरित्रं व्याप्तमस्ति। कुत्रचिद् विष्णोः प्राधान्ये समुपस्थापिते तदङ्गतया क्वचिच्च देव्याः प्रधानतायां प्रकाशितायां तदवयवरूपेण क्वचिच्च प्रकारान्तरेण वा शिवस्य महिमा यत्र तत्र वर्णितो दृश्यते। पुराणेष्वपि शिवमहापुराणं हि मुख्यतया शिवस्य समग्रचरितस्य प्रकाशकं पुराणं विद्यते यच्च महाकाव्यस्यास्य कथाया मूलं विभाति। समुद्रमथनं ततो हालाहलमहाविषोत्पत्तिस्तेन चाग्नितुल्येन संसारस्य दग्धावस्था सृष्टेर्लोकस्य च संरक्षणार्थं कारुण्यपूर्णेन शिवेन कृतं विषपानं ततो नीलकण्ठत्वाधिगमो महादेवत्वप्रतिष्ठा चेति घटना यात्र वर्णिता सा मूलतः शिवपुराणाद् गृहीतेव प्रतीयते। तदधिकतयात्र महाकाव्ये भूकम्पवारिप्लवादेः दैवविप्लवस्य विश्युद्धादेर्मानवीयविकारादेश्च वर्णनं यथावसरं यत् कृतं लभ्यते तदपि शिवप्रभावस्य द्योतकं परिकल्पनीयं यस्याञ्चावस्थायां तदीयस्तवनेन शान्तिरधिगता जनानां समुद्धारश्च सञ्जात इति द्योतनायैव समुपस्थापितमिति विज्ञेयम्। एवञ्च महाकाव्यस्यास्य कथाया मूलं स्रोतः पुराणमिति वक्तुं शक्यते। तत्र वैदिकवाङ्मयतोऽपि विषया गृहीता इति नहि विस्मरणीयम्।

३. नीलकण्ठमहाकाव्ये वस्तुविन्यासशैली

नीलकण्ठाख्यमदिं महाकाव्यं मूलतो भगवतो नीलकण्ठत्वाप्तिविषयकं विद्यते। केन्द्रे च नायकत्वेन साक्षाद् भगवान् शिवः स्थापितः। शिवचरितस्य परिधावेव महाकाव्येऽस्मिन् कथा विन्यस्तास्ति। यत्र क्वचन विगतकालिका द्वितीयविश्वयुद्धभूकम्पादिसम्बद्धा साम्प्रतिकराजनीतिसम्बद्धा वा या घटना अत्र वर्णितास्ताश्च सामान्यतो विलोकने शिवचरितभिन्नाः प्रतिभान्ति तथापि काव्येऽस्मिन् तदङ्गतया निबद्धाः सन्ति। तत्र कथञ्चन समन्वयोऽन्वेषणीयः। तदतिरिक्ताः सर्वा अपि घटनाः शिवचरितानुस्यूता विभान्ति। तदत्र संक्षेपेण विचार्यते।

महाकाव्यस्य प्रथमे सर्गे विविधदेवानां स्तुतिपरं मङ्गलाचरणं कविना कृतमस्ति। तत्र क्रमे द्वितीये पद्ये पुनश्चैकविंशतितमे पद्ये च शिवस्य स्तुतिर्विहिता लभ्यते। द्वितीये सर्गे समग्रतया शर्वस्वरूपायाः पृथिव्या वर्णनं प्राप्यते। तृतीये सर्गे शर्वस्य महीं प्रति ममतातिशयः प्रकाशितः। चतुर्थ–पञ्चम–षष्ठसर्गेषु पृथ्वीसहितानां पञ्चमहाभूतानां महिमा गीतोऽस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तमे सर्गे शिवस्य यज्ञ-सूर्य-सोमादिविविधस्वरूपस्य सम्यग्वर्णनं समुपलभ्यते । तत्र क्रमे यज्ञमहिमोपस्थापनसन्दर्भ आदौ श्लोकचतुष्टयेन शिवप्रभावातिशयः समुपस्थापितः । यथा तत्रत्यं पद्यमेकम्-

यज्ञस्रष्टा पशुपतिरादौ काले
रक्षाकर्ता स च समेषां प्राक् ।
पाश्चात्याश्चात्र यजनकर्मादौ
सँल्लीना दानतपःशुद्धेऽमूल्ये ॥४॥

एवमेवाष्टमेऽपि सर्गे प्रारम्भ एव शिवमहिमा प्रकाशितोऽस्ति । यथा-

भवः कल्याणार्थं निखिलजगतां जीवनवपु-
र्भवादौ सञ्जातो जलमयवपुः स्वीयकृपया ।
सुलब्धं दीर्घायुः सकलसुरदैत्यादिमनुजै-
स्तथा जीवैः सर्वैः सकलसचराचारनिवहैः ॥१॥

स्वयं संहर्ताऽसौ भवगिरिशनामादिसहितो
हरत्येवैतद् द्राग् बहुविधजगज्जालसकलम् ।
न केऽप्यत्र श्रेष्ठा हरणनिजकृत्यस्य दलने
समक्षं तस्यैतेऽनुचरसदृशा भान्ति त्रिदशाः ॥२॥

यदा रुष्टो रुद्रः सपदि सकलं हर्तुमभितः
प्रवृत्तः कस्याऽपि प्रतिविधिकृतौ न प्रबलता ।
अतो हेतोर्नित्यं ह्रसति हि जगज्जालमशुभं
समे तस्य श्रैष्ठ्यं सनति-निजशीर्षेण गृणते ॥३॥

अत्रैव सर्गे युद्धदुःखवर्णनमपि कविना निजानुभवप्रकाशनार्थं विहितं लभ्यते । रुद्रस्य क्रोधादेव तथा युद्धं जातं तत्र च महान् नरसंहारो जातः । ततः पलायिता अपि जना मार्गे रोगखाद्याभावादिकारणेन कालकवलिता जाताः । बीभत्सता च तादृश्यां स्थितौ विलोकिता ।

नवमे सर्गे भूकम्पप्रभावस्य वर्णनं विधाय कविः पुनर्दशमे सर्गे भगवन्तं शिवं पद्यत्रयेण(४१,४२,४७) स्मरति । यथा-

याथार्थ्यमस्ति स खलूत्तमदेवदेवः
कर्तुं विकर्तुमुत चाऽन्यथया कृतौ प्राङ् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवाऽधिदेव-शिव-धूर्जटिनामवर्ण्यः
शक्तः समर्थ इति तत्त्वविदां प्रघोषः ॥४१॥

तच्छ्रद्धया लिखितमत्र यथार्थवस्तु
जालेषु हानिविविधेषु यथार्थरूपम्।
संवर्णितं विबुधसंसदि किञ्चिदत्र
तत्केवलं शिवसुभक्तिविदां समक्षम् ॥४२॥

प्रकम्पाघाताद् वै विचलितजना आश्रयगताः
समस्ता भौतिक्यो न सुसमविता नष्टगतिकाः।
प्रदृश्यन्ते ते ते धनसुतमलीनाऽऽकृतियुताः
समस्तानां तेषां सततमवकः शङ्करगुरुः ॥४७॥

एवं मूलकथायाः परामर्शनक्रम एकादशे सर्गे पद्यद्वयेन मूलकथायाः परामर्शो विहितो दृश्यते। यथा–

यद्यद्धि किञ्चिदपि कुत्रचिदुग्रकृत्यं
जात्वत्र निर्दयतया क्रियतेऽतिमात्रम्।
लोकाः सदैव दहने विकटे निमग्ना
जानन्ति भस्मबहुलेन विशुद्धरुद्रम् ॥३२॥

विश्वस्य काननशतानि विभिन्नकाले
दावा नयन्ति नितरां भसितस्वरूपम्।
ग्रामाग्निना च शतशो गृहजालकानि
भस्मीभवन्ति नितरां प्रतिवर्षमेव ॥३३॥

पुनश्च पद्येनैकेनात्रैव शिवस्मरणं कृतमुपलभ्यते यत्र च सकलस्यापि विश्वस्य शिवरूपता समुपस्थापिता। यथा–

देवाधिदेवशिवरूपमिदं विचित्रं
विश्वस्य सर्वविधसौख्यकरं बहुत्रम्।
संहारकञ्च सकलस्य चराचरस्य
द्वैविध्यमस्य विबुधस्य विचित्ररूपम् ॥४०॥

एवंप्रकारेण द्वादश-त्रयोदशसर्गयोः समुद्रमथनस्य कथा प्रकाशिता।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र प्रथमं महाविषस्योत्पत्तिकथा समायाति। विषोत्पत्त्या च सर्वमपि जगद् भीतभीतं दाहकेन तेन प्लुष्टमिति सविस्तरं वर्णितमस्ति। सर्वत्र भयव्याप्तिस्त्राहि त्राहीति शब्दश्रुतिरुपस्थापिता। विषस्य शमनाय विष्णवादिदेवानामसामर्थ्यं प्रकाश्य तैर्विषशान्तये भगवान् शिवः प्रार्थित इत्यपि वर्णनमत्र विहितमस्ति।

चतुर्दशसर्गे महाकाव्यसस्य मूलकथायाश्चरमोत्कर्षता दृश्यते। येन कारणेन भगवता शिवेन नीलकण्ठताधिगता तस्य वर्णनमत्र कविना मनोहररूपेण कृतमुपलभ्यते। सर्गादावेव विषतः पीडितस्य जगतोऽवस्थां विलोक्य करुणानिधिर्भगवान् शिवः सातिशयं दुःखित इत्युपस्थापितमस्ति। यथा–

विषस्य वेगेन विमूर्च्छितान् सुरान्
सजीवसंघानसुरान् समन्ततः।
समीक्ष्य तस्मिन् सरितांपतेर्मथे
सुदुःखितोऽभूद् भगवान् गिरीशः ॥१॥

करुणावता भगवता शनैः शनैर्विषस्य पानाय दृढता स्वीकृता। कारुण्यमयेन शरीरेण न तथा कठोरस्य महच्छत्रुरूपस्य महाविषस्य पानं सम्भवमिति विचार्य किमु भगवता स्वकीया करुणामूर्तिः परिवर्तिता वर्तत इति कविना समुपस्थापितम्। यथा–

विचार्य देवाधिपतिर्महेश्वरो
जगत्स्थितिं हीदृशमन्तरात्मना।
कृपापरस्त्राणसहेऽत्र कर्मणि
सुसज्जितो भीषणरूपधारणात् ॥१७॥

पदद्वयास्फालनरौद्रमुद्रया
समस्तदेहस्य दृढीकरिष्यता।
विचित्रयोगेन समन्वितः प्रभु–
स्तदाऽभवद्दर्शकभीतिदायकः ॥१८॥

भीषणस्य शमनं भीषणेनैव रूपेण कर्तव्यमिति भगवता चिन्तितं किमिति कवेस्तर्कोऽत्र काव्यरसमपि पुष्णाति। ततश्च भगवान् शिवः करावञ्जलिपुटरूपौ विधाय पानार्थं तद्विषं हेलया गृह्णाति–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरन्तरानन्दयुतः स्वके क्रमे
विशृङ्खलं व्याप्तविषं विनाशितुम्।
द्विहस्तसंयोजनजन्यसम्पुटान्
मनोज्ञनैजाञ्जालिनाऽग्रहीद्विषम् ॥५४॥

तदनन्तरञ्च दीनमुखाँल्लोकान् सुरासुराँश्च विलोक्य करुणयाभिभूते शिवमनसि विषपानोत्साहो जागर्ति–

विलोक्य सर्वत्र मुमोह धूर्जटिः
पश्चात्ततोऽसौ श्रुतिसूक्तसम्मताम्।
प्रकृष्टशक्तिं समदर्शयत्प्रभु–
र्विषस्य तीव्रस्य विनाशनेऽलगत् ॥५६॥

सम्पूर्णतयोत्साहयुतः सन् विषं पिबति रुद्ररूपो भगवान् शिवः। तच्च कर्म कविनेत्थमुपवर्णितम्–

विषं प्रचण्डं प्रतिगृह्य पाणिना
प्रसह्य पातुं स विचक्रमे स्वभुः।
सुतीव्रवेगीव समुद्रनिम्नतः
समुत्पतत्तद्गरमाशितुं दृढः ॥५७॥

देवाधिदेवेन कृतं विचित्रक–
मलौकिकं कार्यनिधिं समीक्षकाः।
विमूर्च्छिता रौद्रविषाग्निपीडिताः
समे जना अद्भुतदृश्यतानिताः ॥५८॥

अत्र पश्चपद्ये भगवतः कार्यमिदमद्भुतं जातं तद्विलोक्य च सर्वे लोकास्तत्र समाकृष्टा इति यदुपस्थापितं तत एव विषपानं भगवता कृतमिति विज्ञायते। स्पष्टतया विषपानस्य वार्ता तु पञ्चदशसर्गस्यैकादशे द्विपञ्चाशत्तमे च पद्ये समायाति–

स पातुमैच्छत् सकलं विषानलं
सुदुःसहं घोर करालमृत्युदम्।
न तत्र कोऽपि प्रबभूव बाधको
महेश्वरो मौनरतः पपौ विषम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्तरं तत्क्षण एव शङ्करः
समस्तजीवाद्यवने दृढव्रतः ।
कारुण्यपूर्णो लघु कालकूटकं
नियन्तुकामो बुभुजेऽमृतं यथा ॥५२॥

विषपानोत्तरञ्च शिवस्य कण्ठे नीलत्वं समुत्पद्यते-

सुपीतघोरस्य विषस्य कारणा-
दहो उमेशस्य गलोऽतिनीलकः ।
प्रजात आश्चर्यमिदं त्रिलोकिनां
समस्तसामर्थ्ययुतेन तेन वै ॥६०॥

अत्र च सर्गेशिवस्याद्भुतविषपानरूपकर्मणः ततश्च समुद्भूतकण्ठगतनीलत्वस्य संरक्षणपरता शिवस्य सविस्तरं वर्णिता प्राप्यते ।

षोडशसर्गादारभ्य काव्यस्यासमाप्ति विषपानोत्तरकालस्यावस्थितेर्वर्णनपुरस्सरं विविधभूतदेवाप्सरआदिकृताया शिवस्य विषपानरूपाद्भुतस्य कर्मणः प्रशंसनेन साकं शिवस्तुतिर्देवाधिदेवत्वाप्तिप्रकाशनेन सहैव विहितास्ति । काव्यान्ते च श्रीपशुपतिनाथस्य महत्त्वं नेपालस्य गौरवञ्च प्रकाश्य महाकाव्यमिदं पूर्णतां नीतं कविना पूर्णचन्द्रेण । एवञ्च विलोकितेऽत्र महाकाव्ये कथावस्तुविन्यासः सम्यक्तया विहितो दृश्यते ।

४. नीलकण्ठमहाकाव्यस्य महाकाव्यत्वम्

महाकाव्यस्य स्वरूपविषये जानन्त्येव साहित्यमर्मज्ञाः सहृदया इति समग्रतया नात्र वितन्यते । संक्षेपेण तु तत्र किञ्चिद् वक्तव्यं भवति । अत्र महाकाव्ये साक्षाद् भागवान् शिव एव नायकत्वेन प्रतिष्ठापितो दृश्यते । अलौकिकं जगद्रक्षणपरं चरितं तदीयमत्र शोभते । अतश्चासौ धीरोदात्तप्रकृतिको दैवीसम्पत्सम्पन्नोऽलौकिको नायक इति वेद्यम् । नायं लौकिकः पुरुषः परं विषमप्यमृतवत् पातुं समर्थो देवाधिदेवो महादेव इति नहि तस्य मानवीया स्थितिरित्यलौकित्वे हेतुः । नायिका च साक्षाद् भगवती शिवा शक्तिरूपा परिकल्पनीया । तस्याश्च स्मरणं कविनात्र महाकाव्ये वारद्वयं (१/३, २७/९५) कृतमुपलभ्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवचरितोपस्थापनप्राधान्यत्तद्गता कविहृदयस्था रतिरेवात्र प्रधानभावरूपेति देवादिविषयकरतिभावस्य प्राधान्येनाभिव्यक्तिरत्र पार्यन्तिका-स्वादविषयतामधिरूढा प्रतीतिपथमवतरति । अतश्चाप्रबन्धव्यापितया प्रारम्भे मध्ये चान्ते च शिवचरितस्य प्रतिपादनाद् भावध्वनिरस्य महाकाव्यस्य प्रधानरससमकक्षित्वेन प्रबन्धरसपदवीं समधिगच्छतीति बोध्यम्। वीर–करुण–शृङ्गार–बीभत्स–भयानकादयो रसा अत्र देवादिविषयकरतिभावस्याङ्गभूता विज्ञेयाः । प्रकृतेर्वर्णनमत्र पञ्चमहाभूतविप्लवजनिदुःखावस्थायाः प्रकाशनाङ्गतया विहितं प्रतीयते। सर्गाश्चात्र सप्तविंशतिसंख्यका विलसन्ति। छन्दांस्यपि बहूनि प्रयुक्तानीति छन्दोबाहुल्यं दृश्यते । प्रतिसर्गमन्ते छन्दसः परिवर्तनं क्वचित् क्वचिद् भाविसर्गस्य कथायाः सङ्केतश्चाप्यत्र प्राप्यते । एवंप्रकारेण विलोकिते नीलकण्ठाभिधं काव्यमिदं महाकाव्यत्वेन रघुवंश-यदुवंशादिमहाकाव्यपङ्क्तौ स्थापयितुं शक्यत इति महाकाव्यतास्य सिद्ध्यति।

५. नीलकण्ठमहाकाव्ये रसविधानम्

उपरि निगदितं यदत्र महाकाव्ये भगवन्तं नीलकण्ठं प्रति सातिशयभक्तिप्रदर्शनपरा शिवविषयिणी रतिरेव महाकाव्यकारस्य हृदि विद्यमाना प्रधानभूता। एतच्चात्र काव्ये प्रतिपादितविषयानुसारेण प्रमाणीकरणीयं तत्र तत्र साक्ष्यप्रदानेन। अतश्चात्र विषयोऽयं संक्षेपेणोपस्थाप्यते।

५.१ नीलकण्ठकाव्येऽङ्गी रसः

भावप्राधानमिदं महाकाव्यं बोध्यम् । यतो ह्यत्र शिवविषया रतिः प्रधानभूता । **रतिर्देवादिविषया व्यभिचारी तथाञ्जितः, उद्बुद्धमात्रः स्थायी च भावः प्रोक्तः** इति मम्मटवचनानुसारेण देवादिविषयिण्या रतेर्भावत्वं सिद्धम् । स च भावोऽलक्ष्यक्रमव्यङ्ग्यस्य भेदेष्वन्यतमो गण्यते, गृह्यते च रससमानकोटिकतया साहित्यशास्त्रकारैः– **रसभावतदाभासभावशान्त्यादिरक्रमः**, इति।

भावप्राधान्ये साक्ष्यभूता विषया उपस्थाप्यन्ते। प्रथमं त्वत्र भगवान् शङ्करः शङ्करो नायकः। शिवस्य नायकत्वस्थापनेन तद्गता रचनाकारस्य हृदये विद्यमाना रतिः प्रधानभूतेतिस्वतः सिद्धम्। शिवचरितमेवाप्रबन्धव्यापीतितदीयप्राधान्येहेतुः। आप्रबन्धव्यापित्वेन तच्चरितवर्णनं कविहृदयस्थाया शिवभक्त्यतिशयरूपाया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रतेः प्राधान्ये कारणत्वेन ग्राह्यम् । शिवकृतहालाहलपानसन्दर्भे व्यक्तिविषयीभूतो वीरो रसो नायकाश्रित इति भावाङ्गता तस्य सारल्येन सिद्धा । वीररसास्याधारतया च भगवति शङ्करे विद्यमाना जगत्कल्याणभावना तस्या जागरूकतायै तदीयकारुण्यातिशयप्रकाशकं कविकृतं वर्णनं हेतुः । अतश्च शिवकरुणातिशयः वीररसस्य स्थायिभावस्याभिव्यञ्जकत्वे मुख्यं कारणम् । अङ्गत्वेन व्यज्यमानाः करुण-बीभत्स-भयानकादयो रसा अपि शिवविषयकरतिभावस्याङ्गभूताः स्वीकर्तव्या, अन्यथा तेषां वैयर्थ्यापत्तेः । प्रसङ्गान्तरस्योपस्थापनेऽपि मध्ये यथावसरं मूलभूतायाः शिवविषयिण्या रतेः परामर्शः कविना कृतः । उत्कर्षापकर्षौ सम्यङ्निरीक्ष्यैव शिवचरितमवान्तरकथासम्बद्धं समुपवर्णितमिति तत्रापि देवादिविषयारतिर्मुख्या विभाति । अन्यैर्देवैर्विष्णवादिभिः कर्तुमशक्येन विषपानेन कर्मणा शिवस्य देवाधिदेवत्वं महादेवत्वं नीलकण्ठत्वञ्च यज्जगति विख्यातं तदुपस्थापने कविरसौ ढुङ्गेलो गौरवमनुभवन् सश्रद्धं विषयमिमं सविस्तरं सयुक्ति समुपपादयतीति हेतोरपि तद्गतरतेः प्राधान्यमिति सुकरं भावस्यात्र प्रधानताज्ञानम् ।

५.२ नीलकण्ठकाव्येऽङ्गरसाः

प्रधानरसविमर्शनक्रमे प्रस्तुतं यद् वीर-शृङ्गार-करुण-भयानक-बीभत्सादयो रसा अत्र महाकाव्येऽङ्गभूता इति । पुनश्च नेपालमातृगता मातृभूमिविषयिणी रतिरप्यत्राङ्गभूता काव्यान्ते शोभते । प्रधानं तु शिवचरिताश्रितो भावध्वनिरिति चोपरि सङ्केतितम् । सम्प्रति तदङ्गभूतानां रसानां प्रतिरसमुदाहरणप्रदानेन किञ्चित् प्रकाश्यते ।

५.२.१ वीरो रसः

वीररसे स्थायिभाव उत्साहः । अत्र च महाकाव्ये रसरूपेणाभिव्यक्तिस्तस्य शिवकृतविषपानसन्दर्भे दृश्यते । यथा-

विषं प्रचण्डं प्रतिगृह्य पाणिना
प्रसह्य पातुं स विचक्रमे स्वभुः ।
सुतीव्रवेगीव समुद्रनिम्नतः
समुत्पतत्तद्गरमाशितुं दृढः ॥ (१४/५७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५.२.२ शृङ्गारो रसः

महाकाव्यमिदं नहि नायिका–नायकनिष्ठायाः प्रेमास्पदीभूताया रतेर्वर्णनात्मकमिति नात्र शृङ्गारस्य बाहुल्येनाभिव्यक्तिः। क्वचित् सन्दर्भे तस्य सङ्केतः प्राप्यते। तदेवात्र प्रस्तूयते।

पञ्चभूतमध्ये जलस्य वर्णनक्रमे षष्ठसर्गे समुद्रं प्रति गमनशीलानां सरितां प्रवृत्तिरत्र महाकाव्ये समुपस्थापिता दृश्यते। समुद्ररूपेण भर्त्रा मेलनार्थं समुत्सुकानां तासां मानवीकरणेन चरित्रोपस्थापनं विधाय कविना शृङ्गाररसस्य सङ्केतः प्रदत्तोऽस्ति। यथा–

वर्षाकाले सर्वदिगाप्तसरिताः सरित
उद्धता मत्ताऽतितरुण्यः पतिचित्ताः।
आवर्तानां भङ्गिमयुक्ता रतिचिन्ताः
संयोगार्थं सौत्सुक्यादभियान्ति ॥४॥

तीराणां तास्तीव्रतया पातनलग्नाः
कामाशक्ता सङ्गमचित्ताः शतरङ्गाः।
पारावारान् सोत्सुकका वनितेव
प्रव्रजन्ति प्रत्यहमाश्चर्यकरं तत् ॥५॥

प्रथमकृतविवाहाः षोडशाब्दा युवत्यो
जलधरसमयेऽब्धिं चिन्तयन्ती नदीव।
निजगृहगमकाले सोत्प्लुतिं भ्राम्यमाणाः
स्वपतिमिलनहेतोः सोत्सुकास्ताः प्रयान्ति ॥१३॥

५.२.३ करुणो रसः

नीलकण्ठमहाकाव्ये विश्वयुद्धजनितपीडाया वर्णनप्रसङ्गे समुद्रमथनत आदौ ज्वलनभीषणस्य विषस्योत्पत्त्या पीडितानां समस्तजीवानां व्यथायाः प्रस्तुतिसन्दर्भे च प्राप्यते कारुण्यावस्थाया वर्णनमिति शोकस्थयिभूतस्य करुणस्यापि स्थितिस्तत्रैवानुसन्धेया। तत्र प्रथमसन्दर्भात् पद्यमेकमत्र दीयते–

मृतान् मार्गमध्ये स्वबन्धून् विलोक्य
तदा रोदनैराविताश्चाऽन्यसार्थाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चितासञ्चये नष्टसंज्ञाश्च तावत्
कथञ्चित् स्ववंशे दृढं बाधितास्ते ॥६/२१॥

५.२.४ भयानको रसः

भीषकजन्तूनामन्यस्य तादृशस्यैव भयोत्पादकवस्तुन उपस्थित्या मनसि यद् भयं समुत्पद्यते तस्य काव्ये वर्णने भयानकरसत्वं जायते। अत्र च महाकाव्ये युद्धपीडितत्वात् वर्मादेशतः पलायितानां जनानां सम्मुखे विपद्बाहुल्यं स्वत एवासीत् तत्र पुनः सिंहभल्लूकादीनां मार्ग उपस्थित्या भयमपि समुत्पादितमिति तादृशवर्णने भयानको रसः प्रततीतिपथमवतीर्णो दृश्यते। यथा–

महारण्यमध्यस्थिते तत्र मार्गे
वनस्था गजाः सिंहभल्लूकखड्गाः।
कदाचित् स्ववर्गीयखेलप्रसङ्गात्
समागत्य हत्वैव ते यान्ति शीघ्रम् ॥६/२५॥

५.२.५ बीभत्सो रसः

जीवानां मृतशरीरादौ कृमिपातदुर्गन्धपूयक्लिन्नतादिदर्शने या जुगुप्सा जायते ततो रसत्वेनाभिव्यक्तो बीभत्सो रसः। युद्धभयेन पलायिता जनाः कतिपये मार्गे मृतास्तेषां शवाः शृगालादिभिर्भक्षिता इति वर्णनमत्र महाकाव्ये समायाति। तत्र बीभत्सता दृश्यते। यथा–

दिवं यातृनृणां समूहास्तदानीं
शृगालैर्हि काकोलगृध्रैः सशब्दैः।
सृता यत्रतत्रैव व्याप्ताः समन्तात्
तदङ्गान्यखादन् सुखं निर्भयास्ते ॥६/५३॥

विक्लिन्नैस्तदीयैः सदुर्गन्धमांसै–
रनेका रुजो द्राक् समन्तात् प्रसूताः।
विचित्राभिराभिः कुरुग्भिः परीताः
मृता मार्ग एवौषधैर्वर्जिताश्च ॥६/५५॥

६. नीलकण्ठकाव्येऽलङ्कराः

महाकाव्यमिदंशिवभक्तिप्रधानंकाव्यम्।अतश्चकविहृद्गतारतिःकाव्येऽस्मिन्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रायेणसर्वत्रव्याप्ताविलोक्यते। भक्तिभावनयाप्लावितत्वान्नात्रालङ्कारप्रयोगंप्रति कवेरौत्सुक्यं प्रतीतिपथमवतरति तथापि स्वभाविकतया समायाताः केचनालङ्कारा गोचरीभवन्ति । तेषां संक्षिप्तरूपेणोपस्थापनमधः क्रियते ।

६.१ वृत्त्यनुप्रासः

ये सन्ति भीतहृदया विषकम्पमाना-
स्ते ते सशक्ततनवो न कदापि सन्ति ।
कालस्य कालविकरालविषस्य हर्ता
ह्येकोऽस्ति मृत्युभयनाशनकार्यकारी ॥/३/१८॥

अत्र पद्ये तृतीयपादे ककारलकारयोरनेकवारं समानक्रमेणावृत्तिरिति वृत्त्यनुप्रासः ।

६.२ यमकम्

कृष्णावतारसमये भवता मदर्थं
सन्तानतानविभवः कृपया वितीर्णः ।
तेनैव सर्वविषयेषु दृढोऽहमस्मि
सम्पत्तिदेहबलबोधद ईश्वरस्त्वम् ॥१३/३७॥

अत्र पद्ये द्वितीयपादे 'सन्तान-तान' इत्यत्राव्यवहितरूपेण 'तान-तान' इत्यनयोरावृत्तेर्यमकालङ्कारः । यथा वा-

स एकदेवः सकलं कलं हरे-
दसंशयो यस्य निदानकर्मणि ।
सुरासुराः सम्प्रति विघ्निता भृशं
समस्तविघ्नस्य हरो हरः शिवः ॥१४/२१॥

अत्र प्रथमे पादे 'सकलं कलं' इत्यत्र 'कल-कल' इत्यनयोरव्यवधानेनावृत्त्या यमकम् ।

६.३ उपमा

वल्वादिजीवननिवहस्य पोषिका
रक्षापरा च जगतां निरन्तरम् ।
सर्वंसहा स्वजननीव सर्वदा
पृथ्वीदृशी भवति मान्यसर्वदा ॥५/४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्र पद्ये पृथिव्याः सादृश्यं जनन्या सह प्रकाशितमित्युपमालङ्कारः ।

त्यक्त्वा प्रमन्थनकृतिं सकलाः सुरेशा
विष्ण्वादयोऽसुरसुरा द्रुतमत्र विद्धाः ।
जाज्वल्यमानदहनेन यथा मनुष्या
दग्धास्तथैव सुरदैत्यजनाः समन्तात् ॥१३/१०॥

अत्र श्लोके प्रज्ज्वलितेनाग्निना यथा मनुष्या दन्दह्यन्ते तथैव समुद्रमथनजेन विषाग्निना जना दग्धा इति वर्णनादुपमालङ्कारः ।

६.४ उत्प्रेक्षा

उदधिमथने संलग्नास्ते समे मुनिजास्तदा
फलरहितता जाता तत्राऽप्रसन्नतया ध्रुवम् ।
विकृतमतिकाः सर्वे मन्ये परैरफलैः किल
समधिकगुणः सर्वध्येयः शिवः सुतरां स्मृतः ॥१२/३२॥

अत्र समुद्रमथने लग्नाः काश्यपा विषोत्पत्तेः कारणादप्रसन्नाः फलरहिता च जाता इति कारणेन तदधिकगुणं शिवं स्मर्तुं प्रवृत्ताः किलेति परिकल्पनादुत्प्रेक्षालङ्कारः ।

६.५ काव्यलिङ्गम्

ब्रह्मन् गच्छाऽसनसुमहिमा ज्ञाप्यते सर्वलौकैः
सत्येनैव त्वमिह सततं प्राप्स्यसे कीर्तिमिष्टाम्
याथार्थ्येन प्रकथकबुधो नैव लोके विगर्ह्यो
नो चेच्छीघ्रं फलमिह भवेद्दुःखदं कीर्तिनाशम् ॥२७-५॥

अत्र प्रथमपादत्रयगतविषयस्य कृते चतुर्थपादगतं वस्तु हेतुत्वेन विन्यस्तमिति वाक्यपदार्थयो परस्परं हेतुताप्रकाशनात् काव्यलिङ्गमलङ्कारः । यथा वा-

जीवान् सदैव नियतं परिपोषको य-
स्तत्तोयराशिरधुना सकलैर्न मान्यः ।
पीयूषमत्र प्रभवेद्धि विषं कदाचित्
सत्यं हि सम्प्रति जलं विषतुल्यजातम् ॥९-४१॥

अत्र विषोत्पत्तिकारणेन सकलानां कृते मान्यस्तोयराशिरमान्यो जात इति हेतुताया विषयप्रतिपादनात् काव्यलिङ्गमलङ्कारः । यथा च-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलं मधुरशीतलं विविधरस्यपुष्पाणि च
प्रगृह्य सकला अपि प्रचुरस्वाद्यखाद्यं तथा ।
सुदुःखममरास्तथा दितिसुतास्त्यजन्तु स्वकं
मदाप्तिजनितात् सुखाद् भवति दुःखनाशो ध्रुवम् ॥१७/१६॥

६.६ अर्थान्तरन्यासः

एवंविधैर्विविधरूपधरैर्विचित्रै-
राग्नेयताण्डवशतैर्बहुविघ्नितात्मा ।
कोऽप्यत्र मानवबुधो न दयार्द्रदुःखी
सर्वोऽपि तीव्रकरुणः प्रभवेत् सदैव ॥११-४२॥

अत्र पादत्रयगतस्य विशेषस्य समर्थनं चतुर्थपादगतेन सामान्येन कृतमित्यर्थान्तरन्यासालङ्कारः । यथा वा-

गोस्ते वक्त्रं भवतु नितरां दुष्टगन्धेन युक्तं
पूजाकाले मम भवसि भो केतकि त्वं न योग्या ।
कूटे साक्ष्ये सुरभिकुसुमे देवदेवेन शप्ते
मिथ्यावक्तुः परिणतिरियं दुःखदात्री सदैव ॥२६/१०३॥

अत्र पद्ये गोव्यक्तिविषयकस्य केतकीव्यक्तिविषयस्य च विशेषसन्दर्भस्य समर्थनं मिथ्यावक्तृसामान्येन कृतमित्यर्थान्तरन्यासालङ्कारः ।

७. नीलकण्ठकाव्ये छन्दःप्रयोगः

महाकाव्यं छन्दसि विरच्यत इति नियमः सार्वत्रिकः । तदनुसृत्यैवात्र नीलकण्ठमहकाव्येऽपि विविधच्छन्दःप्रयोगद्वारा विषयोपस्थापनं विहितं प्रप्यते । अत्र प्रयुक्तेषु छन्दःसु अनुष्टुप् शिखरिणी, मालिनी, शालिनी, स्रग्विणी, मन्दक्रान्ता, शार्दूलविक्रीडितम्, मनोरमा इत्यादीनि मुख्यानि सन्ति । छन्दःप्रयोगे कुशलस्यापि कवेः पूर्णचन्द्रस्य छन्दोनियमानुसारेण गतियतिव्यवस्थायाः परिपालने कुत्रचित् स्खलनं गोचरीभवतीति पाठका तज्ज्ञास्यन्ति लयबद्धतया काव्यपठनकाले । अन्यत्र सर्वत्र सुष्ठु छन्दोव्यवहारः समधिगम्यते ।

८. उपसंहारः

देवाधिदेवश्रीनीलकण्ठमहाकाव्यम् आचार्येण पूर्णचन्द्रढुङ्गेलमहाभागेन रचितं भगवतः श्रीनीलकण्ठस्य स्तुत्यचरितप्रकाशकं महाकाव्यमस्ति। अत्र काव्ये

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिव एव नायकः, तद्गता भक्तिरेव कविहृद्गतरतित्वेनात्र प्राधान्येनाभिव्यज्यते। अतश्च देवादिविषयकरतिभावो मुख्यतयात्राप्रबन्धं व्यापी। एवं भावध्वनिरस्य महाकाव्यस्य काव्यात्मभूतं तत्त्वम्।

महाकाव्यस्यास्य मूलं वस्तु शिवचरितं तत्रापि समुद्रमथनोत्थमहा-विषपानकर्मणा पुराणेषु प्रसिद्धं कविना प्रकाशितं विद्यते । तदङ्गतया वीरबीभत्सभयानकादयो रसाः श्रीनीलकण्ठसम्बद्धा अभिव्यक्ताः सन्ति । अलङ्कारप्रयोगे छन्दसां नर्तने कविर्ढुङ्गेलोऽत्र महाकाव्ये कुशलप्रयोक्तृरूपेण प्रतिष्ठापित इति कथने महाकाव्यमेवेदं प्रमाणम्। महाकाव्यस्य लक्षणानुरूपमिदं महाकाव्यं सुघटितं वर्तते। प्रतिसर्गं स्वकीया विशिष्टता सर्गान्तपद्येन यत् प्रकाशितं तच्छ्रीहर्षस्य शैलीमनुसरतीति वक्तुं शक्यते। शिवचरितमाधृत्य नेपाले भारते च नाद्यावधि सप्तविंशतिसर्गात्मकमेतादृग्विशालकायं महाकाव्यं नैवोपलभ्यत इति विशिष्टवैशिष्ट्यसमन्वितत्वमस्य महाकाव्यस्य प्राप्तिरित्यवधेयम् । स्वकीयजीवनस्य चरमे वयसि विद्याविचक्षणतामधिरूढेन श्रीढुङ्गेलमहोदयेन रचितमिदं महाकाव्यं शिवदर्शनप्रतिपादकं शास्त्रीयकाव्यरूपेण ख्यातिमवश्यं लप्स्यत इति विचारयन् महाकाव्यस्य रचानकारस्य च सुदीर्घकालिकं सुकीर्तिप्रसरं कामयमानो विरमामि।

ॐ शान्तिः ! ॐ शान्तिः !! ॐ शान्तिः !!!

प्रा.डा. जीवन अधिकारी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुविदितविदुषे धन्यवादान् ददातु

आचार्यः पूर्णचन्द्रः सुरनगरगिरावान् महाकाव्यकार
आनीतं तेन शम्भोः सुचरितसहितं काव्यमेतद् विशालम् ॥
अस्माकं मातृभूमिर्भवतु सुखतया प्राप्य तं पूर्णचन्द्रं
तस्मै पुत्राय प्रेम्णा सुविदितविदुषे धन्यवादान् ददातु ॥१॥

अस्माकं राष्ट्रदेवः पशुपतिभगवान् गुह्यकालीसमेतो ।
छायां सम्प्राप्य यस्याविरतमभयदां रक्षितेयं धरित्री ॥
आचार्येण प्रणीतां रसगुणसहितां शोभनां श्लोकमालां ।
स्वे कण्ठे धारयित्वाऽनुभवतु सुसुखं श्रीमहानीलकण्ठः ॥२॥

काव्येऽस्मिन् चारुवाणीसहितशिवकथाः सन्ति पौराणिकाश्च ।
दृश्यन्ते चात्र भङ्गीभणिति सुरचना भक्तिभावाभिभूताः ॥
स्रष्टारं पूर्णचन्द्रं वियति शरदृतौ पूर्णचन्द्रापमानं ।
सम्पश्यन् धन्यवादं वदति सुखयुता लेखनीयं ममाऽपि ॥३॥

सर्गे सर्गे शिवेनार्जितगुणयशसा शोभितं काव्यमेतद् ।
भूकम्पेनापि भूमिस्खलनमपि कवि वर्णनं यत् करोति ॥
आदर्शाधारभूम्यामतिसहजतया कल्पितं चात्रदृश्यं ।
याथार्थ्यं चापि प्राप्य प्रमुदितहृदयः पाठकोऽयं मुकुन्दः ॥४॥

शम्भुः कैलाशवासी भुवनलयकरः किन्तु दान्तो दयालुः ।
रक्षालग्नोऽपिबत् सो जलनिधिमथनादुत्थितं कालकूटम् ॥
स्वर्गस्था भूमिजाता जलगगनचराः प्राणिनो रक्षिताः स्यु ।
रेषा तस्याभिकांक्षा जयतु जयतु सत्काव्यकारेण गीताः ॥५॥

छन्दोभिः शोभमाना मधुयुतकविता शास्त्रसिद्धैः सुरम्यै-
र्देशे देशान्तरेऽपि प्रथमगुणयुताः स्वीकृता रक्षिता स्युः ॥
चैत्रे पुष्पेषु भृङ्गानिव रसनिपुणान् पाठकान् प्राप्य हृष्टान् ।
भूयात् काव्यं तदीयं गिरिशवरयुतं कीर्तिलक्ष्मीनिकेत ॥६॥

शुभाकाङ्क्षी मुकुन्द शर्मा चालिसे

बूढानीलकण्ठ ४, कैलाशकुञ्ज, काठमाडौं ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरोवाक्

यस्मिन् सृष्टिस्थितिध्वंशनिग्रहानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वत् साम्बं वन्दे सदाशिवम् ॥

विश्वभाषासु गीर्वाणवाणीदेववाणीत्यादिपदैरभिधेया संस्कृतभाषा साक्षादमृततुल्येति न तिरोहितं सर्वेषामपि विपश्चिदपश्चिमानाम् । इयञ्च भाषा परिष्कृता सर्वमनुतनयग्राह्या च वर्तते । एतस्यां भाषायां कृतपरिश्रमाः स्वस्वकृतिलेखने प्रवृत्ता अनेके विद्वांसो बभूवुः । तैश्च नैकविधान् विषयानवलम्ब्य खण्डकाव्यमहाकाव्यचम्पूकाव्यादीनि नैकानि काव्यरत्नान्यारचितानि लभ्यन्त इति । परं मत्पूर्वैर्विद्वद्भिः कैश्चिदपि समुद्रमन्थनजातजगज्जिघत्सुविषविषये किमपि लिखितं दृष्टिपथे नागतं मदीयम् । एतद्विषयेऽध्ययनकालादेव मामकं मनो लग्नमासीत् । अतो मया सप्तविंशतिसर्गात्मकं देवाधिदेवश्रीनीलकण्ठमहाकाव्यमारचितमिदम् । वस्तुतस्तु नेदं महाकाव्यं मया रचितमाख्यातं वापित्वखिलस्यापि जगतो नियन्त्रा देवाधिदेवमहादेवेनैव मन्माध्यमेनेदं कारितमिति । अस्य महाकाव्यस्य युक्तायुक्तत्वविचारणां विद्वत्तल्लजाः काव्यरसिका एव करिष्यन्तीति मे द्रढीयान् विचार इति ।

प्रस्तुतस्य देवाधिदेवश्रीनीलकण्ठमहाकाव्यस्य पाण्डुलिपिं सम्यग् अधीत्य ममोत्साहं वर्द्धयद्भिर्नेपालदेशीयैः कतिपयैर्भारतीयैश्च विद्वद्वर्यैः स्वस्वमतानि प्रकटीकृतानि सन्ति । तानि महत्त्वाधायकानि वर्तन्ते । तैः सर्वैरपि कृतिरियं सर्वैर्ग्राह्या, पठनीया, विवेचनीया चेत्यभिहितमस्ति । तदवलोक्य प्रमोदेऽहम् । सर्वेऽपीमे संस्कृतामृतसेवका विद्वांसो मया प्रणतिपुरस्सरं समाद्रियन्ते । तेभ्यः सर्वेभ्योऽपि वचःकुसुमैः सादरान् सामोदान् सश्रद्धाँश्च हार्दान् धन्यवादान् विनिवेदयामि ।

तत्र विशेषतो योगिभिः श्रीआदित्यनाथमहाभागैः प्रस्तुतग्रन्थविषये मह्यं हार्दिकीः शुभकामनाः प्रदाय मदीय उत्साहो वर्द्धितः । अतस्तेभ्यः हार्दीं कृतज्ञतां प्रकटयामि ।

एवं रीत्या स्वामिभिः श्रीज्ञानानन्दसरस्वतीमहाभागैर्महाकाव्यस्यास्य गौरववर्द्धनायानुकम्पां विधाय शुभसम्मतिवचोमाध्यमेन मह्यमाशीर्वचनादिकं प्रदत्तमतस्तस्मान्नितरां प्रसीदन् तेषां चरणकमलयोः प्रणतिपुरस्सरं कार्तज्ञ्यं विनिवेदयामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरिशरणोपाध्यायमुकुन्दशरणोपाध्यायाभ्यामुभाभ्यामपि विद्वद्भ्यां शुभसम्मतिद्वारा नैजं भावपूर्णं वचनरचनं प्रकटीकृतमतस्ताभ्यामपि विद्वद्भ्यां सधन्यवादं कृतज्ञभावं प्रस्तौमि ।

न्यायवेदान्तादिशास्त्रमर्मज्ञैर्दीर्घराजघिमिरेमहाभागैः 'नीलकण्ठमहाकाव्याकूतम्' इति शीर्षिकामाध्यमेनैतन्महाकाव्यगतं महत्त्वं व्यक्तीकृतमतस्तेभ्यो मया भावपूर्णा कृतज्ञतोपायनीक्रियते ।

आचार्यजगन्नाथशर्मकण्डेलमहाभागैरपि स्ववचसा मदीयोत्साहनवर्द्धने महान् आयासो विहितोऽतस्तेषाङ्कृते हार्दिकी कृतज्ञता प्रकाश्यते । प्रो.हरिप्रसादाधिकारिमहोदयैः 'विराजतां काव्यमिदं चिराय' इत्याख्येन शीर्षकेण कृतया प्रशंसयास्य काव्यस्य महत्त्वं स्फुटीकृतम् । अतस्तेषाङ्कृतेऽपि सहर्षं कृतज्ञतावचनं प्रकटीकरोमि ।

कृतविद्यावारिधिभिरुमाकान्तशर्मपौडेलैः स्ववचसास्य महाकाव्यस्य महत्त्वं प्रकाशितम्, तदर्थं तेभ्यश्च हृदयत आभारं व्यनज्मि ।

अनेकविधानां ग्रन्थानां कर्तृभिः सम्पादकैश्च प्रा.डा.वेणीमाधवढकालमहाभागैः 'देवाधिदेवनीलकण्ठमहाकाव्ये मुकुलिता दृष्टिः' इति शीर्षकेण काव्यस्य महत्त्वपूर्णं विवेचनं व्यधायि । तदर्थं तेभ्योऽपि हार्दं कार्तज्ञ्यं विनिवेदयामि ।

प्रस्तुतस्य महाकाव्यस्य रचनायां तत्प्रकाशने चानितरसाधारणं साहाय्यं वरीवर्तते विद्यावारिधिपदविभूषितानां प्राध्यापकवर्याणां खनालकुलदीपानां श्रीनारायणप्रसादमहाभागानामिति । तैः 'श्रीनीलकण्ठमहाकाव्यं महाकविराचार्यपूर्णचन्द्रढुङ्गेलश्चे'त्याख्यशीर्षकमाध्यमेन ग्रन्थपर्यालोचनात्मकं महत्त्वाधायि विचारजातमप्यभिव्यक्तम् । तत् सर्वेषां कृते एतद्ग्रन्थविषयकं मार्गदर्शकमस्तीति मे विश्वासः । अतस्तेभ्यो भूरिशो हार्दान् धन्यवादान् प्रयच्छामि ।

एवङ्क्रमे श्रीमुकुन्दशर्मचालिसेमहाभागा अप्यविस्मरणीयाः । तैरपि स्वकाव्यप्रतिभया प्रकटितमस्ति प्रस्तुतमहाकाव्यगतं वैशिष्ट्यमिति । तदर्थन्ते भूरिशो धन्यवादार्हाः सन्तीति ।

प्रा.शिवगोपालरिसालमहागेनाऽपि ग्रन्थविषये प्रकटिता भावभरिता शुभसम्मतिः, अतस्तस्मावपि धन्यवादान् प्रयच्छामि । एवमेव प्रस्तुतं महाकाव्यमक्षरश आद्योपान्तमधीत्य भाषासंशोधनादिकार्येषु सश्रद्धं सस्नेहञ्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथायथं साहाय्यं विदधद्भ्यो डा.जीवनाधिकारि-डा.माधवपाण्डेय-डा.यादवगडतौला-अर्यालोपाह्वश्रीदीनबन्धुमहाभाग-अर्यालोपाह्वकेशव-शरण-कृष्णमणिपहाडीत्यादिभ्यो ज्ञाताज्ञातेभ्यः सर्वेभ्यः सुहृद्भ्यः सामोदान् धन्यवादगर्भितानाभारयुतान् साधुवादानभिव्यनज्मि ।

एवमेव पुस्तकमुद्रणार्थं प्रकाशनार्थञ्चानितरसाधारणं साहाय्यं कृतवद्भ्यां तद्विषये प्रभूतधीमद्भ्यां 'सनातनप्रेस' इत्याख्यप्रकाशनालयसञ्चालकाभ्यां नैकेषां पुस्तकानाङ्कर्तृभ्यामथ च सङ्कलकाभ्यां सम्पादकाभ्यां डा.उत्तमोपाध्यायन्यौपाने-रेग्मीत्युपाह्व-दीनदयालमहोदयाभ्यां हार्दिकीं भावभरितां भावनां प्रकटय्य हार्दान् धन्यवादान् च प्रयच्छामि । अनयोः सत्पुरुषयोरात्मकल्याणार्थं भगवतो देवाधिदेवस्य श्रीनीलकण्ठेश्वरस्य महती कृपादृष्टिजायतेतरामिति च कामये ।

एवमेव गार्हस्थ्यगतं सर्वमपि कार्यजातं स्वस्कन्धे निरुह्य प्रस्तुतस्य महाकाव्यस्य वचनरचनकार्ये सश्रद्धं प्रतिक्षणं दत्तोसाहाभ्यां श्रीमतीभ्यां मनोरमापार्वतीभ्यां धर्मपत्नीभ्यां हार्दिकं शुभाशीर्वादं ददनहं इन्दुमतिसहिताय जेष्ठपुत्राय प्रकाशचन्द्राय, वन्दनासहिताय कनिष्ठपुत्राय आदित्यचन्द्राय, तथा च श्रीकान्तपौडेलसहितायै रीतिकेश्वरीनाम्न्यै ज्येष्ठपुत्र्यै, मुक्तिबोधन्यौपानेसहितायै नीतिकेश्वरीनामिकायै कनिष्ठपुत्र्यै च भावभरितान् आशीर्वादान् प्रयच्छामि ।

तथैव अस्मिन् कर्मणि नानाविधानि अविस्मरणीयानि साहाय्यानि कृतवद्भ्यः सपरिवारेभ्यो डिल्लीरामरिमालमहोदयेभ्यः सस्नेहं सशतः साधुवादान् प्रयच्छामि ।

अन्ते च प्रकृतमहाकाव्यलेखनटङ्कनप्रकाशनादिकार्यजातेषु प्रत्यक्षाप्रत्यक्षतः साहाय्यमाचरद्भ्यो भारतीयेभ्यो नैपालकेभ्यो विद्वद्भ्यः सज्जनेभ्यो मित्रजनेभ्यश्छात्रेभ्यश्च यथोचितान् प्रणामनमस्काराशीर्वादसाधुवादादीन् वितीर्य भगवतो देवाधिदेवस्य श्रीनीलकण्ठेश्वरस्य पादपङ्कजस्मरणपूर्वकमेतस्माद् वाग्व्यापाराद् विरिरंसामीति शम्-

महाकविराचार्यः पूर्णचन्द्रोपाध्यायो ढुङ्गेलः
दिनाङ्कः २०७८ विजयादशमी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरिशरणोपाध्यायमुकुन्दशरणोपाध्यायाभ्यामुभाभ्यामपि विद्वद्भ्यां शुभसम्मतिद्वारा नैजं भावपूर्णं वचनरचनं प्रकटीकृतमतस्ताभ्यामपि विद्वद्भ्यां सधन्यवादं कृतज्ञभावं प्रस्तौमि ।

न्यायवेदान्तादिशास्त्रमर्मज्ञैर्दीर्घराजघिमिरेमहाभागैः 'नीलकण्ठमहा-काव्याकूतम्' इति शीर्षिकामाध्यमेनैतन्महाकाव्यगतं महत्त्वं व्यक्तीकृतमतस्तेभ्यो मया भावपूर्णा कृतज्ञतोपायनीक्रियते ।

आचार्यजगन्नाथशर्मकण्डेलमहाभागैरपि स्ववचसा मदीयोत्साहनवर्द्धने महान् आयासो विहितोऽतस्तेषाङ्कृते हार्दिकी कृतज्ञता प्रकाश्यते । प्रो.हरि प्रसादाधिकारिमहोदयैः 'विराजतां काव्यमिदं चिराय' इत्याख्येन शीर्षकेण कृतया प्रशंसयास्य काव्यस्य महत्त्वं स्फुटीकृतम् । अतस्तेषाङ्कृतेऽपि सहर्षं कृतज्ञतावचनं प्रकटीकरोमि ।

कृतविद्यावारिधिभिरुमाकान्तशर्मपौडेलैः स्ववचसास्य महाकाव्यस्य महत्त्वं प्रकाशितम्, तदर्थं तेभ्यश्च हृदयत आभारं व्यनज्मि ।

अनेकविधानां ग्रन्थानां कर्तृभिः सम्पादकैश्च प्रा.डा.वेणीमाधवढकालमहाभागैः 'देवाधिदेवनीलकण्ठमहाकाव्ये मुकुलिता दृष्टिः' इति शीर्षकेण काव्यस्य महत्त्वपूर्णं विवेचनं व्यधायि । तदर्थं तेभ्योऽपि हार्दं कार्तज्ञ्यं विनिवेदयामि ।

प्रस्तुतस्य महाकाव्यस्य रचनायां तत्प्रकाशने चानितरसाधारणं साहाय्यं वरीवर्तते विद्यावारिधिपदविभूषितानां प्राध्यापकवर्याणां खनालकुलदीपानां श्रीनारायणप्रसादमहाभागानामिति । तैः 'श्रीनीलकण्ठमहाकाव्यं महाकविराचार्यपूर्णचन्द्रढुङ्गेलश्चे'त्याख्य-शीर्षकमाध्यमेन ग्रन्थपर्यालोचनात्मकं महत्त्वाधायि विचार-जातमप्यभिव्यक्तम् । तत् सर्वेषां कृते एतद्ग्रन्थविषयकं मार्गदर्शकमस्तीति मे विश्वासः । अतस्तेभ्यो भूरिशो हार्दान् धन्यवादान् प्रयच्छामि ।

एवङ्क्रमे श्रीमुकुन्दशर्मचालिसेमहाभागा अप्यविस्मरणीयाः । तैरपि स्वकाव्यप्रतिभया प्रकटितमस्ति प्रस्तुतमहाकाव्यगतं वैशिष्ट्यमिति । तदर्थन्ते भूरिशो धन्यवादार्हाः सन्तीति ।

प्रा.शिवगोपालरिसालमहागेनाऽपि ग्रन्थविषये प्रकटिता भावभरिता शुभसम्मतिः, अतस्तस्मावपि धन्यवादान् प्रयच्छामि । एवमेव प्रस्तुतं महाकाव्यमक्षरश आद्योपान्तमधीत्य भाषासंशोधनादिकार्येषु सश्रद्धं सस्नेहञ्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथायथं साहाय्यं विदधद्भ्यो डा.जीवनाधिकारि-डा.माधवपाण्डेय-डा.यादवगडतौला-अर्यालोपाह्वश्रीदीनबन्धुमहाभाग-अर्यालोपाह्वकेशव-शरण-कृष्णमणिपहाडीत्यादिभ्यो ज्ञाताज्ञातेभ्यः सर्वेभ्यः सुहृद्भ्यः सामोदान् धन्यवादगर्भितानाभारयुतान् साधुवादानभिव्यनज्मि ।

एवमेव पुस्तकमुद्रणार्थं प्रकाशनार्थञ्चानितरसाधारणं साहाय्यं कृतवद्भ्यां तद्विषये प्रभूतधीमद्भ्यां 'सनातनप्रेस' इत्याख्यप्रकाशनालयसञ्चालकाभ्यां नैकेषां पुस्तकानाङ्कर्तृभ्यामथ च सङ्कलकाभ्यां सम्पादकाभ्यां डा.उत्तमोपाध्यायन्यौपाने-रेग्मीत्युपाह्व-दीनदयालमहोदयाभ्यां हार्दिकीं भावभरितां भावनां प्रकटय्य हार्दान् धन्यवादान् च प्रयच्छामि । अनयोः सत्पुरुषयोरात्मकल्याणार्थं भगवतो देवाधिदेवस्य श्रीनीलकण्ठेश्वरस्य महती कृपादृष्टिजायतेतरामिति च कामये ।

एवमेव गार्हस्थ्यगतं सर्वमपि कार्यजातं स्वस्कन्धे निरुह्य प्रस्तुतस्य महाकाव्यस्य वचनरचनकार्ये सश्रद्धं प्रतिक्षणं दत्तोसाहाभ्यां श्रीमतीभ्यां मनोरमापार्वतीभ्यां धर्मपत्नीभ्यां हार्दिकं शुभाशीर्वादं ददनहं इन्दुमतिसहिताय जेष्ठपुत्राय प्रकाशचन्द्राय, वन्दनासहिताय कनिष्ठपुत्राय आदित्यचन्द्राय, तथा च श्रीकान्तपौडेलसहितायै रीतिकेश्वरीनाम्न्यै ज्येष्ठपुत्र्यै, मुक्तिबोधन्यौपानेसहितायै नीतिकेश्वरीनामिकायै कनिष्ठपुत्र्यै च भावभरितान् आशीर्वादान् प्रयच्छामि ।

तथैव अस्मिन् कर्मणि नानाविधानि अविस्मरणीयानि साहाय्यानि कृतवद्भ्यः सपरिवारेभ्यो डिल्लीरामरिमालमहोदयेभ्यः सस्नेहं सशतः साधुवादान् प्रयच्छामि ।

अन्ते च प्रकृतमहाकाव्यलेखनटङ्कनप्रकाशनादिकार्यजातेषु प्रत्यक्षाप्रत्यक्षतः साहाय्यमाचरद्भ्यो भारतीयेभ्यो नैपालकेभ्यो विद्वद्भ्यः सज्जनेभ्यो मित्रजनेभ्यश्छात्रेभ्यश्च यथोचितान् प्रणामनमस्का-राशीर्वादसाधुवादादीन् वितीर्य भगवतो देवाधिदेवस्य श्रीनीलकण्ठेश्वरस्य पादपङ्कजस्मरणपूर्वकमेतस्माद् वाग्व्यापाराद् विरिरंसामीति शम्-

महाकविराचार्यः पूर्णचन्द्रोपाध्यायो ढुङ्गेलः
दिनाङ्कः २०७८ विजयादशमी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

देवाधिदेवश्रीनीलकण्ठमहाकाव्यम्

प्रथमः सर्गः

(विश्वदेवमङ्गलाचरणनामकः)

गणेशः सदा विघ्नहर्ता सुरेशो
बुधैः शास्त्रलाभाय भिन्नैः स्वलब्ध्यै।
क्रये विक्रयेऽन्योन्यवर्गेण नित्यं
स्तुतः पूजितोऽयं मया स्तूयतेऽत्र ॥१॥

बिल्वादिभिः प्रतिदिनं सनुतिं सपर्यां
कर्तारमाशु विदधाति रमापतिं यः।
विश्वार्णवस्य सुतितीर्षुजनैकधामा
गौरीपतिर्भवतु शङ्कर आश्रयो मे ॥२॥

अहो जन्मजन्मान्तराद् भाग्यलेशान्
महाभाग्यमेतत् समुल्लासितं यत्।
स्फुरत्पादपङ्केरुहं कालिकायाः
सुरम्यातपत्रायते मस्तके मे ॥३॥

वरेण्या सदा ज्ञानदात्री सुमेधा
विधेर्वल्लभा शारदा सर्वपूज्या।
मदीयं सुलक्ष्यं प्रपूर्यैव देवी
प्रदद्यात्सदा सर्वदा ज्ञानराशिम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनेशी रमा मातृका द्रव्यदात्री
सदा सौख्यदा स्यान्मदीये कुलेऽस्मिन्।
स्फुरद्धस्तपङ्केरुहं तन्मदग्रे
प्रकुर्यादहोरात्रमेतन्ममेच्छा ॥५॥

उमे मात्रिके त्वं शिवार्धाङ्गभूता
सुरक्षाप्रदा भोगदा पालिका च।
अजस्रं त्वया शास्त्रशिक्षाप्रदानाद्
विवेकीकृतः सत्यमेतद् वदामि ॥६॥

प्रख्यातवीर्यः सुरजोऽस्त्यगस्त्योऽ-
स्माकं स गोत्रस्य सुचालकोऽतः।
उभौ दधीचिः परजैमिनिश्च
दार्ढ्यच्युतेध्मावहका नुतास्ते ॥७॥

नित्यं नमामो वयमार्षभाँस्तान्
वेदादिशास्त्रस्य सुदर्शकान् द्राक्।
निर्मापिकाष्वेव क्रियासु मुख्यान्
ग्रन्थप्रणेतॄन् श्रुतिसारबोधॄन् ॥८॥

कुलस्य ग्रामस्य च देवताः किल
परम्पराप्राप्तविधानपूजिताः।
प्रणम्यमाना इह काव्यसङ्ग्रहे
प्रदद्युरानन्दघनां सुसम्पदम् ॥९॥

सुकुलजाः सकलोदयचिन्तकाः
पठनपाठनकर्मणि सूचकाः।
प्रतिदिनं बहुशास्त्रपरायणाः
गुरुवरा नतमस्तककैर्नुताः ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महामङ्गले मातृभूमे त्वदीया
वयं सर्वदा त्वत्समाराधकाः स्मः ।
त्वदीये पवित्रे सुपादद्वयेऽत्र
पतन्त्येव देहा नमस्ते नमस्ते ॥११॥

महासौख्यदे जन्मभूमेर्मदीयं
जनुस्तावके क्रोडभागे प्रजातम् ॥
त्वया बाल्यकाले सुपुष्टिः कृता मे
यतोऽद्यापि सा पुष्टिरारक्षिताऽस्ति ॥१२॥

त्रयस्त्रिंशत्-कोटिसङ्ख्याः सुरास्ते
विभिन्नानां सम्पदां दानशीलाः ।
अजस्रं ते पूज्यमाना मयाऽत्र
दिशन्तु श्रुत्यादिशास्त्राणि नित्यम् ॥१३॥

सम्पूर्णशास्त्रीयसुमार्गसूचने
नित्यं प्रवृत्तान् हि समाजरक्षणे ।
यज्ञादि-गम्भीर-रहस्य-पूरितान्
ग्रन्थान् समस्तान् प्रणमामि सद्यः ॥१४॥

सुतुङ्गवारि-स्रवणानि निर्झरान्
सुकौप-सामुद्र-जलानि सर्वथा ।
समस्तजीवेषु दयापराणि यद्
दयां सुसत्कर्तुमहं यतेऽनिशम् ॥१५॥

ब्रह्मा सुरेशः सकलस्य चिन्तको
विश्वस्य निर्माणविधौ प्रवृत्तिकः ।
कुत्राऽप्यसौ नैव विराजतेऽक्रिय
आनम्यतेऽस्माभिरजस्रमादरात् ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पूर्ण-विश्वस्य सुरक्षको महान्
विश्वसृजः सृष्टि-सुपालने रतः।
असौ हरिस्त्राण-परायणः प्रभु-
स्तस्मै नमः प्राणिहितस्य कारिणे ॥१७॥

वेदशाखाः सहस्राधिकाः सन्ति ता
बुधैः सर्वथा मानिताः कौशलार्थम्।
विश्वस्य कल्याणविधौ प्रवृत्तिका
नमोऽस्तु ताभ्यः सकलैः सदा स्तुताः ॥१८॥

गणेश-पञ्चायतनस्थ-देवताः
क्रमेण सूर्यं जगदम्बिकां हरिम्॥
शिवं गणेशं प्रमुखं नमामि तं
सदैव देवासुर-मानवैः स्तुतान् ॥१९॥

शिवस्य पञ्चायतने सुपूजितान्
गणेश्वरं हैमवतीं जनार्दनम्।
दिवाकरं मुख्यतमं महेश्वरम्
प्रणौमि तान् स्वाभिमतस्य लब्धये ॥२०॥

शिवास्वपञ्चायतने सदाऽऽदृतान्
गणेश्वरं भास्कर-विष्णु-शङ्करान्।
प्रधानदेवीं जननीं महेश्वरीं
सदा नमाम्येव खिलस्य पूरिकाम् ॥२१॥

हरेस्तु पञ्चायतने स्थितान् सुरान्
दिवाकरं हैमवतीं महेश्वरम्।
गणाधिपं मुख्यतमं च केशवं
प्रणौमि सानन्दमहं निरन्तरम् ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिवाकरीये प्रमुखे समूहके
हरिं सुरेशीं गिरिशं गणेश्वरम्।
प्रभाकरस्यैव सदा प्रधानता
भवेद् बुधाः! सर्वसुरान् प्रणौमि तान्॥२३॥

अनादिकालाज्जगतीह सत्कृता
ऋष्यादिभिर्नित्यमवश्यपूजिता।
अभीष्टकं केवलमेकमाश्रिता
उपासते नित्यमहो बुधाग्रगाः॥२४॥

त्वं ब्रह्मदेव ! दितिजैर्मनुजैश्च सेव्यः
सर्वाश्रयः खलु विचित्रशरीरधारी।
कर्तुं विकर्तुमथवा नियमैरकर्तुं
शक्तोऽसि पूर्णतम आदरणीय आद्यैः॥२५॥

ब्रह्मा विष्णुर्गजारिः कात्यायनी नन्दिकश्च।
सेनानीविघ्नराजौ चामुण्डिका वीरभद्रः।
ब्राह्मी लक्ष्मीर्जनन्यौ गीर्वाणसङ्घाः समस्ताः
काव्यस्याऽस्मिन् प्रसङ्गे नौम्यहं निर्माणशक्त्यै॥२६॥

सम्पूर्णविश्वविषयस्य विभिन्नराष्ट्र-
तीर्थस्थलेषु गुणशिक्षणपीठसङ्घे।
प्रख्यात-शिक्षणविधासु ससाधनासु
चाध्यात्मपाठनपरासु नताः स्म नित्यम्॥२७॥

शैला नदीविपिननिर्झरकूपनाल्यः
पानीयपूर्णसरसः सकलाः पवित्राः।
रुद्राक्षबिल्वतुलसी-वनफुल्ल-पुष्पा
आम्रादिशुद्धतरवः सरसाः प्रणम्याः॥२८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरित्–समुद्रान् विविधाँश्च शैला–
नहर्निशं प्राणिसुखाय लीनान्।
सदैव सांसारिकजीवसौख्यदान्
नमामि तान् सर्वहिताय सृष्टान् ॥२९॥

मातृवंशे स्थिताः पूर्वजाः पूजिताः
स्वीयवंशे च ते जन्मिनो मानिताः।
मञ्जुले मातापित्रीयवंशद्विके
चाऽद्रियन्तेऽनिशं सर्वथा ह्यग्रजाः ॥३०॥

वृक्षा अब्जाः कृमिपशुपतगाः
कीशा जीवा विविधकुलापाः।
दृश्यन्ते तेऽधिकमिह सरला–
स्तेभ्यो नित्यं सुनतहृदयकः ॥३१॥

सर्वगीताश्च तन्त्रादिशास्त्राणि च
कामशास्त्रस्य विस्तार ईशाऽप्रियः।
क्रीडया रम्यते चाऽत्र वाण्या सदा
तानि शास्त्राणि सम्यङ् नुतान्यन्यतः ॥३२॥

वेदगुह्यं तथा स्मार्तगुप्तं धनं
पुण्यदानाय पौराणिकं कीर्तितम्।
दर्शनप्राच्यविद्याः समा उत्तमाः
सर्वथा सन्नुताः सन्ति साक्षान्मया ॥३३॥

प्राच्यवर्माप्रदेशस्य म्यान्मारकं
नाम जातं हि सर्वैश्च सम्मानितम्।
मीचिनामण्डले तत्र दिव्यावनिः
स्वर्णचेया नदी विद्यते चोत्तमा ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्र नित्यं पठन्ति द्विजा बालकाः
प्रत्यहं सौख्यमालभ्यते सज्जनैः ।
तत्र भूमिर्मखान्त्याख्यया मञ्जुला
ग्रामिका सा मही पुण्यदा यज्ञभूः ॥३५॥

तीर्थानि सर्वाणि महीतलेऽस्मिन्
स्थितानि तानीह नमामि नित्यम् ।
तत्र स्थिताँस्ताँश्च सुरासुरादीन्
दृष्ट्वाऽनिशं तृप्यति मत्कुलं द्राक् ॥३६॥

वनौकोभिरानन्दतयाऽस्ति सेव्या
सम्पूजिता पुण्यभरा वसुन्धरा ।
सर्वस्य सिद्धौ सततं प्रवर्तिका
विभातु नित्यं मम कार्यसिद्धयै ॥३७।

सर्वस्य सिद्धयादि-सुलब्धिहेतो-
र्भूयात् सदा विश्वभरा धरित्री ।
आबाल्यकालात् सततं सुसौख्या
संरक्षिका सर्वपदार्थजातेः ॥३८॥

अरण्यवासे निरतैश्च तापसैः
सदैव यस्यां विहिता ह्युपासना ॥
पवित्रदेवालयतुल्यतां गता
धरा समस्ता जननीव सेव्यते ॥३९॥

सदैवासुरा देवमुख्या मनुष्याः
शमिच्छन्ति ते सिद्धये स्वीयकार्ये ।
शुभाश्चर्चितास्ते पदार्थाः समस्ता-
यकैस्तैर्यथा सिद्धयति प्राणिकार्यम् ॥४० ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दूरभूताश्च ते पर्वता मञ्जुलाः
किन्तु सामीप्यदेशेऽपि ते तादृशाः ।
मातृरूपस्थिताः प्राकृताः सम्पदः
सर्वजीवस्य या मञ्जुलाः सौख्यदाः ॥४१॥

परम्पराप्राप्तविधासु पूजिताः
कुलस्य वासस्य च देवताः किल ।
प्रणम्यमाना इह कालविप्लुते
प्रदद्युरानन्दघनं सदाऽऽनुताः ॥४२॥

विश्वतीर्थानि सर्वाणि सन्तीह भो
सेव्यमानानि सर्वत्र निष्ठायुतैः ।
दर्शनीयानि मर्त्यैश्च नित्यं श्रितै-
र्नम्यमानानि नौमि विभो पाहि माम् ॥४३॥

वृक्षवीरुल्लताः सौम्यदेहाः सदा
सर्वदैवध्रुवाः सन्ति शान्तिप्रदाः ॥
पुष्पपत्रादिदानैः फलानामपि
सन्ततं सेवया संयुताः स्तौमि ताः ॥४४॥

ईशरूपं जगत् सर्वमेवेदृशं
तेन नानालतागुल्मपुष्पादिकाः ।
वस्तुसंसार एको हि रुद्राश्रितः
सेव्यते सर्वदाऽस्माभिरेतर्ह्यपि ॥४५॥

स्तन्यभक्ष्यादिदानैः सरस्यैरपि
दानकृत्येन नित्यं युता भूमयः ।
सन्ततं सेव्यमाना मया सर्वथा
ताः सदैवाद्रियन्ते ध्रुवं सौख्यदाः ॥४६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आनम्यन्ते पञ्चभूतानि तानि
यैः संसृष्टाः स्तुत्यसम्पूर्णलोकाः ।
सञ्जीवन्ति प्राणिनः सौख्ययुक्ता
नौमि प्राक् तान् सर्वभूतेषु शान्तान् ॥४७॥

शैलादिभ्यो नित्यपातेन जाताः
शुद्धा रस्याः शीतला निर्झरास्ते ।
पान्थश्रेष्ठैर्नित्यसंसेव्यमानाः
कल्याणार्थे जायमाना नतास्ते ॥४८॥

आदित्यविश्ववसुरुद्रसमीरसाध्या
आभास्वराख्यतुषितौ समहत्सुराजाः ।
सामूहिकाः सततसर्वजनेषु राद्धाः
कल्याणवृद्धिकरणे गणदेवतास्ताः ॥४९॥

परिशुद्धकाव्यरचना मधुरा
भवतां विवृद्धचरणेषु भृशम् ।
विहिता सनिष्ठमधुना विनतिः
समवन्तु ताः सुरसिकाग्रभगाः ॥५०॥

संसारेऽस्मिन् स्वविषयगतानेक'मस्जीद'संस्थो
विश्वात्माऽसौ सुकथित'खुदाल्लाह' आराध्यमानः ।
संसारस्याऽखिलविषयगश्'चर्चयीशु'प्रशस्य
एतौ देवौ सततमुभयौ सादरं मानितौ द्वौ ॥५१॥

मन्दिरचर्चाद्याश्चैत्यगुम्बाः
प्रत्यहमाराध्या जनताभिः ।
सम्प्रति काव्यरचनार्थ-
मत्र सनिष्ठं नौम्यहमोमोम् ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवा देव्यः सदितिजडाकिन्यस्ताः
हाकिन्यो गुह्यकसहिताः शाकिन्यः ।
विद्याध्राः किन्नरयुतिकाः सिद्धाऽग्रा
वेताला यक्षराक्षसासुरा नम्यन्ते ॥५३॥

अचर्चिता आदर्यदेवयोनयो
विभिन्नरूपाः सततं नमार्हकाः ॥
परन्तु सौम्याः स्तवनीयतां गता
न संस्मृतान् ताँश्च प्रणौमि नित्यशः ॥५४॥

"सर्वे रुद्रमया देवाः सर्वे रुद्रमया नराः ।
सर्वं रुद्रमयं सत्त्वं सर्वं रुद्रमयं जगत् ॥"[१]

क्षोणीं जलं वह्निसदागतौ खं
भास्वन्ति भूतानि दिशागमादीन् ।
सम्पूर्णवस्तूनि हरस्य रूपं
मत्वा नमेत् सज्जन आत्मतन्त्रः ॥५५॥

आचार्यप्रभपूर्णचन्द्ररचिते चातुर्यदे शाम्भवे
सौन्दर्येण युते सुरम्यकविताश्रेष्ठे जगन्मङ्गले ।
काव्येऽस्मिन् प्रथमश्चराचरजगन्माङ्गल्यसर्गो व्यगाद्
वीक्ष्यैनं विबुधा निरन्तरमुदः स्युर्देवदेवाधिपात् ॥५६॥

॥ इति प्रथमः सर्गः ॥

---

[१] वेदोऽखिलोधर्ममूलं स्मृतिशीले च तद्विदाम् । वेदः शिवः शिवो वेदः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः सर्गः

(विशिष्यधारशर्वरूपपृथिवीमातृवर्णनात्मकः)

सदाद्भुतसुराऽसुरेश्वर-शिवस्य मूर्त्यष्टके
प्रसिद्धतम-भूमितोय-हुतभुक्-समीरादिषु।
स्थितं जगति सुप्रसिद्ध-महिमाद्भुतं सौख्यदं
समीक्ष्य सकलाः सुरासुरगणाः सुखं शेरते ॥१॥

धरासलिलवह्नि-वायुगगनानि पश्चात् पुन-
र्दिवाकर-हिमांशु-याजकबुधाः प्रपूज्याः सदा।
स शर्व उदितो धरा भव इहोक्त आपः खलु
कृशानुरुदितोऽस्ति रुद्र उत वायुरुग्रः स्मृतः ॥२॥

स भीम उदितोऽत्र खं पशुपतिस्तु यज्वा मतः
सुरार्यमनिशापतीश्वर-वृता महादेवकौ।
सदैव जगतां हिताय विविधैः स्वरूपैर्मुहु-
र्ददात्यखिलसौख्यमोक्षफलदाय्यवश्यं शिवः ॥३॥

देवः शिवः सकलदुःखविनाशकारी
नित्यं प्रजाचरचरादिसमस्तभर्ता।
कल्याणमेव वितनोति निरन्तरं यः
कुर्वन् कदाचन न तृप्तिमिहाश्रयेद्धि ॥४॥

आनन्दसिन्धुरमरादिसमस्तजीवै-
र्नित्यं प्रपूजितपदः प्रणतार्तिहारी।
अष्टाभिरात्मतनुभिस्त्रिजगत्प्रपाता,
विश्वं वपुर्जयति यः खलु शङ्करोऽसौ ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धरास्त्यखिलजीवभूः प्रणयिनी सदा प्राणिनां
प्रभूत–धनसम्प्रदा विभवदाऽऽत्मदा सौख्यदा ।
अतः सकलभूतलं निखिलभोगदाने क्षमं
त्रितापबलनाशकं भवति नोऽत्र पृथ्व्यै नमः ॥६॥

अनन्तवसुधा धरा त्रिविधरम्यवस्तूद्भवै–
र्महामहिमभिः स्तुता रसवती जनैः सेविता ।
पदार्थपरिपूरणात् खलु विमोहदा प्राणिनां
यदीयमिह वैभवं प्रतिदिनं स्वराक्रामति ॥७॥

सहस्रकिरणस्य वैभवभवः प्रचण्डातपः
कियानपि भवेद् ध्रुवो हरितिमप्रभावाद् दृढान् ।
तया घनमहीरुहप्रबल–जालभेदैश्च यज्–
जनैः क्षितिनतैः सुभक्तिविमलैर्विषोढः सदा ॥८॥

यया समयवर्षकैर्नयनतुष्टिदैर्वारिदै–
र्नदीनदसहस्रशो विमलनिर्झरैः सर्वतः ।
निरन्तरमनातपा सततसस्यभेदैर्नवा
पतङ्गकुलसंस्तुताऽस्तु सकला धरा साम्प्रतम् ॥९॥

अनेकविधपर्वतैः सशिखरैः सदा रक्षिता
सुरैरभिनवैर्नवीनवयसा युतैः शोभिता ।
असङ्ख्यमणिमण्डिताऽऽकरशतैर्दीपिता
अमूल्यविभवैर्युता सकलसिद्धिदा सेविनाम् ॥१०॥

प्रशस्तमतिमानयोः स्थितिनिवासयोर्गौरवा
प्रभूतविभवैर्जनैः सततमस्मदीयैर्ध्रुवम् ।
निरन्तरमनाकुलं स्वजनिकेव सन्निष्ठया
सदैव वसुधानतैः स्वकुलकौशलं वर्ध्यते ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्ववंशभवगोत्रयोः प्रवरशाखयोर्गौरवं
प्रहीणविषयैर्नतैः सततमामकैस्तैर्ध्रुवम् ।
अनन्तरमनाकुलं प्रकृतिरक्षकैस्तैः सदा
प्रहारविविधैरपि प्रतिहतैर्विषोढं सदा ॥१२॥

कृषीवलजनश्रमैश्च सुतरामियं वर्धिका
सुभिक्षशतकैः सहैव सरसोत्सवप्रेक्षिका ।
सदैव परिपूर्णताप्रचुरकौशलं दर्शिका
सुपालनपरा स्वभावत इहाऽस्ति मातेव सा ॥१३॥

परस्परमिमे जना वसुधया सदा रक्षिता
विभिन्नफललम्भनात् प्रचुरधान्यलाभैर्ध्रुवम् ।
सदैव शुभकर्मणि प्रयतमानवान् प्रेमतो
निरन्तरमहो बत प्रतिदिनं विभर्त्येव सा ॥१४॥

सदैव परिपूर्णतानिखिलकौशलैः संयुता
कृषीवलसमस्तजान् सुविमलाञ्छ्रमान् रक्षिका ।
चराचर-समस्तया प्रतिकलं सुखायैव सा
प्रवर्तत इहाऽस्ति वस्तु भुवनस्य तस्यै नमः ॥१५॥

धराऽस्ति सकलार्थदा निखिललोकदुःखापहा
प्रभूत-जलधान्यदा सकलमानमातेव सा ।
ममाऽस्ति हृदये व्यथा न च मया हि भूमेः कृते
कृतं किमपि सौख्यदं न च मनोहरं रञ्जनम् ॥१६॥

असङ्ख्यफलदा सदा विविधभोगदानादिभि-
र्निरन्तरकृपापरा स्वजननीव रक्षापरा ।
प्रशस्तबलवीर्यदा सकलविश्वजानां कृते
नितान्तसुखदायिनी करुणयैव नित्यं युता ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महीं निखिलजन्मदाचरचरायनं सुन्दरं
सदैव सुखदायिका स्वजनिकेव नित्याश्रिता ।
स्वजातकुशलार्थिनी स्वतनयाय सर्वस्वदा
सदाचरणशीलिभिः स्मरणपूर्वकं मानिता ॥१८॥

अपूर्वममतायुता नयनगोचरे कारिका
असङ्ख्यसुपदार्थदा निखिलवस्तुसंरक्षिका ।
अजस्रधनवर्षिणी धनसुखार्थिनां सर्वदा
नुताऽस्तु सततं धरा सकलमोहिका पालिका ॥१९॥

अनन्तविभवैर्वृता विविधवस्तुसारैर्युता
विचित्रतरुगुल्मकैः सततशोभिता निर्मला ।
गिरीन्द्रशिखरैर्नुता फलसहस्रपूर्णाऽनिश-
महो ! अवनिमातृके त्वमवनेऽग्रगण्यासि नः ॥२०॥

चराचर-सुसौख्यदा विविधवृक्षरक्षाकरा
विभिन्नवनरम्यताऽनवरताऽन्विता शोभिता ।
प्रफुल्लनवमल्लिकाप्रभृतिमञ्जुपुष्पैर्वृता
सुगन्धिशतपुष्पयुक्सकलजन्तुसम्मोहिनी ॥२१॥

सुगन्धितरुनिर्मितं कृमिजलीयजीवैः श्रित-
महो समतिसौरभं सकलमानवाकर्षकम् ।
प्रगृह्य परमसौरभं ह्यवनिमातृकाया भृशं
यथेष्टसुखलाभतो जगति सर्व आमोदते ॥२२॥

अनेकपशुपक्षिभिः सततसेव्यमानं सुखं
सदैव जनमोदकं भवति नाऽत्र शङ्कोचिता ।
सुतीरशतकैर्नदैः परिवृता सुरम्या मही
प्रशस्ततरुगुल्मजा रुचिरपुष्पमालाऽऽवृता ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असङ्ख्यरसराजजोऽहह ! महीयमोदो जनै-
रवर्ण्यतमतां गतः कथमहं तदत्र क्षमः ।
अपूर्वसुखसम्पदाऽवनिरियं न तोल्याऽस्ति सा
मनोहरपदार्थभृत् सकलसंस्तुतैवेति सा ॥२४॥

धरे भव सदा सुखा निखिलजीवपापापहा
वयं किल कदाऽपि ते कठिनकाल आगच्छति ।
न विस्मरणकर्तृकास्तव वशे सदैव स्थिताः
स एव सुसमर्थको भवति येन हृष्टा मही ॥२५॥

अहो महिमशालिनी विविधभक्तसम्पालिनी
असङ्ख्यसुरमानवैरनिशलग्नभावैर्वृता ।
मदोत्कटजनैर्युताऽपि च तदत्र दत्तेक्षणा
सदैव समवर्तिनी सततसर्वमातेव सा ॥२६॥

सदैव गिरिनिर्झरैरखिलभूमिराप्लाव्यते
ततोऽवनिपतिः सदा प्रभवतीति वस्तुस्थितिः ।
असङ्ख्यविधबीजकैः क्रमवशाद्धि सम्फल्यते
ततः कृषकबान्धवैः प्रतिदिनं सुखं लभ्यते ॥२७॥

प्रशस्तधनधान्यकैः सुखसहस्रदैर्मानवा
अपूर्वमुदमाप्तयेऽवनिमिमे सदा मन्वते ।
धनार्थिभिरहर्दिवं प्रथमतो मही स्तूयते
कदापि न विसृज्यतेऽविरतमादृता मातृवत् ॥२८॥

अजस्रसुखदापनान्निखिलजीवसङ्घैर्नुता
सदैव विनयेन वै सकलकार्यसंसाधकैः ।
जनैरविरतं स्तुता स्वजननीव संसेविता
विभावनपरायणैरविरतं सुसम्मानिता ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशालजगतीस्थले प्रखरबुद्धिमन्तो बुधा-
स्तदीयसुखलाभतः प्रतिदिनं सुमोदान्विताः ।
अहर्दिवमनन्यतामनिशमाश्रयेणैव ते
नमन्ति सततं सतीं प्रमुखमानवैर्भाविताम् ॥३०॥

सदैव परितो गृहान् पशुविशेषसङ्घैर्भृशं
विचित्रमदसम्पदाऽनिशसमृद्धसद्वंशकैः ।
अपारबलसम्पदा सततवृद्धश‍ृङ्गादिकै-
रवश्यवशमागतैरहह ! लब्धमोदा मही ॥३१॥

सयत्नमनुभूयतां बुधजनैर्भुवो वैभवं
ततश्च परिदृश्यतां हृदयहारकं गौरवम् ।
विमृश्य च सुतर्क्यतामवनिमूल्यता तार्किकै-
र्विलक्षणविशेषताऽस्ति वसुधातले सज्जनाः ॥३२॥

समस्तजगतां चराचरभुवः पदार्थाः समे
महीगुणयुता भवन्ति सततं हि सा सेव्यते ।
सुरा असुरमानवाः सकलजीवसङ्घा भृशं
महीकृतकृपां स्मरन्ति नितरामिदं तात्त्विकम् ॥३३॥

महीस्थितजनैः कृतैर्यजनजैः पदार्थैर्दृढाः
सुरा अतिशयं वृढाः किमपि कर्तृकामा भृशम् ।
विचारणपरायणो न भवतु क्व को मानवः ?
क्रियारहित ईदृशः परमतत्त्वजिज्ञासुकः ॥३४॥

विलक्षणविशेषतायुतमही हि सर्वङ्कषा
न केन पुरुषेण सा विगततत्त्विका जायते ।
समस्तजगतीतलेऽवनिपदार्थविज्ञानके ।
ततश्च वसुधा सदाऽसुरसुरैर्भृशं मानिता ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्तविधजन्मिनो जगति पालने तत्परा
अनन्तरभवैर्भवैर्विविधजन्मलिङ्गागताः ।
अनन्यमनसोऽपि तेऽनवरतं गुणैः संयुता
न केऽपि परमार्थतत्त्वनिगमाय शक्ता जनाः ॥३६॥

अगम्यतमभिन्नताऽवनिजजीवसङ्घे स्थिता
स्वरूपगतमात्रभिन्नपरता न बोधेऽपि सा ।
अनन्यमनसाऽपि येऽनवरतं सुकार्ये वृता-
स्तथापि परमार्थतोऽवगमनेऽक्षमा एव ते ॥३७॥

सुलब्धपरिपूर्णतां प्रतिदिनं प्रवृद्धिं गतां
विलोक्य च निरन्तरं प्रमुदमावहन्तोऽपि ते ।
परस्परसमानता सहितकार्यसम्पादकाः
स्ववंशपरवंशजैर्विविधबान्धवैर्मानिताः ॥३८॥

धराधरविशालतां विविधवृक्षसम्बन्धिनीं
नदीषु समवस्थितिं चलनजन्यचाञ्चल्यकम् ।
प्रदर्शनपरायणाः सकलवस्तुगाम्भीर्यकं
समीक्ष्य विविधान् पुरः शतसहस्रशो नाकुलाः ॥३९॥

विचित्रबहुनासिकं त्रिभुवनं जनैर्व्यापितं
प्रदृश्यत इतीह भो विविधमुख्यता धारकैः ।
तथाऽपि न रहस्यगाः सकलसज्जनाः प्राणिनो
यदीयतनयैरपि प्रकृतिकोमलं सेवितम् ॥४०॥

समस्तपशुभिस्तथा विविध-जीवसङ्घैरपि
मनुष्यदिविजैश्च तैः प्रवरशास्त्रपारैरपि ।
न चाऽत्र कृतमेककं सुगणनीयकर्म स्वकं
क्षमस्व वसुधे जनान्न कृतमद्य यावच्छुभम् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदैव जनमानसे वसतु नित्यमूर्जस्विनि
विचित्रबलसंयुते सकलदृष्टिलक्ष्ये धरे।
क्षमा त्वमतिसुन्दरी प्रमुखदेवि मातः प्रभो
सदाऽस्तु सुहृदां मतिर्जननि ते सुकर्मान्विता ॥४२॥

सदैव मधुरा पदार्थनिवहा जनाकर्षका
निरन्तरमहो ! अनेकविधयाऽपि चित्तप्रियाः।
नृणामभिरतं रमेव शुभदा धनाऽपूर्तिका
ध्रुवा भवतु मातृका विविधदुःखहर्त्री मही ॥४३॥

समे स्वगुरुदेवता न च कदापि दुःखेक्षका
भवायुरिति जानतेऽपितु सुखप्रदाने युताः।
परोपकरणाय ते प्रतिदिनं सयत्ना ध्रुवं
सदाचरणकर्मणि प्रकृतितो वृता निश्चितम् ॥४४॥

अहो ! अदितिनन्दनैर्दितिसुतैश्च श्रद्धापरै-
रसेवि वसुधाऽनिशं जनितनिष्ठया साम्प्रतम्।
अनन्तरमिहैव साऽवनिरनादिकालात्पुरा
मनुष्यवृषभैरियं सतनयैश्च सम्मानिता ॥४५॥

व्रतैश्च सपरिच्छदैः कृतसमानपूजायुतै-
र्मही सुखकरीति बुद्धिवशतः सदा सेविता।
तदन्यजनतासु केचन खलूत्तमाः शास्त्रिणः
समादृतधरा परे किल वसन्ति भूम्यां वराः ॥४६॥

धराव्रतपरायणाः सुकृषिकर्मणां रक्षकाः
समादृततमा भवन्ति नितरां हि निश्चप्रचम्।
श्रुतिप्रमुखशास्त्रकैरवनिसम्भवैः सेविता
स्तुताऽस्ति बहुशोऽत्र किं न विदुषामहो ! गोचरम् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपेक्षितधनादिभिः क्षितिरियं हि रारक्षति
अपूर्णकृतिभिः सदा सकलजीवसङ्घैः स्तुता।
करोति नितरां बुधाः! स्वजननीव संरक्षणं-
महो ! अनभिधानकं कियदिदं धरे वर्ण्यते ॥४८॥

अभीष्टधनधान्यतः प्रतिदिनं समाजं धरा
स्वका सकलमातृका सततसर्वजीवप्रिया।
अपूर्वनिजकर्मभिः सकलपालिका रक्षिका
करोति धनधान्यकान् सततसंयुतान् सर्वतः ॥४९॥

भूमण्डलं निखिलमस्ति समस्तजीव-
सन्तानरक्षकमहो सततं सुरम्यम्।
उच्चावचं समतलं जलपूरितं च
वासस्थलं सकलजीवकृते प्रशस्तम् ॥५०॥

आचार्यप्रभपूर्णचन्द्ररचिते काव्येऽत्र श्रीशूलिनो
वैचित्र्येण युते विविक्तकविताश्रेष्ठे मनोमोहके।
काव्येऽस्मिन् द्वितयो धरागुणगणापूर्णश्च सर्गो व्यगात्
दृष्ट्वा सर्गगुणं बुधा ह्यतितरां हृष्या भवेयुः शिवात् ॥५१॥

॥ इति द्वितीयः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयः सर्गः

(शर्वस्य महीममताप्रकाशनात्मकः)

माताऽस्ति विश्वजनता समूहगा
ह्युत्पादिनी सकलजीवसंहतेः
स्नेहेन सा व्यवहृतौ सदा तत्परा
पृथ्वी सदैव ललिताऽस्ति मोदिनी ॥१॥

आनन्दसिन्धुरनिशं सुखदैव
सुक्रोडदाननिरता वशङ्करी।
नित्यं मनोरमविचित्रवस्तुदा
जीवा भवन्ति वत भोगभाजिनः ॥२॥

विश्वम्भरा भगवती सजङ्गमा
अत्रैव मानव-पतङ्ग-चतुष्पदा।
अन्ये च कीट-पशु-वानरजातिकाः
सस्थावरा विविधगुल्मपादपाः ॥३॥

वृक्षादिजीवनिवहस्य पोषिका
रक्षापरा च जगतां निरन्तरम्।
सर्वंसहा जननीव सर्वदा
पृथ्वीदृशाऽस्त्यतिसुखस्य बीजिका ॥४॥

सस्थावरेष्वपि धरास्थलेषु यज्-
ज्ञातव्यरूपविभवाः कलायुताः।
ते ते पदार्थनिवहा अनन्तकाः
सन्त्येव निश्चयमिमे मनोहराः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेषूत्तमान् गिरिनदी–नदादिकान्
सङ्ख्यातुमत्र न बुधाः सशक्तिकाः ।
शुद्धातिशुद्धजलराशिसंयुता
जीवान् सुजीवयितुमत्र वाहिताः ॥६॥

वन्यौषधि–व्रतलता–पवित्रिताः
स्थल्यः सहस्रगुणसम्पदा भृताः ।
दृष्ट्वाऽनिशं सुरवधूजनाः भृश–
माश्चर्ययुक्तवदनास्तदाऽभवन् ॥७॥

एतैर्विचित्रविभवैः सुसंयुतैः
पृथ्वी निरन्तरमहो प्रपूज्यते ।
सर्वैर्जनैः प्रतिदिनं सुनिष्ठया
संसेव्यते च जननीव दायिनी ॥८॥

पुण्यादिभिः प्रतिदिनं जननी मही सा,
सम्यक् सुशोभिततमा रमणीव दिव्या ।
सस्थावरा जङ्गम–जीवसर्वशो बुधा
आनन्दयुक्ता सततं परिग्रहैर्युताः ॥९॥

यस्मिन् दिने भूमिरियं फलाधिकैः
सञ्जायते कालवशात् समस्ता ।
हृष्यन्ति नृत्यन्ति मिलन्ति स्वीयकैः
आनन्दपूर्णाः परितः समासते ॥१०॥

एवंविधैर्बहुविधैः सजातिकै–
र्वस्तून्नतैः प्रथितधान्यसङ्ग्रहैः ।
सर्वैश्च सा भगवती वसुन्धरा
संशोभते प्रतिदिनं स्वगौरवैः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वीरहस्यमिह वेत्तुमिच्छुका
विद्वत्सहस्रमुत भिन्नमानवाः ।
आश्चर्यकारितमिमे बुधा जानते ।
धीराः समाजनिपुणा इलां प्रवेदिनः ॥१२॥

आश्चर्यकारि-विविधैः सहस्रकै-
र्वस्तुस्थितिर्ह्यतिशयं विदूरगाः ।
विज्ञा अपि प्रतिदिनं पराजयं
स्वीकुर्वते जगति नात्र चित्रकम् ॥१३॥

पृथ्वीगुणान् गणयितुं सयत्नका
जनाः सदैव लगिता अपि त्रिधाः ।
सद्वंशजा विविधशास्त्रबोधकाः
सम्यक्तया सपदि कम्पिता ध्रुवम् ॥१४॥

माहेय-नैजसकलान् पदार्थका-
नाह्लादिकाऽस्ति जननीव रक्षिका ।
अत्याज्यतां वहति नित्यमूर्जिता
पृथ्वी सदा विजयतेऽतिशायिनी ॥१५॥

भक्ष्यान्नपेय-जल-वित्तदा सदा
वासो वसान-सुख-सन्ततेः प्रदा ।
दैनन्दिनान् रुचिकरान् पदार्थकान्
दत्वैव रक्षति निरन्तरमत्र सा ॥१६॥

सांसारिकाः सततवंशपालका
जीवाः सदा वसुमती-सुपोषिताः ।
अज्ञानजन्यविविधैः कलापकै-
र्दुःखं कदाचिदवशाः प्रलेभिरे ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृशैर्विविधरीतिभिः श्रिता
पृथ्वी समस्तजनताभिरादृता।
तस्याः खलूत्तमधनादिवैभवै-
रानन्दिताः सकलजीवचया भृशम् ॥१८॥

द्रव्यैः सदैव परिपूरिता जना
भोगार्थलब्ध-विभवा अचिन्तकाः।
आदाय भोग्यविषयान् सुसौख्यदान्
संशेरतेऽनुदिनमत्र मानवाः ॥१९॥

कैवल्यलब्धिविषये ह्युदासीनकाः
पुत्रादि-सन्ततिवितान-लीनकाः।
अर्थोऽस्तु नः सततमत्र केवलं
तेनैव सिध्यति वदन्ति भोगिनः ॥२०॥

चैतन्यनेमसहिताः प्रजन्तवः
भोगार्थमेव जनिलब्धतया नः।
अन्योन्यलग्न-मनसो निरन्तरं
संशेरते प्रतिदिनं सुखावहाः ॥२१॥

सर्वैर्जनैर्विविधजीवजातिकैः
पृथ्वीसमुत्पतितवित्तयोषितैः।
नित्यं हि भूमिभववस्तुपरीक्षकै-
र्नैवात्र तृप्यत इदं जगत् सदा ॥२२॥

यस्यां सदैव सुखलब्धजीवना
आनन्द-मग्नमनसः सदा प्रियाः।
अन्योऽन्यबद्धममतानिरीक्षका
संसारसौख्यसहिता जयन्ति ते ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्योऽन्यघातिन इह प्रधानतः
केचिद् विलोकनपथे समागताः ।
जायन्त अग्रतरगाः समन्ततो
दृश्यं विचित्रमिदमस्ति दुःखदम् ॥२४॥

इत्थं विचित्रचरिता विमानिनो
मर्त्या मिलन्ति कतिचिच्च भूतले ।
तेऽप्यत्र सौख्यवसवः प्रगर्विणः
सन्तीति चित्रमिदमस्ति कौतुकम् ॥२५॥

सञ्जातवैरबलवन्त उद्धता
जङ्घन्यमानरिपुसम्मुखे स्थिताः ।
अन्योऽन्यमारणरणैः सहस्रशः
क्रीडापराः प्रबलशत्रुघातिनः ॥२६॥

केचिज्जलेऽपि बलशालिनः खलु
सार्कतिमिङ्गिलगिलैः स्थितास्तथा ।
नित्यं निगीरणकृतौ सुजीविनां
सुप्रक्षमन्त इति कौतुकं किल ॥२७॥

भूमण्डलेषु विविधेष्वनेकशो
दृश्यानि दृष्टिपथमाप्रयान्ति च ।
नैवाऽत्र काऽपि सुविचित्रता खलु
लोकः समभ्यसनशील ईदृशः ॥२८॥

भूमण्डलं त्रिविधमस्ति निश्चितं
किञ्चिच्च भूरिजलराशिकं ध्रुवम् ।
अन्यद्धि नेमजलजाल-संयुतं
तद्भिन्नभू-विवरभाग-विप्लुतम् ॥२९ ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूकम्पजातघनघोरतायुतं
जातप्रकम्पविविधैश्च सद्धितम्।
प्रस्खलद्गिरिग्रावमृदङ्कितं पुरः
सङ्कल्यते प्रलयजन्यरीतिकम् ॥३०॥

क्रान्तिप्रदाचलदृषद्भिरूर्जितं
सन्दृश्यमानघनघोषणं दृढम्।
आकृष्टभूरिशकलेषु दुःस्थितिः
सन्दृश्यते सकलजीवघातिनी ॥३१॥

आनन्ददानकुशला वलाहकाः
संवर्तकाल इह भीषणा रवाः '
नैवाऽत्र केऽपि सुखिनो निरन्तरं
दैवात् कदाचिदिह काल आपदः ॥३२॥

सम्पूर्ण-विश्व-गत-देशगोचरे
नानाविधाः प्रलयसन्निभाः क्रियाः।
विश्वं समस्तममलं न सर्वदा
सन्दृश्यते विफलकारिदृश्यकम् ॥३३॥

आशंसमान-जनताः प्रतिक्षणं
नैवाऽत्र दृष्टिपथगाः प्रियाऽखिलाः।
कर्तव्यकर्मपरताऽस्ति सर्वदा
तेषामसौ परिचयोऽस्ति नेह रुक् ॥३४॥

एतैर्विशिष्टविभवैर्निरन्तरं
युक्ताऽस्ति पूज्यजननीव नित्यशः।
सर्वंसहा वसुमती सजीवका
मान्या सदैव सुखदा महाधना ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अद्यैव मे विमलमानसं महि !
त्वय्येव संविशतु नाऽत्र चित्रता।
सर्वस्य सौख्यबलदानदृष्टिदा
ह्यानन्दसिन्धुरखिलाऽसि निश्चितम् ॥३६॥

पृथ्व्याः सदैव महनीयता खलु
ज्ञेयाऽस्ति सर्वमनुजैर्न संशयः।
रात्रिन्दिवं प्रभजमानमानिभिः
सम्प्राप्यते सुतनयादिकं वसु ॥३७॥

अत्यन्तसिद्धिदधुरन्धरा मही
संसेव्यवस्तु-करदान-धर्मतः।
आस्वाद्यवस्तु-करदानकर्मणा
संराजते जगति मूल्यवत्तया ॥३८॥

जना अजस्रमिह ते वशे स्थिता-
स्त्वां सन्नमन्ति नितरां प्रतिक्षणम्।
त्वद्वस्तुलम्भनकृत-प्रयत्नकाः
सेवापराः प्रतिदिनं हि तावकाः ॥३९॥

मातस्त्वमेव जगतां नितरां हि
रक्षापराऽसि सततं च संहतेः।
माता यथा सकलजीवरक्षिका
तादृक् तवाऽस्ति चरितं दृढं सदा ॥४०॥

रक्षापरा त्वमसि सत्यमस्ति यत्
तेनैव मातृकधिया नता वयम्।
आनन्दभूमिरसि सर्वदेहिनां
रात्रिन्दिवं तव वशे स्थिता वयम् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आनन्दशेवधिरसि त्वमेव नः
प्राणप्रदाऽसि नितरां चराचरे।
क्ष्माभृत्कथाऽस्ति गिरिषु प्रचण्डतो
जाताऽस्ति किन्तु महीधृता अचला ॥४२॥

यथा कीर्तितं क्षोणिमाहात्म्यजातं
तथा वर्णितं श्रीधरावैभवं तत्।
गृहीत्वा बुधाः सम्प्रति प्रेक्षकत्वा-
द्विचिन्वन्तु सारं कृतौ विद्यमानम् ॥४३॥

धरैवाऽस्ति धात्री सदा प्राणिनां सा
दृढाऽऽधारभूता समस्तेऽपि लोके।
इयं सर्वसम्पत्तिदा प्राणिवर्गे
समाराधका यान्ति सर्वोच्चतां ते ॥४४॥

आचार्यप्रभवपूर्णचन्द्ररचिते पुण्यप्रदे शाम्भवे
वैलक्षण्ययुतेऽत्र मञ्जुकविताज्येष्ठे मनोमोहके।
काव्येऽस्मिन् मधुरस्तृतीयवसुधासर्गो व्यगात् सम्प्रति
यंवीक्ष्यैव बुधाः सदैव सुखिनः स्युर्देवदेवाधिपात्॥४५॥

॥ इति तृतीयः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थःसर्गः

(महीसर्वोत्कर्षकथनात्मकः)

शैलश्रेणीभिः शोभते सर्वभूमि-
र्नानावर्णैस्तैर्मानवैः सेव्यमाना।
ऐश्वर्येणैवं युक्तसर्वे विभगा
माता सर्वेषां काश्यपी वैश्वदेवी ॥१॥

पक्वैर्धान्यैः फुल्लैः सुमैः सर्वसेव्या
शोभां दिव्यां प्राप्नोति सा सर्वभूमिः।
संशोभन्ते भौमा मनोहारिणस्ते
आम्राद्या वृक्षाः सन्ततं सर्वदैव ॥२॥

भू-भागाः सर्वे काननैः सज्जमानाः
पार्वत्याः स्थल्यः प्रत्यहं शोभमानाः।
दूरस्थाः शैला रम्यमाणा भवन्ती-
त्येवं लोकोक्तिः नैव सार्वत्रिकी सा ॥३॥

पार्वत्या रम्यश्रेण्य एवातिदृश्या
नानाजीवैस्ताः सङ्कुलाः सर्वदैव।
शोभां द्रष्टुं ये मानवास्तत्र यान्ति
दर्शं दर्शं वै हर्षिता नित्यशस्ते ॥४॥

आलस्यग्रस्तैर्मानवैः पर्वतेषु
दोषारोपोऽवश्यं ह्यकारि प्रबुद्धैः।
सम्प्रत्येव प्रेष्ठैः सर्वथा चाद्य सत्यं
खण्डः खण्डः कार्योऽस्ति जानन्तु विज्ञाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यैर्मर्त्यश्रेष्ठैः केवलं शैलहीना
भूमिर्दृष्टा तैः सत्यतः श्रेष्ठदृश्यम्।
सर्वत्रावश्यं नैव लोके प्रवीणा
ग्राह्यात्सर्वैर्दृश्यावलोकेऽचलाश्च ॥६॥

वीरुद्गुल्मानां सम्पदो या भवन्ति
ताभिर्नित्यं या जायते भव्यशोभा।
यास्ताः पृथ्वीस्था नैकशो ज्ञायतेऽत्र।
शोभाढ्या भूमिः सर्वजीवस्य देहा ॥७॥

सम्पूर्णे विश्वेऽस्मिन् यया वृत्तिहेतौ
भूवाताम्बूनां शुद्धितो लोकरक्षा।
न्यग्रोधा बिल्वा प्लक्षवृक्षाः सदैव
सम्पाल्यन्ते नित्यं समे तेऽधुनापि ॥८॥

गोलीढैरण्डासारवल्ली-समङ्गाः
कर्कन्धू-घण्टा-सौषधीनीप-काश्र्याः ॥
अश्वत्थाक्षोटाः शालका व्याघ्रपुष्पा
भूतावासा कौ कट्फलारिष्टयूपाः ॥९॥

ब्रह्मण्योद्दालौ शुद्धिदानाय वृक्षौ
वीरुद्गुल्माद्यैः शाकभेदाश्च नित्यम्।
स्वास्थ्यं सौन्दर्यप्राप्तिहेतौ सुवेद्या
सर्वेषामेषामौषधीनां प्रयोगात् ॥१०॥

लोके सत्यं कीर्तिं सदा प्राप्नुवन्ति
तेषां वैद्यानां कीर्तिमूलानि वृक्षाः।
वृक्षा एवैते कालतः सर्वपूज्याः
सर्वैः भूमौ कार्या तरूणां सुरक्षा ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं कार्यश्रेष्ठेन शोभायमाना
मान्याः सर्वे मर्त्याः सुजीवन्ति दीर्घम्।
स्वीयानां बन्धूनाञ्च नित्यं सुसेवां
कृत्वा दीर्घं कालं सुसौख्यं लभन्ते ॥१२॥

संशोभन्ते वै सर्व एव त्रिलोक्यां
वृक्षाऽरोपे व्यग्रा मनुष्याः सदा ये।
ते वै कालस्य क्षेत्रके नैव यान्ति
सर्वश्रेष्ठायां सङ्गतिक्यां वसन्ति ॥१३॥

वृक्षारोपः श्रेष्ठकार्येषु चोक्तः
कुलीनाः श्रद्धधते कार्यमेतत्।
सर्वैः शास्त्रैः शस्यते वृक्षरोपी
पञ्चाम्ररोपी नरकं न याति ॥ १४॥

अद्रिश्रेणीभिः शोभते दिव्यभूमिः
शैलाः फुल्लैः पुष्पैः काननै राजमानाः।
पुष्पाधिक्यैर्वै काननानि प्रकृष्टैः
संराजन्ते राजेव नित्यं सुविज्ञाः ॥१५॥

दीर्घारण्यानि प्रायशो यत्र सन्ति
तान्येवाऽन्यासां भूस्थितीनां मुकुन्दाः।
वृक्षा यैर्नित्यं प्राणिनां शुद्धवायुः
सन्दानश्रेष्ठेन प्रकृष्टेन युक्ताः ॥१६॥

वृक्षाद्यैः पुष्पैः साधिकैस्तैः फलाद्यै-
र्वस्तुप्राशस्त्यान्मातृका भूमिराख्या।
पृथ्वीका वृक्षास्तोयलब्धा बलिष्ठाः
स्वच्छा द्रष्टव्याः प्राणिभिस्तैरजस्रम् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

फुल्लैर्वृक्षैस्तैः पर्वताः शोभमाना
ग्रामाः पुर्यस्ताः सर्वथा रोचमानाः ।
भूर्वाताम्बूनां शुद्धिहेतोः सदैव
नोद्युक्ताश्चेत्ता ग्रामपुर्यो विनष्टाः ॥१८॥

वासायोग्यास्ता जायमानाः सदैव
तद्वृद्धेर्हेतोर्नित्यशः चिन्तनीयम् ।
पर्यावृत्त्यर्थं ते सदाऽपेक्ष्यमाणाः
सर्वैर्नित्यं ते रक्षितव्याः सुविज्ञैः ॥१९॥

वृक्षाणां मूलानि प्राश्रये प्रार्थयद्भिः
सम्प्रेक्ष्यन्ते मर्त्यैः स्वीयजात्यर्थमत्र ।
लोकानां कल्याणार्थमात्माप्तिहेतो-
रेतैः प्रामाण्यस्रोतसां वृन्दमीशम् ॥२०॥

तस्मात् सर्वैर्मर्त्यैः सदा चिन्तनीयं
सर्वैर्नित्यं वृक्षाः सुपाल्या हितार्थम् ।
नित्यं वृक्षाणां सेवनादेव मर्त्या
भौमं सौख्यं वृक्षात् सदा संलभन्ते ॥२१॥

एतादृग्भिः कार्यैः सुदीर्घायुषस्ते-
ऽवश्यं सञ्जायन्ते न कापि प्रशङ्का ।
सम्पूर्णे विश्वमानवैस्तैः सदैव
कल्याणं चिन्त्यं सर्वतः सर्वलोकैः ॥२२॥

येनाऽत्र क्षेत्रेषु प्रधाना मनुष्या
आयुःस्वास्थ्यश्रीभोगयुक्ताः समे स्युः ।
लोकानां सङ्घातैस्तत्परैः कार्यमेतद्
ध्यानं दत्त्वाऽवश्यं विधातव्यमेव ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आकाङ्क्षा भूयाच्चेत् सदा तस्य पूर्तिः
कार्यैवाऽवश्यं लोकनाथैः समन्तात्।
प्रत्येकग्रामेऽवश्यमात्मीयभावात्
पुर्यां पुर्यां वै सर्वसौख्याय लीनाः ॥२४॥

नो चेत् सर्वे ते यान्ति कार्यात् प्रमादं
प्राथम्यं प्राप्ता ये पदार्था इदानीम्।
संलभ्यन्ते ते वै सदाऽवश्यमेव
रक्ष्याः सद्भिर्नाऽत्र प्रमादः प्रकार्यः ॥२५॥

प्रत्येकग्रामेऽवश्यमात्मीयभावो
लोकैः सर्वप्रीत्यै प्रयत्नो विधेयः।
नो चेल्लोके सञ्जायते घोर-चिन्ता
स्थित्यां तस्यां द्राक् रोषलब्धिः सदा स्यात् ॥२६॥

प्रत्येकग्रामे मानवैः युक्तियुक्तै-
र्नैरन्तर्यद्धि व्यस्तता संविधेया।
पुर्यां सञ्जाता मानवा नित्यमेव
पुष्ट्या सन्तुष्टा नष्टदुःखा भवन्ति ॥२७॥

सङ्ख्यातीतैस्तैर्दिव्यभावैः सदैव
कैवल्याप्तौ सा सर्वथा स्वीयभूमिः।
भूस्वर्गीयाणां स्वर्गभूता सुरम्या
आनन्दाऽनन्त्यं प्राप्य सर्वे रमन्ते ॥२८॥

लवसुखकरकार्येऽनिशं जीविनः
शरणरहितपीडाकराः पापिनः।
कृतबहुविधयत्नैश्चुराकारिणः
सुजननि वसुधे क्षमस्व तान् सदा ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगदिदमखिलं ते प्रशस्तिप्रियं
विविधसुखयुतं प्रोन्नतिं सङ्गतम्।
जनहितकरणैः सेविनः केचन
त्वयि निहितसुखैर्जानते त्वां ध्रुवाम् ॥३०॥

नमनशतयुता स्नेहतो नामिता
करयुगलधृतैः पुष्पपुञ्जैर्युताः।
अनवरतसुखाः सन्ततं तावकाः
सपदि पृथिविमातर्नयास्मान् सुखे ॥३१॥

अतिमधुरफलैः सन्ततं तावकाः
प्रणतिततियुता बन्धुभिर्भावतः।
परिजनशतशः प्रत्यहं सङ्गता-
स्तव शरणगता नैव ते दुःखिनः ॥३२॥

सततशत्रुजनैश्चापि सम्पूजिता
स्वनिरतिशयजैर्भावनैर्विग्रहैः।
प्रखरमतिमतां ध्यानशुद्धिर्युतै-
र्मनसि परिगता मानिनी जायते ॥३३॥

मनसि परिगता मानिनी मातृका
निरतिशयधिया भावनाथसंस्थिता।
प्रखरमतिमतां शुद्धियोगे स्थिता
दृढमतिमनसो मानवास्त्वां नताः ॥३४॥

अवनिरमरमान्या स्तुता तैः सदा,
दनुजगणशतैश्चाऽनिशं पूजिता।
अभिमतनिखिला मातृकेव प्रिया
शुभगुणगणलीना धरां त्वां वृताः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिदिनसुखदा भक्ष्यपेयप्रदा
यदधिगतसुखैर्नित्यलब्धैर्भृशम्।
अधिगतशुभलाभा मानवाः सदा
परमसुखयुताः प्रार्थयन्तेऽवनिम् ॥३६॥

समधिकसुरतैर्मानवाद्यैर्जनैः
प्रतिदिवसनुतैश्चाभितो नन्दिता।
कृषकगणवृता तैश्च संराधिता
जगति सुवसुधा क्ष्माऽधिकं शोभते ॥३७॥

विधिविधुविबुधैर्नित्यसंसेविता
मुनिजननिवहैः प्रत्यहं पूजिता।
वनतरुशतकाकर्षकैश्चाऽऽवृता।
अगणितसुखदा प्राणिनां प्रीतिदा ॥३८॥

निरन्तरमभितः प्राकृतैर्जन्तुभिः
सततपरिवृता प्राणदात्री सदा।
वनतरुरुचिरा भोगदा प्राणिनां
जलधिशतजलैः सिञ्चिता प्रौढितः ॥३९॥

सुवलयसरिता निर्झरैरङ्किता
नयनसुखकरा मातृकावत् स्थिता।
विविधकृषियुता फुल्लपुष्पाञ्चिता
भ्रमणनियतिकैः प्राणिभिः प्रार्थिता ॥४०॥

विधिहरिहरदेवैः सदा सेवनैः
सकलसुरनरैश्चाऽपि भूरादृता।
शरणमितसुखा प्राणिसङ्घप्रिया
नियतसमयवारिदानां निधिः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधिकतरसमृद्धैर्जनैः सेविता
रुचिरमणिगणै रत्नराश्यन्विता।
सकलजननता सिद्धलोकैः स्तुता
गुरुतरकलयुक्ता सुद्रूणां पालिनी ॥४२॥

तव शुभनिकटे प्रत्यहं सङ्गता
निरतिशयमहो नन्दिता नित्यशः।
हतरिपुशतशः सर्वदैवाऽश्रिता
धरणि रसमिते रक्ष सर्वाञ्जनान् ॥४३॥

पतगपशुकुलैः सर्वतः सेविता
गजशरभवनैः सिंहयूथैर्वृता।
शकुनिकलरवैर्नित्यशो गुञ्जिता-
ऽतिशय-सुषमा मानिनां मानदा ॥४४॥

प्रतिदिनसुखदा भक्ष्यपेयप्रदा
बहुलजनयुता प्राणिसङ्घैर्नुता।
व्रतिततरुवरैः सन्ततं रञ्जिता
गिरिवरसुझरैः सर्वदा शोभते ॥४५॥

अधिकफलधराऽऽस्वादिभिः संवृता
सुमधुररवयुक्तैः पतङ्गैः स्तुता।
प्रतिपतगसुखा सर्वदाऽऽराधिता
परिजनसुखदैर्मानवैः सङ्गता ॥४६॥

समजननि धरे क्रोडके ते समैः
सततमभणितं दोषजातं बहु।
इयमतिशयिता प्रार्थना ते पुरः
सकलजनकृता प्रीतितो गृह्यताम् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमितगिरिवरैर्वृक्षसङ्घैश्च या
बृहदुदधिशतैर्यत्रतत्रैव तु।
शततपरिवृता त्वं सदा शोभसे
त्वगणितमहिमत्वाच्च सर्वे जिताः ॥४८॥

सततपतनशीलैर्झरैः सर्वतो
भ्रमरकलरवैर्गुञ्जिता मोहिनी।
कुसुमिततरुभिः पुष्पगन्धैर्युता
भ्रमणरसिकजीवैर्वृता सर्वतः ॥४९॥

बहुसुरभियुतैर्नैकधा वन्यजै-
र्हरितवनभवैर्भूरिघासावृतैः।
अगणिततरुभिः प्रत्यहं प्रार्थिता
बलकरवसुधा सर्वदा राजते ॥५०॥

क्रयनिरतजनाः सर्वदा व्यावृताः
समणिगणपदार्थश्रितप्रज्ञकाः।
प्रतिदिनमिह ते विक्रमं जानते
स्वकुलभवजनान् सर्वथा पान्ति ते ॥५१॥

अतिशयितगुणैः सर्वदा संयुता
बहुतरवसुधा क्ष्मा सर्वजीवाश्रिता।
अचरचरसजीवा पदार्थैर्युता
निरतिशयसुखा सर्वरक्षाप्रदा ॥५२॥

अजडजडयुता प्राणिवस्तुश्रिता
सकलकुलधरा भूमिरानन्ददा।
असुगतगणपा वस्तुसंरक्षिका
निखिलशरणदा राजसे प्रत्यहम् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गिरितरुविपिनैर्वारिवेगैः सदा-
ऽतिशयपरिवृता सर्वसौख्यप्रदा।
मुनिवरनिकरैश्चिन्तिता ध्यानतः
सुजननि वसुधे त्वां नताः स्मो वयम् ॥५४॥

वसुमति वसुधे सर्वजीवाश्रये
सुदृढधनविभूत्या सदा पालिके।
त्वमसि शरणदा सर्वजीवस्य वै
तव शरणमिताः स्मो वयं मातृके ॥५५॥

त्वदवनशरणं लब्धवन्तो वयं
निरतिशयसुखं नित्यलब्धा ध्रुवम्।
वयमिह पृथिवि त्वाश्रिताः सर्वदा
ऽतिशयविभवा त्वत्करक्षावृताः ॥५६॥

अदितिदितिसुतैर्नित्यमाश्रितै-
रभिमतविषये सेव्यसे त्वं सदा।
तव गरिमभवं तैजसं वीक्ष्यते
प्रतिदिनमितस्तावकैः स्वैर्युताः ॥५७॥

ऋषिमुनिमनुजैस्त्वत्समाराधकैः
प्रणतिविनतिकैः संस्तुता सर्वदा।
अबलसुबलदे रक्षिके मातृके-
ऽगणितविभवदे त्वां नताः स्मोऽनिशम् ॥५८॥

जननि बहुमते त्वत्ककृत्ये तत्परै-
र्निरतिशयसुखाप्तौ सदाऽऽराधिते।
प्रणतसुशरणे त्वां वयं संश्रिता-
स्त्यज न जननि नस्त्वत्कभक्तान् खलु ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथिवि तव सुखैः संयुताऽऽयैर्विलग्नैः
परित इह रताः सारवन्तो जनाः ।
त्वयि कृतबहुनिष्ठा त्वदाशक्तकाः
समधिकसुखदां त्वां प्रजानतेऽद्य ॥६०॥

अगणितविविधद्रव्यजातैर्वृता-
ऽचरचरगणपुण्यार्पिता सर्वदा ।
भृशमिह जनता-निर्भराऽम्बे त्वयि
निरतिशयसुखं त्वत्त एते श्रिताः ॥६१॥

अदनरसभवैर्भक्ष्यपानाश्रयै-
र्विविधसुरसलेह्यैर्द्रव्यजातैर्युतम् ।
अमृतमयसुखाद्यमाप्तवन्तो जना
निरतिशयसुखं प्राप्य संशेरते ॥६२॥

अगणितवस्तुसङ्ग्रहरसैरभितो वसुधा
ह्यभिमतलब्धिभूमिरनिशं सकलैः सुनुता ।
अतिशयमत्रदेवमनुजैर्निरतं सुगता
क्षितिमिह मानवामरगणाः प्रणमन्ति सदा ॥६३॥

जय जय हे धरे त्वमवनाय निरन्तरं
दृढतरमात्मवीर्यनिचये सततं लगिता ।
अनुगतमानजातरुचिभिर्विदन्ति जना-
स्तव बलवीर्यसौरभस्तवं विनिगम्य रताः ॥६४॥

विमलकुलीनमानवसहस्रसमूहनुते
तव गतिलब्धये प्रयतनं प्रकुर्वते जनाः ।
अधिकतया तवैव परमे मृदुले सुखदे-
ऽवनरसवाहिनं मनुजनायकशतम् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अबलिन एव ते वत निरन्तरमाश्रयणं
विदधति निश्चितं तदिह वस्तु हृदं कथितम् ॥
सबलमनुष्यजातिरभितो धनलब्धिवशा-
दनुदिनमत्र सा विरमति प्रखराद् विभवात् ॥६६॥

समरसयुग् धरा समसुखा सततं समतां
विदधति नाऽत्र कोऽपि मनुजोऽन्यथयन्तुमलम् ।
तव समतां विलोक्य सततं त्वयि निर्भरतां
वितनुत एव मानवशतं सततं निरतम् ॥६७॥

अवनि विविधभूषाजातसूर्यादिलोकाः
प्रतिदिनमिह सन्ति क्षोणिसौन्दर्यभूताः ।
इतरमितरमत्राऽन्योन्यसाहाय्यकार्या-
द्यनुदिनमुभये स्वर्भूर्भवाः शं लभन्ते ॥६८॥

स्वरतिशयितसौख्यं प्राप्य सर्वे मनुष्या
अवनिगुणगणैस्तैः प्राप्य दिव्या विभूतीः ।
अतिशयसुखपुञ्जैर्हासिकाः स्वर्गलोकं
सुखजलधिनिमग्नाः सर्वदा रारमन्ते ॥६९॥

आचार्यप्रभपूर्णचन्द्ररचिते पुण्यप्रदे शाङ्करे
सम्यक्चित्रयुते मनोज्ञकविताश्रेष्ठे जगन्मोहके ।
काव्येऽस्मिन् मधुरश्चतुर्थधरणीसर्गः समापूरितो
यं ज्ञात्वैव बुधा सुलब्धसुखिनः स्युर्देवदेवाधिपात् ॥७०॥

॥ इति चतुर्थः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चमः सर्गः

(पृथिव्याः सर्वपोषकतानिरूपणात्मकः)

माताऽस्ति विश्वजनतासमूहगा
सूत्पादिका सकलजीवसन्ततेः।
स्नेहेन सा व्यवहृतौ सतत्परा
पृथ्वी ध्रुवं सततदुःखनाशिका ॥१॥

आनन्दसिन्धुरनिशं सुखदैव सा
सुक्रोडदाननिरता वशंकरी।
नित्यं मनोरमविचित्रवस्तुभि-
र्जीवा भवन्ति वत सौख्यभागिनः ॥२॥

विश्वम्भरा भगवती सजङ्गमा-
स्तत्रैव मानवपतङ्गपक्षिणः।
अन्ये च कीटपशुवानरमृगाः
सस्थावराश्चित्रगुल्मपादपाः ॥३॥

वल्यादिजीवननिवहस्य पोषिका
रक्षापरा च जगतां निरन्तरम्।
सर्वंसहा स्वजननीव सर्वदा
पृथ्वीदृशी भवति मान्यसर्वदा ॥४॥

सस्थावरेष्वपि धरा रक्षतीव सा
जायेत द्रव्यविविधाकलायुता।
ये ये पदार्थनिवहा अनन्तका-
स्तेषां सदैव सुखदा सुरक्षिका ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेषूत्तमान् गिरिनदीनदादिकान्
संख्यातुमत्र न बुधाः शशक्तिकाः ।
शुद्धा विशुद्धजलराशिसंयुताः
सन्त्येव दुःखहरणार्थमनादितः ॥६॥

एतैर्विचित्रविभवैः सुसंयुता
भूमिर्न कस्य भवति प्रपूजिता ।
सर्वैर्जनैः प्रतिदिनं प्रपूज्यते
विज्ञायते च सकलैस्तु मञ्जुलम् ॥७॥

एतैरसङ्ख्यविभवैः सुसंयुता ।
पृथ्वी न कस्य भवति प्रपूजिता ।
सर्वैर्जनैरनुदिनं सुसेव्यते
सैवेति निश्चितमिदं व्यवस्थितम् ॥८॥

एवंविधैर्बहुविधैः सजातिकै-
र्वस्तूत्तमैः प्रचितधन्यता युता ।
सर्वार्थदे भवति सक्षमा धरा
जानन्ति भुवि भवमेव कोविदः ॥९॥

भूगौरवं विबुधबन्धु-संहति-
र्विज्ञाय सर्वविषयान् न वेत्ति सा ।
आश्चर्यकारिकतया प्रवेत्ति च
निश्चप्रचं विबुधसङ्घ ईदृशः ॥१०॥

आश्चर्यवद्विविध-वस्तु-कोटिकैः ।
सञ्जायमानविषयैरहर्निशम् ।
पृथ्व्यां सदैव निजवंशभवा जनाः
सम्यक्तया समनुकम्पितास्तथा ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भौमाँश्च जीवनिवहान् निरन्तरं
साऽऽह्लादिका स्वजननीव सर्वथा।
अत्याज्यतां वहति नित्यमूर्जिता
वासान्नपेयजलवित्तदा सदा ॥१२॥

सांसारिका सतत-वंश-पालका
जीवाः सदा निधिशतैः सुपोषिताः।
अज्ञानजन्यविविधैः कलापकै-
र्दुःखं कदाचिदवशाः सुतन्वते ॥ ॥१३॥

एतद् विभिन्नविधजीवसेविता
पृथ्वी समाऽस्ति सकलस्य जीवने।
तस्याश्च सम्यगनुमन्यवैभवे
संशेरतेऽधिकजना निरन्तरम् ॥१४॥

यैर्यैर्जनैः सकलजीवजातिकैः
पृथ्वीपरायणसुखानुभावकैः।
नित्यं हि भूमिभववस्तुसेवकै-
स्तैरत्र त्यज्यत इयं न कुत्रचित् ॥१५॥

यस्यां सदैव लब्धजन्मका जना-
आनन्दमग्नमनसो निरन्तरम्।
अन्योऽन्यबद्धममताः परीक्षका
नैवाऽत्र कोपकरणेऽपि वर्तिनः ॥१६॥

अन्योऽन्यघातिन उदासना जनाः
सन्दृश्यमानकतिचिच्च मारकाः।
इत्थं विचित्रचरिता असङ्ख्यका
जीवावलोकनपथे प्रयान्ति ते ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सञ्जातवैरबलवन्त उद्धता
जङ्घन्यमानरिपुसम्मुखे स्थिताः ॥
अन्योऽन्यमारणरणैः सहस्रशः
क्रीडापराप्रबलशत्रुघातिनः ॥ ॥१८॥

किञ्चिज्जलेषु बलशालिनः खलु
साकं तिमिङ्गिलगिलैः स्थितास्तथा ।
नित्यं निवारणकृतौ च जीविनां
सुप्रक्षमन्ति नितरां प्रवैरिणः ॥ ॥१९॥

भूमण्डलेषु विविधान्यनेकशो
दृश्यानि दृष्टिपथमाप्रयान्ति च ।
नैवाऽत्र काऽपि सुविचित्रता खलु
लोकः समभ्यसनशील ईदृशः ॥२०॥

भूमण्डलं विविधमस्ति निश्चितं
किञ्चिच्च भूरिजलराशिकं बृहत् ।
अन्यद्धि न्यूनजलराशिकं पृथु
तद्भिन्नभूविवरभागविप्लुतम् ॥ ॥२१॥

भूकम्प-जात-घनघोरतायुतं
तीव्रातिचण्डभयविप्लुतजीवकम् ।
भूमण्डलं क्षतमृदङ्कितं पुरः
सङ्कल्प्यते प्रलयकालमेदिनी ॥२२॥

विध्वंसकारिचल-प्रस्तरघूर्णितं
सन्दृश्यमानघनदुर्दिनायितम् ।
आकृष्टभूरिशकलेषु घट्टनं
संश्रूयतेऽथ च दृश्यते भृशम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आनन्ददायिन इह प्रथिताऽभ्रकाः
संवर्तकाल उत सूचका भृशम्।
नैवाऽत्र केऽपि सुखिनो भयङ्करे
काले कदाचिदिह केऽपि रक्षिताः ॥२४॥

सम्पूर्ण-विश्व-गतदेश-गोचरे
नानाविधाः प्रलयसन्निभाः क्रियाः।
विश्वं समस्तममलं न सर्वदा
सन्दृश्यते विफलकारिविप्लवः ॥२५॥

आशंसमानजनता प्रतिक्षणं
नैवाऽत्र जायत इयं सुदुःखिता
कर्तव्यकर्मपरता सदैव हि
तस्या असौ परिचयोऽस्ति न तत्र रुक् ॥२६॥

एतैर्विशिष्टविविधैर्निरन्तरं
युक्ताऽस्ति पूज्यजननीव मेदिनी।
सर्वंसहाऽस्ति सततं यथार्थतो
मान्या सदैव सुखदा न संशयः ॥२७॥

अद्यैव मे विमलमानसं महि !
त्वय्येव संविशतु नाऽत्र मे भयम्।
जीवात्मनां बलधनादिकं सदा
दत्त्वाऽतिमात्रममला वसुन्धरा ॥२८॥

धत्र्याः सदैव महनीयता भृशं
ज्ञेयाऽस्ति सर्वजगतां न संशयः।
रात्रिन्दिवं प्रभजमानमानिभिः
सम्प्राप्यते तनयवल्लता खलु ॥ २९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्यन्तवृद्धिदपदार्थपूरिता
सुस्वादुवस्तुविविधप्रदायिनी ।
त्वद्वस्तुलम्भनसुकर्मणि श्रितं
पुण्यात्मवृन्दसकलं विभूषणम् ॥३०॥

मातस्त्वमेव न इहासि रक्षिणी
वस्तुप्रदाय मतसम्मतं सदा ।
माता यथा सकरुणाऽत्र जीविनां
रक्षारता त्वमपि सर्वदा तथा ॥३१॥

आनन्दसिन्धुरसि सर्वसाक्षिणी
प्राणप्रदाऽसि जगतां निरन्तरम् ।
क्ष्माभृन्निगद्यत इहाद्रिरश्मकः
किन्तु त्वमत्र वहसि ध्रुवं तकम् ॥३२॥

जगति शुभे समे सतत–कामनापरा
जननिवहा भृशं विविधवस्तुसङ्ग्रहे ।
प्रतिदिनमामनन्ति सुलघु–प्रभद्रकं
निरतिशयं मही सुबलमादधातु माम् ॥३३॥

अवनितलेऽस्ति सर्वविधमौषधं खलु
यदि नरैः सदाऽभिमतवस्तु काङ्क्ष्यते ।
लघु तदिहैव पूर्यत इति प्रभद्रक–
मसफलमानवो वसुमतीं न सेवते ॥ ३४॥

विभवगणाः समे वसुमतीतले स्थिता
इति सततं विदन्ति निखिला जना ध्रुवम् ।
तदपि न ते महीं सरभसा ह्युपासत
अखिलमहो ! अनन्तसुखमेव वाञ्छति ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मणिनिचयैरनेकगिरयः प्रपूरिता
विविधनिधिस्थितेषु रजतेषु हेमसु।
न मिलति सर्वथा सततं रहस्यता
कति कति सन्ति वित्तनिचयाः क्षितेरिति ॥३६॥

उदधिभिराश्रिता सुवसुता क्षितौ ध्रुवा
जलनिधिरस्ति रत्नाकर इति प्रथायुतः।
सुदधाति मङ्गले जगति सत्यनामकं
जनितमिदं रहस्यसुनिरूपकं विधम् ॥३७॥

सकलजनैः सदा विविधवस्तुलब्धिकृतये
प्रतिदिनमत्रमातृकेयमुपास्यते।
विधिवदपेक्ष्यतेऽति शमताऽपि ततो मिल-
त्यत इह कामधेनुरियमस्ति निश्चितमतम् ॥३८॥

कृषकजनाः समे विविधविक्रयकर्मपरा
क्रयकरणे च येऽतिशयभूमिबले निरताः।
अतिशयमामनन्ति सततं धरणीविभव-
मत इह कामधेनुरवनीति निश्चितं सदा ॥३९॥

पृथ्वीजीवसमूहपालिकतया नित्यं समस्तैर्जनै-
र्मान्यैवाऽस्ति समस्तसारगणने मात्रा समा सर्वदा।
यस्याः क्रोडरता विनिद्रजनता नित्यं सुखं लम्भते
सर्वेऽप्यत्र निरन्तरं परिजनैः सार्धं रमन्ते भृशम् ॥४०॥

सम्पूर्णा वसुधा समस्तजनताः सञ्जीविका सर्वदा
स्वीयैस्तैर्विषयैः सदैव सकलाः पुष्णाति संरक्षति।
नानारत्न-विचित्र-धातुनिकरान् प्राप्यैव तुष्टाः समे
विश्वेऽस्मिन् सचराचराश्च निखिला जीवाः सदा शेरते ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वर्लोका विबुधाः समेऽथ च तकेऽन्तस्थाः समीरा भृशं
त्रैलोक्ये सुनिवासकृत्यनिरता भूमण्डले मानवाः ।
सर्वे भूमिमहत्त्वरक्षणपरा भूसम्पदां ग्राहिणः
पृथ्वीमाशु नमन्ति नित्यमधुना जातं महीगौरवम् ॥४२॥

नारी नारिसमा सदैव सकलं कार्यं विधत्ते ध्रुवं
स्वात्मीयान् सकलान् निरन्तरमलङ्कारेण संसेवते ।
ना नारिप्रकृतिर्निरन्तरमसौ धत्ते धुरं ह्यादितो
वंशीयान् सकलान् परांश्च सततं endांश्च रारक्षति प्रत्यहम् ॥४३॥

आचार्यप्रभपूर्णचन्द्ररचिते भक्तिप्रदे शाङ्करे
माधुर्येण युतेऽत्र चारुकवितापे्रष्ठे च सौख्यप्रदे ।
काव्येऽस्मिन् मधुरः सुपञ्चविधकः सर्गः प्रपूर्तिङ्गतः
षष्ठं वीक्ष्य पुनर्बुधाः प्रतिदिनं हृष्यन्तु देवाधिपात् ॥४४॥

॥ इति पञ्चमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ षष्ठः सर्गः

(अष्टमूर्तेः पञ्चभूतान्तर्गतजलादिवर्णनात्मकः)

मृत्युञ्जयः पशुपतिः कथितोऽष्टमूर्ति-
स्तास्वेव मूर्तिषु भवः खलु तोयरूपम्।
पात्येष लोकसकलान् त्रिजगत्स्थिताँस्तान्
तेनैव विश्वमनिशं शिववश्यभूतम् ॥१॥

भवस्वरूपकजलं सकलं सदैव
समस्तविश्वजशरीरसुखाय जातम्।
धरेव सर्वसुखदं भवतीह लोके
यतो विवेचकजगद् वदतीह तथ्यम् ॥२॥

जलं सुजीवनमहो निखिलेऽत्र विश्वे
विनैव केन सकला न सुखं लभन्ते।
स्थिरेव सर्वसुखदं सलिलं सलीलं
तैनैव जीवसकलाः सुखिनो भवन्ति ॥३॥

वर्षाकाले सर्वदिगाप्तसरिताः सरित
उद्धता मत्ताऽतितरुण्यः पतिचित्ताः।
आवर्तानां भङ्गिमयुक्ता रतिचिन्ताः
संयोगार्थं सौत्सुक्यादभियान्ति ॥४॥

तीराणां तास्तीव्रतया पातनलग्नाः
कामाशक्ता सङ्गमचित्ताः शतरङ्गाः।
पारावारान् सोत्सुकका वनितेव
प्रव्रजन्ति प्रत्यहमाश्चर्यकरं तत् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्तालास्तास्तीव्रगमेनैव समन्तात्
तीरप्राप्ताञ्जीवसमूहान् वत ताँस्तान्
स्वात्मन्येवाऽहर्दिवमाकर्षणशीला
उत्खातिन्यस्तीरधराजातान् सुवृक्षान् ॥६॥

अश्वच्छाया जीवहाने व्रणदात्र्यः
काष्ठप्रायाः कर्षणलग्ना मृतवाहाः ।
पीतनीराः केचनजीवा गदयुक्ताः
स्नानार्थं या नैव सुगम्या वसुधायाम् ॥७॥

यासां पङ्को धान्ययवादीनि विसूते
नानाद्रव्यैः पूर्णगृहाः मञ्जुलशोभाः ।
देशाः सर्वे शोभनभिक्षा दृश्यतमा
जायन्त्येते सर्वसुखाप्तवरलोकाः ॥८॥

धारासारैर्निर्जरपतिदृंढदेहा
वृद्ध्या युक्ताः पूर्णतटा वायसपेयाः ।
ग्रीष्मर्तौ ता एव कृशात्मान इतीमा
उत्कर्षोऽस्तं गच्छति हीति प्रगताद्याः ॥९॥

उद्गच्छत्यः प्रोद्धतवेगा बहुवेलाः
पूर्वं जाताः सम्प्रति ता वै बलहीनाः ।
वर्षातीतेऽस्ताचलगामिरविवद् द्राक्
क्षीणात्मानो नष्टबला हतगर्वाः ॥१०॥

सर्वदैवं खलु न भवेदुच्यतेऽति-
शोच्यं सर्वैः प्राणिभिर्विश्वराष्ट्रे ।
सिन्धूयानोन्मादविनाशेन हताशाः
पानार्हापाः श्रेष्ठतमाः सुन्दरतोयाः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अश्वादिग्राम्यैर्नानापशुभिर्यैः
पातुं योग्यास्तृप्तिदनीराः सुखदात्र्यः ।
जीवाधाराः प्राणददेव्यो जननीवद्
रक्षाहेतौ भूप्रवाहास्ता नितरां द्राक् ॥१२॥

प्रथमकृतविवाहाः षोडशाब्दा युवत्यो
जलधरसमयेऽब्धिं चिन्तयन्ती नदीव ।
निजगृहगमकाले सोत्प्लुतिं भ्राम्यमाणाः
स्वपतिमिलनहेतोः सोत्सुकास्ताः प्रयान्ति ॥१३॥

घनजलधरकाले वारिपूर्णास्तटिन्यः
सुखकृततटभङ्गा उद्धता वेगवत्यः ।
नवजलधरकाले मीलनोत्का व्रजन्त्यः
स्वपतिजलनिधिं तं दर्शितावर्तभङ्ग्यः ॥१४॥

विभावसुर्जठरगतः सुरक्षकः
प्रभुक्तपीतसकलवस्तुपाचकः ।
विपालकोऽतिशयमजस्रमातुरान्
समस्तजीवनिवहान् सुरक्षति ॥१५॥

तनूनपाद्धि जगति सर्वदा भृशं
समस्तजीवनिवहमोजसायुतम् ।
करोति शक्तिबहुलमाश्रितं सदा
निरन्तरं सकल–चराचरपोषकः ॥१६॥

सुदीर्घजीवनसुलाभाय चिन्तकः
पितेव पाति सकलजीवसंहतिम् ।
कृशानुरूपधरतया सुकीर्तितः
सदुष्णतावितरणकर्मकारकः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनुष्यनिर्मितसकलासुयन्त्रकं
धनञ्जयेन सह सदा प्रचालितम्।
यथेष्ट–वित्तकनकदानसक्षमं
प्रजायतेऽनिशमिह नास्ति संशयः ॥१८॥

विभिन्नदेशजनितयान्त्रिकैः सदा
सुचालितेषु निखिलयन्त्रकेषु च।
समाहुतो ज्वलिततमो विभावसु–
र्जनान् सदैव करुणयैव पालकः ॥१९॥

शरीरभिन्नजडजगत्प्रकाशकः
धनञ्जयः सततमोजसा स्थितः।
प्रदीप्ततमः प्रखरदीप्तरश्मिभिः
प्रकाशते त्रिभुवनेऽत्र नित्यदा ॥२०॥

अनन्त सोत्सवयुतयन्त्रपङ्क्तिषु
प्रदृश्यते मनोरञ्जकमञ्जुलम्।
धनञ्जयेति विशिष्टनामतो मुहु–
रतस्तदत्र सकलशोभिताग्निकः ॥२१॥

विवाहयज्ञविविधधर्मकर्मसु
जनैः सदैव नियतं सुरक्षितः।
प्रकाशजन्यशुभसमुत्सवैः सदा
मनोमुदोऽतिशयेन जना आनताः ॥२२॥

प्रयाग–देवघट्ट–स्थितयाग–भूमिषु
क्रियाकाण्डविधिना सुकृतावाहनः।
वितानरम्यकर उदात्तवह्निको
विजायते सततमहोऽग्निरुच्चकः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेकयज्ञसुरपितृप्रतिष्ठया
विभिन्न कर्म-निवहजात-निष्ठया।
पवित्रिता शतशो जना अनेकशो
महत्त्वमग्निभवमतीव जानते ॥२४॥

सजीवता यत इह सन्ततं जनैः
सदा प्रलभ्यत नूनमात्मनः प्रिया।
सुशोभतेऽनिल-सुर-उदात्त-प्रभुः
सुभाग्यशालिन इम अग्निचिन्तकाः ॥२५॥

उषर्बुधो निखिलसिद्धपञ्चकैः
कृतेषु विग्रहनिखिलेषु महत्त्ववान्।
अतीतगात्रसुखदा आनता बुधाः
सुशीतकालकृततमो विनाशकः ॥२६॥

अनेकमन्त्रगृहसुगर्तमध्यमे
प्रदीप्तवह्निबहुविधाः पदार्थदाः।
समुन्नतौ प्रतिदिनमग्रगास्तटे
विलोकिता निखिलजनैर्निरन्तरम् ॥२७॥

भृशं सदा निजपरिवारसेवकैः
प्रबर्द्धिताऽतिशयमाश्रिता मुहुः।
समेधिता ह्यनलततिर्निरन्तरं
ददाति सा विविधहिरण्मयादिकम् ॥२८॥

समस्त-विश्वगत-सुयन्त्रकेषु यः
प्रदीपितो ज्वलन इहाऽस्ति चेत् सदा।
अनेकशो विषमाः सुशीघ्रतो भृशं
धनाढ्यकाः प्रसभं भवन्तीति स्थितिः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उग्रः समीरोऽभवदष्टमूर्तिषु
व्याप्तश्च सर्वत्र जगत् सुचारितः ।
सम्पूर्णजीवान् परिरक्ष्य सर्वदा
पाता दृढः स्थावरजङ्गमान् भृशम् ॥३०॥

भूतैश्च तैः पञ्चभिरत्र जङ्गमाः
सस्थावराः सर्वत एव सर्वकाः ।
जाता तथापीह समस्तजीविनः
सर्वाणि भूतानि सुकामयन्ति तत् ॥३१॥

उत्पन्नजीवेषु सृताः समीरणाः
प्राणादयः पञ्चदशादिकास्तथा ।
नानाप्रतीके स्वतनौ स्थिता इमे ।
रक्षन्ति सर्वांश्च शरीरधारिणः ॥३२॥

अत्यन्ततीव्रे समये सुदुःखदे
ग्रीष्मर्तुकाले पवनो मनोहरः ।
जनान् सकष्टान् समनुद्धरन् भृशं
सर्वैः सदा मान्यत इत्थमाधृतः ॥३३॥

अभ्यर्थिनः के मलयाऽनिलस्य वै
ये सन्ति वातस्य महत्त्ववेदिनः ।
ते मारुता वान्ति सचन्दनाः सदा
तस्मात्त एते सततं सुखप्रदाः ॥३४॥

सम्फुल्लपङ्केरुहकोटिपङ्क्तिषु
कासारवापीषु मनोहरासु च ।
घर्मेण तप्ताः शतशो जना भृशं
संस्थाय हीच्छन्ति सतोयमारुतम् ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जीवा अनेके चरभूमिसङ्गता
ग्रीष्मस्य तापोऽपहताः पिपासिताः ।
तापाधिकेष्वेव सवातिकेषु ते
साकं गृहिण्याऽत्र वियान्ति शीघ्रतः ॥३६॥

वायुः सदा सर्वशरीररक्षको
देहेषु सर्वत्र निरामयाश्रितः ।
आयान्ति चातुर्यसजीवतादिका-
स्तेनैव सर्वे सततं सुमञ्जुलाः ॥३७॥

निःश्वासताव्यापृतियत्नतत्पराः
संसाधकाः कोटिश आत्मचिन्तकाः ।
योगासने लीनमनोदशाः क्वचित्
प्रश्वासनिःश्वासरता निरन्तरम् ॥३८॥

वायुं प्रपूर्यैव सचक्रयानका-
भ्यासप्रचाराय निरन्तरं सृताः ॥
सञ्चालकाः पूर्णमनोरथा इमे
रक्षन्ति यज्ञादिकसन्ततिं समे ॥३९॥

क्रीडासु यत्कन्दुकचालने युगे-
ऽस्मिन् स्तुत्यभूतं परिदृश्यतेऽधिकम् ।
विश्वस्य राष्ट्रेषु युवत्वमूर्जिताः
क्रीडापरा कीर्तिसहस्रलम्भिनः ॥४०॥

शैलादिसौन्दर्ययुते मनोहरे
शीतानिलाः कम्पितकानने घने ।
आनन्ददे स्थानविशेष उत्तमे
वन्यस्य भोजस्य कृते व्रजन्ति वै ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वातानुकूलेन विशिष्टमोददे
स्थाने सदा वासकृते समुद्यताः ।
जीवाः समे सौख्यपरायणा भृशं
वाञ्छन्ति ते स्वास्थ्यकरीं स्थलीं सदा ॥४२॥

प्राणप्रदो वायुरसङ्ख्यजीविना-
माधारभूमिर्नितरां न संशयः ।
वायुं विना केऽपि कदापि न स्थिरा
वायोर्वशाः सन्ति समस्तजन्तवः ॥४३॥

नित्यं जगत्यां श्वसनप्रकृष्टतां
सर्वाः सदा वीक्ष्य भृशं त्रिलोकजाः ।
रात्रिन्दिवं वायुमनन्यमानसाः
शीर्षे नतीकृत्य नमन्ति सर्वथा ॥४४॥

उष्णे काले समेताः समे प्राणिनः
शीतवातस्य संसर्गहेतोर्भृशम् ।
प्रार्थनां कुर्वते स्वेष्टदेवस्य ते
देहि मे सम्प्रति प्राञ्जलं स्पर्शनम् ॥४५॥

व्याकुला ग्रीष्मकालस्य तीव्रातपात्
प्रार्थिनः सर्वथा शैत्यवातं सदा ।
शीतधर्मेण युक्ते जले लम्भिते
तेन युक्तो मरुद् भाग्यतो लभ्यते ॥४६॥

शीततोयेन सम्मिश्रिता मानवा
वायुलाभेन सौख्यातियुक्ताः समे ।
प्राणरूपस्य वायोः स्तुतेः कारिणः
प्राणिनोऽनन्तसङ्ख्याः सदा शेरते ॥४७॥

प्राणदात्रा वायुना समे प्राणिनः
कोमले क्षोणिभागेऽनिशमाशते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गन्तुमागन्तुमीशाः सर्वथा निर्भयं
वायुसाहाय्यलाभेन जागृतास्ते ॥४८॥

पञ्चसङ्ख्यायुतो देहगो मारुतः
स्वस्व-हृद्-गुह्यनाभ्यादिदेशे स्थितः।
सर्वदेहादिरक्षाव्रती प्राणिनां
मातरिश्वा खलु प्रोच्यते मातृवत् ॥४९।

प्राणने स्वादने कूर्दने सक्षमाः
शेरते सर्वजीवा न केषां व्यथा।
सर्वदा सौख्यभाजो जनैर्लोकिताः
वंशतानैः स्वबन्ध्वादिभिश्चादृताः ॥५०॥

सम्प्रति प्रायशः सर्वलोका भृशं
स्वल्पकालेन दूरात्प्रदूरां स्थलीम्।
गन्तुकामाः प्रयान्त्येव यानाद् द्रुतं
ते तथा सक्षमा जायमाना ध्रुवम् ॥५१॥

एकदेशात्तथा ह्यन्यदेशे जना
गन्तुकामा यदि प्रत्यहं वायुजम्।
यानकं गृह्यते सर्वथा सर्वदा
तेन निश्चीयते वायुशक्तिर्दृढा ॥५२॥

केचिदत्रैव वायोर्महत्त्वं सदा
नैव जानन्ति सर्वानुभूतं दृढम्।
पञ्चभूतेषु यो मन्यते शक्तिमान्
सर्वजीवेषु यो वर्तते सर्वदा ॥५३॥

आचार्यप्रभपूर्णचन्द्ररचिते प्रीतिप्रदे मञ्जुले
तोयाग्निश्वसनप्रवर्धितकथायुक्ते जगन्मङ्गले।
काव्येऽस्मिन् सरसे सदैव सुखदे षष्ठश्च सर्गो व्यगात्
दृष्ट्वा सप्तमकं बुधाश्च सुखिनः स्युर्देवदेवाधिपात् ॥५४॥

॥ इति षष्ठः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ सप्तमः सर्गः

(अष्टमूर्तेर्यज्ञादिरूपर्णनात्मकः)

यज्ञमहिमा

यज्ञाः सर्वे खलु वसुमत्यां जाता
भूमेर्नित्यं प्रजननशक्तेर्मूलाः ।
यज्ञद्वारा जनितपदार्थैर्युक्ता
पृथ्वी वासाय सकलजीवाधारः ॥१॥

इष्ट्यर्थं दानतप इतीमे गृहे
सर्वस्वानीति समवगच्छन्तु स्वान् ।
ब्रह्मस्वप्नप्रबलमनुष्यैः संरक्षाः
कामानां पूरकतमभूता नित्यम् ॥२॥

सर्वासां धान्ययवकसम्पत्तीनां
खाद्यानां पेयसकलवस्तूनां च ।
ते दातारः क्वचन न शङ्कास्थानं
जनैः सर्वैः सततमहो सेव्यन्ते ॥३॥

यज्ञस्रष्टा पशुपतिरादौ काले
रक्षाकर्ता स च समेषां प्राक् ।
पाश्चात्याश्चात्र यजनकर्मादौ
सँल्लीना दानतपःशुद्धेऽमूल्ये ॥४॥

एतान् यज्ञान् विदधति पाश्चात्या
आस्थावन्तस्ते प्रतिदिनमेते भक्ताः ।
संसारेऽस्मिन् विविधजना यज्ञीया
अन्येभ्यो दानकरणसाहाय्यकाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यब्दं कार्यत इह दातृश्रेष्ठै–
र्दानानामाचरणमिहास्ति श्रेष्ठम् ।
यज्ञस्थाः सन्त उदयशीला मर्त्याः
सत्कर्माणि प्रखरबुधा नोज्झन्ति ॥६॥

सर्वे मानवकुलानां वर्गे
यज्ञा नित्यं प्रगतिकरा दृश्यन्ते ।
यज्ञानां कर्तुं गतियुताः सोद्योगाः
साऽऽनन्दास्ते परिजनपाला मुख्याः ॥७॥

यज्ञैर्जाता जलधरमाला–सङ्घातास्ते–
ऽत्यन्तान्नानि प्रबलतया दास्यन्ति ।
इत्येवं चिन्तापराः कृषकाः साम्यन्ति
सम्यङ् निष्ठाञ्च विदधतीमे नित्यम् ॥८॥

विश्वस्य प्राज्ञकुलभवैश्च श्रेष्ठैः
सोऽत्यन्तश्रद्धितसुविशुद्धश्रौते ।
सम्यक् कृत्वैव दितिजैर्मर्त्यैश्च
निष्ठा कार्या यज्ञतपोदानादौ ॥९॥

प्रयाग–देवघट्ट–सकलयागभूमिषु
विशिष्टवस्तु–सकलशुद्ध–कर्तृकः ।
वितान–रम्यकर उदात्तसमन्वितो
विजायते विहितसुयज्ञवैदिकः ॥१०॥

अनेकशः सुरपितृतृप्तैः सदा
प्रदान–यज्ञ–तपो जपादियज्ञसंज्ञाः ।
सुनिष्ठया यदि निजपुत्रपौत्रकैः
कृताः समस्तजगतः पालनसृताः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सजीवता सह यज्ञगता जनै-
र्मुहुः प्रलभ्यतेयमात्मनः प्रियाः ।
समस्तविश्वजगति पञ्चषा इमे
प्रदानकर्मणा सुलभयशोधना नराः ॥१२॥

आदेः कालात् प्रचलितयज्ञादीनां
सर्वेषां श्रीपशुपतिरेव स्रष्टा ।
अस्तीति यज्ञनिर्वाह उद्रौत्येवं
तेषामुक्तिर्निखिलजनैः सत्कार्या ॥१३॥

पाश्चात्या देशाः प्रबलधनाढ्याः
निर्द्रव्याणामविकसितानां तेषाम् ।
राष्ट्राणामार्थिकसहयोगार्थं ते
संलग्ना एव समुपलभ्यन्तेऽत्र ॥१४॥

विश्वस्मिन्नाढ्यतमधरास्थलोकाः
सर्वत्रैवं खिलवसुधाया नित्यम् ।
जीवेषु स्वत्वमननकर्तारोऽत्र
सन्दृश्यन्ते प्रतिदिनमोजोयुक्ताः ॥१५॥

यज्ञादौ वाऽऽर्यकुलजानां मात्रं न
संलग्नताः सन्ति किमुत पाश्चात्याश्च ।
सास्थाः प्राप्ता लगनयुताः संलग्नाः
सन्देहो नास्ति सत्यमिमेऽपि यज्ञौघयाः ॥१६॥

मृत्युञ्जयो गिरिशगुरुः सर्वेषां
मान्यः पूज्यश्च पशुपतिर्मर्त्यानाम् ।
वेदोक्तेषु प्रत्यहमोंकार्येषु तेषु
ह्यादर्तव्यः सुयजमानोऽसौ प्राक् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूर्यमहिमा

आदित्यौऽसौ सर्वजगत्या नियामकः
वेदोऽत्रार्थे विस्तृतरूपेण समूचे ।
तस्मिन्नाप्ते प्राणिसमस्ता गतनिद्राः
स्वे स्वे कार्ये सन्ततलग्नाः प्रभवन्ति ॥१८॥

ईशानोऽसौ विश्वसुरक्षाकरणाय
सूर्याकारोऽजायत तेनैव सुसौख्यम् ।
सर्वत्रैवाऽभूज्जगतः सूर्यः सुरलब्धिः
सम्पूर्णं सूचयतीति प्रथमं तत् ॥१९॥

विश्वस्थानां जीवजन्मिनां सततं य-
स्तत्त्वं नित्यं रक्षति सत्यं प्रतिवस्तु ।
सूर्येष्टस्थाः प्राक्तनमर्त्या नतशीर्षाः
पद्माक्षं तं सुष्ठुतया मानसलीनाः ॥२०॥

प्रत्यक्षं तं प्राक्तना आर्यकुलीनाः
प्रातः काले प्रत्यहमानम्रतयैव ।
सेवन्ते नास्ति भ्रमपूर्णः विषयोऽत्र
ह्येषा रीतिः सर्वजनानां प्रचलितैव ॥२१॥

सर्वे जीवा चेतनाहीना जडाश्च
विश्वस्थास्तेऽनन्ततमाः सूर्यसुरक्षाः ।
सूर्यात्मा वै सर्वजगस्तत्स्थुषश्च
ये सूर्येऽत्र त्राणसृताः शेरत एते ॥२२॥

शीते कालेऽत्यन्तहिमाक्रान्तसमस्ता-
श्चण्डांशुं ते नैव लभन्ते यदि किं स्यात् ?
प्राप्तप्राणा नैव भवेयुर्मृततुल्या-
स्तस्माद्धेतोः सूर्यतत्त्वं कियदत्र ! ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्ताश्वोऽसौ व्योमगदेवो ग्रहराज
उत्तराध्वा नित्यसुखस्य प्रददत् सः ।
मेषस्थोच्चः सन्ततरक्षावानुक्तः
सर्वेषां सोऽत्यन्तमुच्चस्तु विदाता ॥२४॥

छायानाथो ध्वान्तविनाशी बलदाता
सर्वत्राता जीवनदाता सुखकर्ता ।
ज्योतिर्दाता दीप्ततमः सन्ततमुच्चः
सर्वैर्ध्येयो नित्यमतो नान्य इहेत्थम् ॥२५॥

ईशानाज्जो द्वादशरूपः सूरदेवः
प्रत्येकं तान् मासगणान् सन्नयनार्थम् ।
सहैवं सङ्गृह्य दृढाः सन्ततमत्र
लग्नादित्याः सहयोगेनाऽवितृप्ताः ॥२६॥

एते सर्वे विश्वसुचालार्थमनेके
प्रख्याताः प्राग् वै गणदेवा अतिशक्ताः ।
सत्सङ्ख्याप्ताः सार्थचरैः प्रत्यहमुग्राः
सर्वं विश्वं प्रत्यहमेते सुखयन्ति ॥२७॥

दीर्घं कालं जीवितुमेते तत इत्थ-
मेकत्रस्था जङ्गमजीवाः सबलास्ते ।
प्राप्तादित्याः सन्त इहोत्तमास्ते तस्मात्
स्वीयं जीवनं सार्थकं मन्वते नित्यम् ॥२८॥

मार्तण्डोऽयं प्रतिदिनमत्यन्तसुखदाता
कम्पप्राप्तान् कोटिश आत्मान इह द्राक् ।
स्वस्थान् कृत्वा जीवयति प्रत्यहमित्थ-
मादेः कालाद्देववरेषु रक्षकस्त्वम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राप्तानन्दा वृद्धाः कियन्तो नितरां ते
सन्तानैस्तैर्नित्ययुता आप्तजनाप्ताः।
भूयोभूयः शान्तियुता नित्यममीभ्यः
क्लैशैर्दुःखैर्हीनतया नम्रसुचित्ताः ॥३०॥

सूर्यो देवः सर्वपदार्थान् निजकरैस्तैः
सिञ्चत्येव प्रागुदये स्वीयतमैर्हि।
तस्मात् प्राप्तजीवनवृत्ता गतरोगाः
सत्याचारास्ते विजयन्ते समचित्ताः ॥३१॥

अत्यन्तं ये भक्तजनास्ते मिहिरेऽत्र
नित्यं दृष्ट्वा नष्टविवादाप्तसमस्ताः।
सापत्यास्ते नगरवृद्धाः सुधनाढ्याः
पूर्णानन्दा आगतमान्या पितृभक्ताः ॥३२॥

आरोग्यं वै भास्करतः प्राप्य सुखाप्ताः
नीरोगास्ते जीवगणाः स्वीयगमध्याः।
सञ्जायन्ते स्वच्छशरीरा बलयुक्ता-
स्तत्त्वज्ञानां सुष्ठु मतं हीदृशमस्ति ॥३३॥

प्रत्यक्षोऽयं सज्जनसङ्घैः खलु पूज्यो
रोगाणां संहर्तृतया ख्यात इहाऽयम्।
नित्यं नम्रं साधकवृन्दं सुखयन्
सङ्ख्यातो विश्वे नित्यमसौ पुष्करसंस्थः ॥३४॥

सोममहिमा

महादेवः सोमोऽभवदतिशयं सुन्दरवपुः
सुशीतोऽसौ नित्यं भवति नितरां प्राणिविषये।
स पीयूषात्मायं पतति तरुगुल्मादिषु सदा।
सुषिञ्चन् पीयूषं सुखयति सदा जीवनिवहान् ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कलामूर्तिः श्रेष्ठो ह्रसनजननैः स्वीयवपुषा
प्रसिद्धो विश्वेऽस्मिन् सबल-बलहीनश्च सततम् ।
सदा जातानां यः शुभमशुभमादाय सततं
जनैर्नम्रैः स्तुत्यो भवति नितरां विश्वविबुधैः ॥३६॥

सुपक्षान्ते चन्द्रः सकलसुखदो दम्पतिकृते
सदा ते सर्वेऽस्मिन् प्रतिदिनमनोरञ्जनकृते ।
पतिः पत्नी सा तं समभिलषतीत्यत्र सकलः
प्रथाऽऽदेः कालाद्धि प्रथितततमजाताऽत्र जगति ॥३७॥

द्विजानां राजाऽसौ कथित इह लोके बुधजनैः
सुधांशुः शुभ्रांशुः सुखशशधरश्चन्द्र उदितः ।
मृगाङ्कोऽब्जः सोमप्रभृतिविविधैर्नामभिरयं
हिमांशैः पूर्णोऽपि प्रथित इह विश्वेऽतिशयकम् ॥३८॥

नदी सोमोद्भूता सरससलिला पुण्यजनिका
समाख्याता रेवा निकटजनता-तापशमनी ।
पवित्रैः सिद्धाद्यैः सतत-कृतकृत्यादिविविधै-
र्नमस्या सर्वेषां भवति नितरां शुक्लसुकृताम् ॥३९॥

ओषधीनां पतिश्चन्द्रमा विद्यते
तेन सर्वे लतागुल्मवृक्षादिकाः ।
ससाराः सर्वथा ग्राहकैः सज्जनै-
रोषधीशः स उक्तः समाराध्यते च ॥४०॥

विकासी पुष्पाणां सततसरसः सस्यबृहतां
सुशोभाया दाता कुमुदकुलबन्धुश्च कथितः ।
शुभे पक्षे वृद्धो, रतिदसततं रम्यसुखदः
समस्तं त्रैलोक्यं यत उदितकं जायत इदम् ॥४१॥

सदोषा यातेऽस्मिन् सकलविटपाः शाखिशतशः
प्रकाशन्ते पश्चात् ससकलकुला रम्यवपुषः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नरा नार्यो रम्भा रसमयसुखाः शान्तमनसः
दिनानां याते ते सततकुशला भान्ति नितराम् ॥४२॥

नदा नद्यः सर्वे प्रतिदिनविधेर्यान्ति मुखराः
प्रजायन्ते साकं निजसुखविकासप्रयतनाः ।
सदा तं प्रेक्षन्ते स्वविकसनकार्येऽपि नितरां
विचित्रं लोकानां दिनचरणकृत्यं सकुतुकम् ॥४३॥

यथेच्छं स्वानन्दं प्रतिदिनसमालभ्य नितरा–
मजस्रं प्राकाम्यं ग्रहण इह संलग्ननिवहाः ।
प्रशस्तैश्वर्यादिप्रखरबलवीर्येण सुलभं
सुभोग्ये श्रान्तास्ते सततमधुना सोमभरणाः ॥४४॥

नित्यसौगन्धिकादिप्रसूनादयो
हल्लकाद्याश्च सम्फुल्लितुं कौमुदीम् ।
काम्यमाना भवन्तीति तत्त्वं स्थितं
ख्यायते नित्यमाह्लादिका चन्द्रिका ॥४५॥

कैरवाणामसौ बान्धवः ख्यायते
रात्रिपुष्पाणि तस्योरसा भान्ति वा ।
वासरेणैव रात्र्या च कान्तिः सृता
जायते सर्वदा रात्रिशोभा दृशाम् ॥४६॥

पूर्णिमा पूर्णचन्द्रे वसन्ते यदा
कामदेवः सदा काम्यमानोऽखिलान् ।
दूरगान् यानकार्येण वा चाऽन्यतो
मेलयत्येव तान् सर्वथा लौकिकान् ॥४७॥

सृष्टिकालादियं सृष्टिवृद्ध्यै सृता
सर्वमान्या प्रथा विद्यमाना सदा ।
सर्वदेयं समैः कामिभिश्चालिता
सर्वभूतेषु संरस्यताऽऽपादिका ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवीनाः सर्वथा ग्राम्यधर्मे गता
जीवसंघा भृशं लज्जते प्राक् सृताः ।
पूर्वमर्यादया तेऽपि प्राचीनवत्
प्रवृता अग्रतोऽवश्यमेवं तथा ॥४९॥

आकाशमहिमा

असुरसुरगणेशो भीमदेवः शिवोऽयं
गगनतनुधरोऽभूल्लोक-संरक्षणार्थम् ।
अतिशयबलशीलं कायकं भूतमुख्य-
मचरचरसमस्ताः प्राप्तवृत्ताश्च यस्मात् ॥५०॥

गगनमिदमिहास्त्याकाशनामाऽपि कोशे
इतरविविधनामाख्यातयुक्तं तदेव ।
घटपटमठरूपैरुच्यते विज्ञवर्गै-
रगणिततमजातो रूपभेदैरनेकैः ॥५१॥

अवनिसलिलशोचिष्केशवाताः समस्ता
गगनसुलभवासा एतकाः सन्ति नित्यम् ।
गुरुतरगमने लीनानि चत्वारि सत्यं
निखिलजगत इत्थं गम्य आधारभूतः ॥५२॥

प्रकथित-विबुधाद्यैः स्थानलब्धौ तदानी-
मितर-विविधवस्तुव्रातरूपैः सुलभ्यम् ।
स्थलजलतदुभौ वा स्थानभूतौ गृणन्तो
विविधजड-सचेतस्काः सवासा भवन्ति ॥५३॥

विपुलविवरमाकाशः समे स्वल्पमध्या
बृहत इह मतास्ते स्थानमाकारभूताः ।
गगनतलगतानां सर्वरूपाश्रितानां
सुदृढ-गगनतत्त्वं सम्यगाधारभूतम् ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसृतगगनप्राप्ताः सप्रकाशाः समस्ताः
स्वकनिवसनकृत्यं चालने ते समर्थाः।
इतरसकलभूतैर्यादृशी प्राप्यमाना
सततमिहतया स्वीयां स्थितिं साधयन्ति ॥५५॥

आकाश एव सकलस्य स्थितिं विधत्ते
सर्वस्य चोन्नतिविधामपि संस्करोति।
एतेन सर्वविषयस्य विकासवर्गे
तस्यैव निर्भरमिदं सकलस्य दृष्टम् ॥५६॥

चत्वारि भूतसकलानि क्षितिं मनोज्ञा-
माकाशतः समधिगम्य समस्तभावे।
स्थानानि दातुमनिशं प्रभवो भवन्ति
तेनैव चाम्बरसमाप्तसुखा रमन्ते ॥५७॥

महामहाभूतसमुद्रकल्पका
धराकबन्धाग्निमरुत्सुतोषका।
स्ववासवासार्थमनेकशः समैः
समापि चर्यादिभिरिभ्यबन्धुभिः ॥५८॥

विपत्समस्तेषु नभस्वरूपकं
सदोद्यतं भूतसमस्तकेषु यत्।
विभाति नित्यं भुवनेषु सर्वदा
विशेषसामर्थ्ययुतं जगत्त्रये ॥५९॥

अनन्तविध्यण्डसमस्तसंसृतं
विशालरूपं निजवीर्यतेजसा।
प्रभावकारि प्रकृतं जगत्त्रये
अहो महाकाशमहत्त्वमुज्ज्वलम् ॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पूर्णविश्वस्य विधानकर्मणि
भूतानि पञ्चैव सृतानि पूर्वतः ।
तेष्वेव गौण्यादि-नभोऽन्तके च ये
व्योम्नो महत्त्वं प्रथितं जगत्त्रये ॥६१॥

तेनैव सर्वेभ्य इहत्य शेषके
दत्तोऽवकाशोऽस्ति रहस्यमीदृशम् ।
आकाशसम्प्राप्तसमस्तदेशका
अन्ये भवन्तीति बलान्विता भृशम् ॥६२॥

सम्पूर्णजीवनिवहा भुवि पुष्करेऽत्र
रात्रिन्दिवं सुतसुतादिभिरादिकालात् ।
वासं विधाय निवसन्ति सुशेरते च
तत्राऽस्ति भूरिसहयोगितया स्थितं खम् ॥६३॥

आकाशस्य या या विशेषता नित्या
तासां चर्चनं न शक्यं शतवर्षैः ।
पञ्चस्वेव भूतेषु तेनैव सर्वेभ्यः
सामर्थ्यं प्रदत्तमस्तीति रहस्यम् ॥६५॥

भूतैश्चतुर्भिः पवनादिभौतिकैः
सस्थावरैर्जङ्गमयुक्पदार्थाः ।
आकाशपुष्टाः स्थिरतां प्रयान्ति
भवन्ति हृष्टाश्च समुन्नतास्ते ॥६६॥

आचार्याश्रमपूर्णचन्द्ररचिते श्रेष्ठे जगन्मङ्गले
यज्ञादित्यहिमांशुपुष्करयुते विद्वन्मनोमोदके ।
काव्येऽस्मिन् सरसः सुसप्तममृदुः सर्गः प्रपूर्णोऽधुना
सम्यक् तत्पठनेन पण्डितवरास्तुष्टा भवेयुः शिवात् ॥६७॥

॥ इति सप्तमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टमः सर्गः

(भूकम्पजलप्लावयुद्धदुःखवर्णनात्मकः)

भवः कल्याणार्थं निखिलजगतां जीवनवपु-
र्भवादौ सञ्जातो जलमयवपुः स्वीयकृपया।
सुलब्धं दीर्घायुः सकलसुरदैत्यादिमनुजै-
स्तथा जीवैः सर्वैः सकलसचराचारनिवहैः ॥१॥

स्वयं संहर्ताऽसौ भवगिरिशनामादिसहितो
हरत्येवैतद् द्राग् बहुविधजगज्जालसकलम्।
न केऽप्यत्र श्रेष्ठा हरणनिजकृत्यस्य दलने
समक्षं तस्यैतेऽनुचरसदृशा भान्ति त्रिदशाः ॥२॥

यदा रुष्टो रुद्रः सपदि सकलं हर्तुमभितः
प्रवृत्तः कस्याऽपि प्रतिविधिकृतौ न प्रबलता।
अतो हेतोर्नित्यं ह्रसति हि जगज्जालमशुभं
समे तस्य श्रैष्ठ्यं सनतिनिजशीर्षेण गृणते ॥३॥

भूकम्पस्फोटितास्ते पुरजनपदनिवसा गर्तसहिता-
स्तोयप्लावैः कृतब्रूडजनविकलता मूर्च्छाप्रदघा।
दीना जीवा अनेकैरनलजनितनाशैरगमना
वात्याव्रातैरनन्तैरतिविकलकरैरुत्क्षिप्ततरुगजा ॥४॥

अग्नेस्ताण्डवमुच्चरूपजनदृष्टे सर्वजीवैस्तदा
उच्चादुच्चतरैः प्रशस्तयतनैश्चात्यन्तशुष्का भृशम्।
वारं वारमहो कृते तु नितरां व्यर्थश्रमा मानवाः
सर्वं सोढुमतीव ते सुविकला जाताः समस्ता जनाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाविपत्प्राप्तसुवासजीवा
विचालिता स्थानपशोर्विहीनाः ।
प्रबाधितास्ते परिवर्तितेऽत्र
निवासमार्गाय तदा भ्रमन्ति ॥६॥

अनेकभूभागविलोकने ते
श्रमान्विता वै नितरां व्यथन्ते ।
कदाचिदेकत्रितजीवसङ्घे
भुवो विभागं पुनरेव पान्ति च ॥७॥

सुभीता भुजङ्गा यथा यान्ति शीघ्रं
तथैवाऽत्र वर्मा प्रदेशाच्च लब्धाः ।
जना भीषणं दुःखजातं प्रसह्य
कथञ्चिच्च राष्ट्रे स्वकीये सुदृष्टाः ॥८॥

पृथिव्यां सदा सर्वदोन्मूलकास्ते
सुतीव्रा असङ्ख्या अभूवन् विनाशाः ।
इदानीञ्च पश्चाच्च भू-विप्लवास्ते
भवन्त्येव निश्चप्रचं भाविकाले ॥९॥

बुधाः सन्ति भो मुख्यतस्तेऽत्र ये हि
जलप्लावनाद् भूमिकम्पाच्च युद्धात् ।
समस्तेऽपि विश्वे सुजाता विनाशाः
श्रुताः श्रोत्रकोणे प्रयाता न रम्याः ॥१०॥

इमे विप्लवाः सर्वथा प्राणिनाशे
सदा भौतिके वस्तुनि प्रोच्चकैश्च ।
विनाशे प्रवृत्ता न शक्या प्रहर्तुं
जना तेन सर्वत्र तैः पीडिताश्च ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न केऽप्यत्र जाताः प्रचण्डा विनाशा
जनान् केवलं नाशकाः किन्तु राष्ट्रे।
सदा भौतिके वस्तुनाशेऽपि वृत्ता
विषोढाः प्रवासे स्थितैर्दूरसंस्थैः ॥१२॥

द्वितीये तदा विश्वयुद्धे विलीना
अनेके जना नास्ति सङ्ख्या प्रमाण्या।
अनन्ताः सुविष्फोटकास्तत्र तत्र
ह्यभूवँस्तदा घस्मरा लीढसस्याः ॥१३॥

नरा नार्य आपत्तियुक्ता अनेके
गृहाणि प्रहायैव यातुं प्रवृत्ताः।
अपारेऽपि ते भौतिके वैभवादौ
निराशा जनास्त्यक्तसर्वा अभूवन् ॥१४॥

समस्ता जनाः सङ्घभूतास्तदानीं
गृहादीन् पदार्थान् प्रहायैव खिन्नाः।
सुरक्षां परीवारलोकस्य कर्तुं
प्रयाता गृहेभ्यो विसृज्यैव सर्वम् ॥१५॥

श्रवाम्नाय-दुर्गान्तरिक्ष्यैशवर्षी-
यजूनद्वितीये दिने भीषणेऽस्मिन्।
पलाय्यैव रक्षेति नूनं विचार्य
प्रयाता जना ब्रह्मदेशात्तदानीम् ॥१६॥

यदा युद्धभीतेरकस्मात् प्रयाता
विहीनास्तदा बन्धुभिर्मातृभूम्याः।
वियुक्ता अहो जन्मदात्र्या जनन्याः
सदा रक्षणे तत्परेणाऽपि पित्रा ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहे बद्धगावो लुलायस्थलानि
यथा बद्धरूपास्तथैवेति तत्र ।
विसृज्य प्रयाताः पथि प्राप्तदुःखाः
स्मरन्तः पशूँस्तान् भृशं दीनचित्ताः ॥१८॥

प्रयाणे जनैः सङ्कुले रुद्धमार्गे
वियुक्ताः कथञ्चित् पुनस्तेऽपि प्राप्ताः ।
कियद्भिस्तु तैर्बन्धुभिर्हीनसार्थै-
र्न भुक्तं न पीतं जनैः प्रेरितास्ते ॥१९॥

कियन्तः पुनः प्राप्तसार्थाश्च तत्र
प्रचण्डैर्महासङ्कटैस्तैरजस्रम् ।
तदा खाद्यपेयाद्यभीष्टैः पदार्थै-
र्विहीना मृता नैकशस्ते पथिस्थाः ॥२०॥

मृतान् मार्गमध्ये स्वबन्धून् विलोक्य
तदा रोदनैराविताश्चाऽन्यसार्थाः ।
चितासञ्चये नष्टसंज्ञाश्च तावत्
कथञ्चित् स्ववंशे दृढं बाधितास्ते ॥२१॥

स्वबोधाञ्जनोत्साहनाद् ध्वस्तशोका
अनेके प्रियाः स्वीयपित्रादिहीनाः ।
सहानीतवस्तुव्रजैः खाद्यपेयै-
र्विहीना नरा मार्गगास्ते विपन्नाः ॥२२॥

प्रशस्ता जना यौगपद्येन रुग्णा-
स्तथा साधनैरल्पकैश्चापि मुक्ताः ।
सहैवाऽत्र मार्गे कठोरेऽतिदुःखं
मृता नैकशो रोगग्रस्तास्तदानीम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कियन्तः पिपासाकुलाः क्षीणदेहा
मलीना बुभुक्षावृताः पीडिताङ्गाः ।
सुशुष्यन्मुखा दृष्टिशक्त्या विहीनाः
प्रयाता भृशं दीनहीना मृतास्ते ॥२४॥

महारण्यमध्यस्थिते तत्र मार्गे
वनस्था गजाः सिंहभल्लूकखड्गाः ।
कदाचित् स्ववर्गीयखेलप्रसङ्गात्
समागत्य हत्वैव ते यान्ति शीघ्रम् ॥२५॥

न्यरुन्धञ्जनान् मार्गगान् तान् समन्तात्
तदा प्राणिचित्कारजन्यः प्रघोषः ।
समाश्रूयत प्राणरोधाय युक्तः
पिता मे हतोऽत्रैव सिंहेन रुग्णः ॥२६॥

विपद्युक्तमार्गे कथञ्चितद् गतेषु
समाजेऽत्र सर्वेषु तथ्यं तदस्ति ।
विपन्ना ध्रुवं मारितास्तैस्तदानीं
जना मार्गगाः शक्तिहीना वियुक्ताः ॥२७॥

हता हा हता बान्धवा मे गजेन
ह्यनाथोऽस्म्यहं कोऽपि नो रक्षको भोः ।
इति व्याकुलाः प्राणिवाचो निशम्य
जनाः सङ्कटेऽनन्तदुःखे निमग्नाः ॥२८॥

वयं केन दौर्भाग्यभोगेन दैवा-
दमुष्यां दशायामपीत्थं प्रश्रृण्मः ।
कथङ्कारमेतस्य मार्गस्य दुःखं
सहित्वा द्रुतं प्राप्नुमो लक्ष्यदेशम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो दैवसंयोगतो दीर्घकालाद्
वयं यातनाजातमग्ना भवामः।
इतो मुक्तिहेतोर्द्रुतं सम्प्रयामो
न कार्यो विलम्बो न कार्यो विलम्बः ॥३०॥

तदैवातिवृष्टेः प्रचण्डाग्रधारा
असिञ्चत् पथि प्राप्तवर्षाप्रकर्षः।
ततो मार्गयानं प्ररुद्धं जनानां
तरुच्छायसंस्थैः स्वरक्षापरैर्यैः ॥३१॥

तदा सप्तघस्रा व्यतीता नराणां
घनायाः कुवृष्टेर्नतानां जनानाम्।
तटिन्यास्तटी नीरपूरैरतीव
प्रपूर्णा वटूनध्वगान् ब्रूडयन्ती ॥३२॥

तरङ्गेषु रिङ्गज्जलौघैः परीता
अभञ्जन् जलावर्तपूरैः प्रकम्पाः।
प्रगन्तव्यमार्गे प्रकृत्या विसृष्ट्या
अहो ! मार्गयातेभ्य उत्तापिपीडाः ॥३३॥

नदीनदा नैकविधाः सहस्रशः
सन्त्यत्र भूमेः सततं विभूषणाः।
सदैव पर्यावरणस्य रक्षका
भवन्ति जीवा यत आत्मरक्षिणः ॥३४॥

यदा बालकानां समुत्तारणे ये
प्रभूता जलौघे प्रवेगे सुतीव्रे।
दृढाभिः सरिद्भिः कियन्तः प्रवृद्धा
भृशं ब्रूडिता बालकैस्तैर्मृताश्च ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नदी वेगशान्तावहं पारयातो
भवानीति निश्चित्य ये पारयाने ।
प्रतीक्षारतास्ते तु मग्ना जलौघे
व्यथेयं समुन्नमूलिका चित्तवृत्तेः ॥३६॥

सुपाराय युक्ता अभीष्टा उपाया
न लब्धा जनैस्तेन ते मृत्युलीनाः ।
सुबालं तदा दम्पतीद्वन्द्वलीन–
मतस्तावकास्ते शवा फेरुभक्ष्याः ॥३७॥

अनेकैः सदा मांसभक्ष्यैर्विचित्रैः
समागत्य तत्रैव लब्ध्वं शरण्यम् ।
बहूनि प्रजातानि देहादिकानि
गृहीत्वा श्रृगालाः शिवाश्च प्रसन्नाः ॥३८॥

पितुर्हस्तमुक्तः सरित्तोयवेगे
महाकाव्यकर्ता जनोऽयं तदानीम् ।
द्वितीये महासङ्कटेऽपि सुरक्ष्यः
कियद्दूरवाहात् सरित्तीरलग्नः ॥३९॥

तदा मेऽनुजा वाहिता वेलया सा
परीवार आपद्द्रुतस्तत्र काले ।
नदीपारयाता वयं तत्र हानौ
भृशं रोदनात्तद्दिनं यापितं वै ॥४०॥

द्रुतः पूर्वमध्वन्यहं रोगयोगान्–
मृतप्राय आसं कथञ्चिद्धि सुस्थः ।
सदैवाऽत्र मे ज्येष्ठजातश्च माता
ह्युभौ स्वर्गयातौ कियद्रोगग्रस्तौ ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलङ्कारपूरैर्युताः काश्चिदन्याः
युवत्यः प्रवृद्धाः प्रियाभूषणास्ताः ।
नदीवेगलीना मृतास्तीरलग्ना-
स्तदा ग्रामवासैर्जनैर्लब्धवत्यः ॥४२॥

तदीयेषु देहेषु लग्नं हिरण्यं
सुदर्शं सुदर्शं भृशं मोदमानाः ।
गृहीत्वा गृहं शीघ्रयातास्थलीयाः
प्रदर्श्यैव पत्न्यै सुतुष्टास्तदा ते ॥४३॥

अनेका इमा दुःखदाः प्राणिहन्त्री-
र्नदीस्तैर्जनैः संसहित्वाऽग्रयातम् ।
इयं विश्वयुद्धस्य पीडा प्रसोढा
स्थितिर्नैव विस्मर्यते तत्र जाता ॥४४॥

इतीदृक् विचित्रैर्महासङ्कटैस्तै-
र्भृशं वारवारं वृतोऽयं तदानीम् ।
सदासर्वदा देवदेवेश ईशो
महामृत्युहा रक्षिता सर्वकाले ॥४५॥

प्रवर्षाभिरध्वान एते गमार्थं
न योग्या अजायन्त दुःखाद्रिरासीत् ।
विचित्राः कथाव्याकुलाः पञ्चसार्था-
स्तथापीह ते ते प्रतीक्ष्यैव याताः ॥४६॥

यदाङ्लराज्यीययुद्धाग्रणीभि-
र्जापानदेशीयजनैरशीलैः ।
समारब्धयुद्धे समस्ता वयं हि
विसृज्यैव सर्वं प्रयातास्ततोऽग्रे ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो मातृभूमौ विनाशोन्मुखं तत्
समीकं विलोक्यैव रक्षानिमित्तम्।
त्यजन्तो वयं मातृभूमिं सुदुःखात्
तदा मासमेकं सकष्टं पथिस्थाः ॥४८॥

तथाऽत्रैव मार्गे स्थिता जीविताश्च
वयं विस्मरामो न तां जन्मभूमिम्।
अनेकेऽस्मदीयाः पलाय्यैव तत्र
वियुद्धेन ते नैव घातं प्रयाताः ॥४९॥

पुनस्ते न याता इतो दुःखशङ्कां
विचार्यैव ते तत्र गुप्ताः स्थिताश्च।
इदानीं वयञ्चाऽऽगता अत्र भूमौ
प्रगन्तव्यभूमिः प्रयत्नेन चाप्ताः ॥५०॥

अतः पालिकां रक्षिकां तां स्मराम-
स्तदीयानि वस्तूनि नित्यं स्म्रियन्ते।
अजस्रं विचार्य व्रजद्भिरमीभिः
ससीमः प्रदेशः समानः समाप्तः ॥५१॥

कियन्तस्तु बन्धुव्रजैरस्तसार्थाः
कथञ्चिद्धि तामाप्नुवन् प्राप्यभूमिम्।
श्रवाम्नाय दुर्गान्तरिक्षैशवीय-
समाने जुलाईचतुर्थे दिनेऽत्र ॥५२॥

मृतानां जनानां शवास्तत्र मार्गे
प्रदृष्ट्याः प्रशस्ताः सुसंस्काररहीनाः।
न तेषां खलूत्थापकाः केऽपि दृष्टा
अतस्ते तु तत्रैव मार्गे विशीर्णाः ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृतानां नराणां समूहास्तदानीं
श्रृगालैर्हि काकोलगृध्रैः सशब्दैः ।
सृता यत्रतत्रैव व्याप्ताः समन्तात्
तदङ्गान्यभक्षन् सुखं निर्भयास्ते ॥५४॥

सवर्षेऽत्र काले जनैः सङ्कुलैस्तै-
रजस्रं गमात् पङ्किलोऽभूत् स मार्गः ।
स्थिता यत्र तैर्मार्गगैः प्रेरिताश्च
ह्यशक्ता अतस्ते मृता मार्ग एव ॥५५॥

सवृष्टैस्तदीयैः सदुर्गन्धमांसै-
रनेका रुजो द्राक् समन्तात् प्रसूताः ।
विचित्राभिराभिः कुरुग्भिः परीताः
मृता मार्ग एवौषधैर्वर्जिताश्च ॥५६॥

मृतैर्मारितानां जनानां कथां किं
भवन्तः कुतश्चिन्न मन्यन्त इत्थम् ।
अतः पाठकाः सुधीरा मानवीयां
कथां संश्रृणुध्वं विचित्रां धरित्र्याम् ॥५७॥

इदं चित्रवृत्तं कदाचिद् भवद्भिः
श्रुतं नैव दृष्टं च मन्ये जगत्याम् ।
अपूर्वा सरोमाञ्चकम्पस्य कर्त्री
श्रुता जायतामित्यपेक्ष्यैव वच्मि ॥५८॥

असङ्ख्यैर्जनैर्मार्गनष्टैः सुगुप्त-
प्रभूतानि रत्नानि गृह्णन्न कोऽपि ।
शिरोधःस्थिता वैभवास्ते यथाऽसन्
तथैवैति मृत्यौ च दृष्टा हि तत्र ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च प्राक्तना नूतना वा कदाचित्
समाचारसंसारवार्ता तदानीम्।
तदा पान्थवृन्दः कथञ्चिच्च कापि
श्रुता नैव वार्ता विचित्रा हि कैश्चित् ॥६०॥

अशृण्वन् यमाश्चर्यपूर्णं विवृत्तं
यथार्थं हि वृत्तान्तमेतं सुपान्थाः।
तदा दुःखयुक्ताः समासन् समन्तान्
न्यचक्षञ्च सर्वत्र एवेदमस्ति ॥६१॥

अनेके शिरः कम्पयन्तो विवृद्धा
जना दुःखजात् कौतुकाद् भीतभीताः।
अहो कीदृशीयं कथा वर्मदेशात्
पलाय्यागतानां जनानां विचित्रा ॥६२॥

न चाख्याभिरेवं पुरा क्वापि दृष्टं
न वाऽऽकर्णितं दुःखदं वृत्तमीदृक्।
अकस्माद्धि वृष्ट्या सपङ्केऽत्र मार्गे
मृता नैकशः पङ्कमग्ना विलीनाः ॥६३॥

व्रजन्तोऽध्वपङ्क्तावशक्ता कियन्तो
मृता मार्ग एव प्रमग्नाश्च पङ्के।
तदानीं सपङ्कान् मृतान् पङ्कमग्नान्
समुद्धर्तुकामा न केऽपि प्रदृष्टाः ॥६४॥

विपद्युक्तकाले सकष्टं प्रयाता
जना म्यानमारात् पथिभ्रष्टनैजाः।
निमग्नास्तदा पङ्किले ते विचित्रं
कियन्तस्तु तत्रैव मार्गे निलीनाः ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स वै यत्रतत्र प्रशस्तैर्विवृद्धै-
रभून्मार्ग आपत्तियुक्तो जनानाम्।
पथि प्राणिनः पङ्कयुक्ते मृतास्ते
न गन्तुं तदा प्रारभन्ते हतास्ते ॥६६॥

अनेके जना मार्ग एव प्रमग्ना
मृताश्चेति दुःखस्य शैलोऽयमस्ति।
स्वयं दुःखिभिर्नैजबन्ध्वादिहीनै-
रहो त्यक्तवन्तस्तथा ते विपन्नाः ॥६७॥

असङ्ख्यव्यसुस्वर्गतादुःशवेषु
चलन्तो जना नैकशो रोगयुक्ताः।
व्रणैरङ्किताङ्गाः प्रलीनाः सुपङ्के-
ऽप्यहो आपदो भूरिशस्तत्र दृष्टाः ॥६८॥

विचित्रैर्विपद्वैरिभिस्ते परास्ता
जनाः पीडिता नैकशस्ते विमार्गे।
प्रवर्षैर्गजाक्रान्तमार्गा असङ्ख्याः
प्रयातैरहो कैर्न दुःखं विषोढम् ॥६९॥

कथञ्चित्तदा प्राणयात्रानिमित्तं
सुवर्णेन लब्धाः सुरक्षाः पदार्थाः।
अमूल्येन हेम्ना प्रलब्धैः पदार्थैः
कियत्कालपर्यन्तमेते समर्थाः ॥७०॥

विभिन्ना जना मार्ग एव प्रभग्ना
मृताश्चेति दुःखस्य वार्ता विचित्रा।
स्वयं दुःखिभिर्नैजसार्थैर्विहीनै-
रहो त्यक्तवन्तः पथस्ते विपन्नाः ॥७१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनाः प्रत्यहं खाद्यपेयैर्विहीनाः
बहूनां दिनानां कृते नैव शक्ताः।
अमुष्यां तिथौ केवलं तोयपानं
समेषां कृते जातमेकं सुभोज्यम् ॥७२॥

तृषार्ताः कियन्तः पुरः प्राप्तनद्यां
व्रजन्तो मृताः पीयमाने जलेऽस्मिन्।
ततस्तत्र ते ब्रूडितास्तोयराशौ
विसृष्ट्य जनैः स्वीयवर्गैश्च तत्र ॥७३॥

इमं भीषणं प्राणिमृत्युं विमृश्य
कथङ्कारमेषां शुभं स्यादिदानीम्।
इति प्रायशश्चिन्तयन्तो विदग्धा
अनेकान् समुड्डीयमानानपश्यन् ॥७४॥

विमानानि खे वीक्ष्य पान्थाः समस्ता
भृशं तुष्टुवुस्त्राणलब्धेर्विचारात्।
अहोरात्रमार्गस्य जातेन तेन
प्रकृष्टान् तदा पीडितान् तान् समीक्ष्य ॥७५॥

स्थितेर्दर्शकास्तत्र याता तदानीं
यथा मार्गजातस्य दुःखस्य मात्राम्।
तथा दृष्टदृश्यं प्रशस्तं प्रकोप्यं
निवेद्यैव ते स्वीयमार्गाद् विमुक्ताः ॥७६॥

तदानीन्तनाङ्लाः प्रशास्तार आप्ता
विभिन्नानि दुग्धादिवस्तूनि तत्र।
सुरक्ष्यैव तद्वायुयानैरनेकैः
सुपातैरजस्रं भृशं पालितास्ते ॥७७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःखेन पीडितजनेषु तदा विपत्ती-
र्वीक्ष्यैव शासकवरा बहुदुःखिताश्च ।
पश्चात्ततो विविधवस्तुसुदानजेन
कार्येण तोषजननात् सकलाः सुतुष्टाः ॥७८॥

आचार्याश्रमपूर्णचन्द्ररचिते सौख्यप्रदे शाम्भवे
सौन्दर्येण युते प्रकृष्टकविताश्रेष्ठे जनानन्ददे ।
काव्येऽस्मिन् विपदष्टमोऽत्र करुणः सर्गः समापूरितो
दृष्ट्वाऽङ्कं सुविवेचकाः सहृदयास्तुष्ट्यः स्युरीशात् प्रभोः ॥७९॥

॥ इति अष्टमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवमः सर्गः

(भूस्खलनकम्पजलप्लावाग्निदाहचक्रवातवात्यादिवर्णनात्मकः)

भुजङ्गा यथा भीतितः प्राद्रवन्ति
सुशीघ्रं तथैवाऽव्रजन् मानवास्ते।
यथा स्नातकाश्छन्दसः सम्प्रयोगात्
सुतुष्टा भवेयुर्बुधास्तत्त्वविज्ञाः ॥१॥

अनेनैव मार्गेण याने पुरस्ता-
न्न लब्धाः पदार्था अनेके त्वभीष्टाः।
तथापि प्रियं सर्वथा नीरमेव
सुपीतं जनैः केवलं वस्त्वप्राप्तेः ॥२॥

अधः सुस्तवस्तुप्रभेदे सुकिञ्चिद्
यथाऽग्रे प्रयाते जनाः पीडितास्ते।
न लब्ध्वा भृशं ते बभूवुर्विचित्राः
कथं सार्थकाः स्याम वस्तुग्रहेऽत्र ॥३॥

मदीयेऽत्र सङ्घे प्रशस्ता वरिष्ठा-
स्ततः पञ्चषा एव जाताः समर्थाः।
वयं चाऽत्र वस्तूनि लब्ध्यै सयत्ना-
स्तथापीह मान्द्येन लब्धं न किञ्चित् ॥४॥

कथं मार्गयाता वयं प्राणरक्षां
करिष्याम इत्थं बुभुक्षापरीताः।
यथा ते जना दुःखिताः खाद्यहीना
वयं चाऽत्र ह्यद्यैव यामोऽन्तरिक्षम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदस्माभिरद्यैव चिन्त्यं सुशीघ्रं
कथं तत्पिताऽयं सुतैर्हीन एव।
जनानां हठान् मर्दनात् सन्निपाते
मृतः किं विधेयं पथि व्याकुलैस्तैः ॥६॥

पुनः स्वाग्रतस्ते यथापूर्वमेव
विभिन्नानि वस्तूनि वर्षन्ति नूनम्।
तदा प्रारणरक्षा भवेद् वै सुखेन
ततो वेगतस्तत्र गच्छेम विज्ञाः ॥७॥

इमे प्राच्यपान्था अनेके पुरस्ताद्
गताः शीघ्रतः खाद्यलाभेच्छयैव।
पुनस्ते बृहद्भिर्विभेदैः परीता
मृता नैकशो भागहारा अपीमे ॥८॥

अनेनैव मार्गीयबाधाशतैस्तैः
सहस्रैश्च पीडाप्रभेदैश्च पर्यक्।
समेता जना भाग्यलेशेन शिष्टा-
स्तथापीह तेषां न विश्वास आसीत् ॥९॥

न तिष्ठेम नूनं न जीवेम सत्यं
भविष्याम एवेति सार्थक्ययुक्ताः।
व्रजन्तो वयं रोगतो जन्तुतो वा
मरिष्याम इत्येव निश्चप्रचञ्च ॥१०॥

तदा पान्थसार्थैः सुदुःखं सहस्रं
सचित्कारपूर्णं वचस्तत्र सृप्तम्।
ततो नीरवं तत्स्थलं प्रेक्ष्य ताव-
दबोध्यत्र सर्वैर्न वाच्या कथेति ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलं नेत्रदृष्टैर्विचित्रैरनेकै-
र्विदृश्यैः कुदृश्यैर्यथा स्वं विवृत्तैः ।
अतः सम्प्रति स्वस्थचित्तेन तावत्
यथा दृष्टपूर्वं वदामोऽग्रमार्गे ॥१२॥

उपायैः सहस्रैः प्रकृष्टोपचारा
अपीहाऽवसानं गता नष्टयत्नाः ।
न रक्षापरा केऽपि कस्याऽपि शक्ता
विना रक्षकं देवमेकं ह्युमेशम् ॥१३॥

तदाङ्ग्लाः प्रशास्तार उच्चैः सुयानै-
र्वियद्गामिभिः पातयाञ्चक्रिरे ते ।
प्रकृष्टं सुदुग्धं प्रियं चौषधादि
विलोक्यैव ते घस्मरा घट्टिता द्राक् ॥१४॥

अहं स्यामहं स्यां पदार्थग्रहीता
स्वयं स्यामहं स्यां प्रधानोऽग्रयाता ।
इति व्याकुलाः केऽपि कालानुसारं
पुरस्तात् कथञ्चित् प्रयाता विलम्बात् ॥१५॥

तदा तैर्हि किञ्चिन्न लब्धं प्रदेभ्यो
निवृत्तास्ततो मूर्च्छिता बन्धुपार्श्वे ।
अनेनैव दुःखातिरेकेण केचि-
दसङ्ख्या अहो मृत्युलोकं प्रयाताः ॥१६॥

प्रदृष्टस्तदा दुर्बलैर्दूरतोऽसौ
ह्युडूयुद्धतुल्यो जनानां विमर्दः ।
गृहीतं च कैश्चित् कियद्वस्तु हस्ते
तदन्येन तद्वस्तु शीघ्रं विकृष्टम् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तटिन्यः पथिस्थाः समुत्तालवेगा-
स्तरङ्गाकुलास्तीव्रवाहाः प्रजाताः ।
तदा वर्षकैर्मेघसङ्घैः समन्तात्
सरिद्वृन्दमासीत् प्रचण्डं सगर्वम् ॥१८॥

तदा पारयानेऽसमर्थाः कियन्तः
प्रवाहैर्गृहीता मृतास्तत्र नद्याम् ।
ध्रुवं मारणीयैरनेकैश्च विघ्नै-
र्वृता मानवाः केचिदेव प्रतीर्णाः ॥१९॥

जनानां सुवर्षायुते घोरकाले
पथिस्था नदीसंहतिः कालरूपा ।
जनानां प्रवाहेन साकं वहन्ती
व्यजायन्त दुःखस्य वार्ता विचित्राः ॥२०॥

भूमौ सदा विविधदुःखयुता मनुष्या
अन्ये च जीवनिवहा नितरां तथैव ।
दुःखाकुला अतिशयेन सुविप्लवेन
भूकम्पवारिबहुलादिभवैर्विचित्रैः ॥२१॥

अत्यन्तवर्षणजलेन सदैव पूर्णा
भूमिर्निरन्तरमहो प्रतिवर्षभिन्ना ।
ग्रामेषु पूर्सु सततं जलवर्षणेन
सर्वा मही भवति पूर्णजला न गम्या ॥२२॥

भूमौ द्विभाग इह साम्बुरजस्रमस्ति
तद्भिन्नतार्तियिकभाग उपात्तनीरा ।
किं कार्यते बुधजनैरसुरैः सुरैश्च
दुःखाश्रितैः सततदीनजनैरिदानीम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आपत्तिनाशकरणे न च केऽपि शक्ता
वर्षायुतेऽत्र समये विकटेऽतितीव्रे ।
ग्रामाः पुराणि कृषिभूमिसुगोचराश्च
वस्तूनि तानि जलसात्कृतकानि सन्ति ॥२४॥

भूयोऽत्र भूमिसकलं जलसात्कृतं तद्
दर्शं प्रकम्पितजना नितरां विषण्णाः ।
उच्चैस्तु रोदिति निरीहमनुष्यसङ्घः
पान्थाश्च खिन्नमनसोऽम्भनिरुद्धमार्गाः ॥२५॥

सर्वत्र भूमिसकलां जलसात्कृतां तां
दर्शं प्रदर्शमभितो जनता विषण्णाः ।
उच्चैस्तरां हृदयरुद्धनिरीक्षका ये
ते चेह रोदनपराः कुशलं न केषाम् ॥२६॥

नद्यो निरन्तरविजातजलप्रवर्षै-
रुत्तालरूपसृतभीषणरूपधर्त्र्यः ।
नौकादिसाधनघनैरपि नैव लब्धा-
वासा जनैरिह जलेन भृशं निरुद्धाः ॥२७॥

सर्वत्र लब्धजलधारककूपवृन्दं
पानीयपूरितमभूत् सकलं कलत्रम् ।
गम्भीरदूरनलकानपि तान् प्रपूर्णान्
वीक्ष्यैव जीवनिवहाः सुतरां विपन्नाः ॥२८॥

वर्षाकृतेन दुरितेन जनाः सदैव
वर्षर्तुरागमनविक्षुभिताः सभीकाः ।
ग्रामान्तरे गमनकार्यमिहात्र रुद्धं
ज्ञात्वाऽतितीव्रतरदुःखहता भवन्ति ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वारीप्लवोद्भवदुरन्तभयात् सदैव
वर्षेषु दुःखितजनाः सकलत्रकास्ते ।
तीरान्तरे दुरितमग्नतया प्रकामं
ज्ञातीन् विलोक्य रुदितान्न भवन्ति सुस्थाः ॥३०॥

वारिप्लवैः प्रतिसमं सकुलानि तानि
राष्ट्राणि सर्वविधविप्लववन्ति भान्ति ।
ग्रामा गृहाणि सकलानि जलाप्लुतानि
ह्यापदद्रुतं सकलवस्तु विभिन्नराष्ट्रे ॥३१॥

वारिप्लुता विविधदेशजराजधान्य
आपद्गताः प्रतिगृहं विविधैर्जलौघैः ।
यानप्रयाणकरणे क्षमशक्तिहीना
रुद्धा भवन्ति निखिला गमनागमार्थम् ॥३२॥

आकाशयानजलयानमहीप्रयाणा
अन्यान्ययानविधयः प्रतिबन्धिताः द्राक् ।
सर्म्पक एव जनतासु तदा निरुद्धो
जायेत किं क्रियत इत्यतिदुःखवार्ता ॥३३॥

सम्पर्कतारजटितं किल पूर्वजालं
किञ्चिच्च वारिबहुलैः सहसा न्यपाति ॥
तस्यां स्थितौ सकलमेव समृद्धराष्ट्रे
ह्यापद्गतं भवति तत्र च कस्य दोषः ? ॥३४॥

एवंविधैर्बहुविधैः सृतरोधजालैः
प्रायेण सर्वधरणी जलसाद्भवित्री ।
आपद्गुताश्च पशवो मनुजाः पतङ्गा
दैवेन जातविपदां ततिमातरन्ति ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अट्टालिका विविधरत्नयुता अनेका
आद्योद्भवाः ससुखदाः किल ता विचित्राः ।
सर्वा अपीह जलविप्लवयुक्तकाले
रम्या अपि प्रखरविघ्नयुता अरम्याः ॥३६॥

क्षेत्राणि सर्वविधपक्वफलादिधान्यैः
पूर्णानि सुन्दरतराणि विकर्षकाणि ।
रुष्टेन्द्रवज्रहतिजातजलीयविघ्नैः
सर्वाणि बीजसुधनानि जले मिलन्ति ॥३७॥

उद्योगभूमय इहैव जगत्सु सन्ति
नानाविधा निखिलमानवसर्वदात्र्यः ।
ग्रामीणसौख्यदविचित्रनवीनशय्या
रात्रिन्दिवं प्रसुखयन्ति च ता विपन्नाः ॥३८॥

पानीयमस्ति सकलस्य चराचरस्य
ह्याधारभूतमिह जीवनदञ्च तत्त्वम् ।
तेनाऽत्र लोक उपमारहिता वदन्ति
पानीयजीवनयुताः किल सर्वजीवाः ॥३९॥

जीवान् सदैव नियतं परिपोषको य-
स्तत्तोयराशिरधुना सकलैर्न मान्यः ।
पीयूषमत्र न भवेद्धि विषं कदाचित्
सत्यं हि सम्प्रति जलं विषतुल्यजातम् ॥४०॥

नानाविधैर्वसुमतीजसजीववृन्दै-
र्वर्षायुते विकलकालघने विचित्रे ।
रात्रिन्दिवं प्रसहितो जलघात उग्रः
प्रत्यब्दमत्र बहुशः प्रभवन्ति घाताः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नव्याम्बुदाः परित उच्चरवा रमन्ते
तच्छब्दकर्णनसुखेन मयूरवृन्दम् ।
वारं सुवारमिह नृत्यरतं मनोज्ञं
सन्दृश्यते बहुजनैः प्रकृतिप्रियैस्तैः ॥४२॥

मेघाधिकैः परित आप्तसजातिकेन
सङ्घर्षकार्यकरणेन विघट्टितैर्द्राक् ।
वज्राणि तत्र निपतन्ति निरन्तरं यत्
तैरेव भूरि-विभवा जनता विनष्टाः ॥४३॥

केषाञ्चिदत्र सुतनूषु पवेः प्रपातात्
तत्रैव मृत्युरतिहानिकरः सुघोरः ।
सञ्जायते न च तदा सहयोगकारी
कोऽपीति वस्तुगतसारमिमं शृणुध्वम् ॥४४॥

वारिप्लावेन सततपूर्वभवान् विचित्रा-
नानन्दलब्धविभवान् सकलत्रसार्थैः ।
भोक्तार आप्तजननायकशीलवन्तः
सौख्यप्रकोटिसहितैः सततं रमन्ते ॥४५॥

प्राक्प्राप्तसर्वविभवा जनताः समस्ताः
पश्चात्तु हीनधनधान्यतया विपन्नाः ।
जायन्त इत्यपि कथं कतिचिन्मनुष्या-
स्तत्राऽपि ते प्रकृतिलब्धतया सहन्ते ॥४६॥

वारिप्रवाहजशतैर्विकटैः सुदुःखै-
र्युक्तैर्निरन्तरसपत्नजवत् स्वमानि ।
सुब्रूडिता जलगभीरयुतेऽपि कुण्डे
तस्माच्च युक्तिबलतः सहसा विमुक्ताः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रामे जलं नगरलब्धजलं जलौघै-
र्व्याप्ताँश्च सर्वपथिकान् घनघोरगत्या।
सौधस्थिताः सपरिवारजना महन्तो
वारिप्रभं सुतुमुलं रयमाप्य खिन्नाः ॥४८॥

वार्यौघलब्धमृतजीवसहस्रसङ्ख्यै-
र्नानाविधैः पशुमनुष्यविटैः समन्तात्।
व्याप्ता मही सुकृतिनां भयदा तदाऽभूज्-
जातं जगत्सकलकं विकटं विचित्रम् ॥४९॥

तोयप्लवैः सकलदेशभवा असङ्ख्या
मुख्यालयाः सुरुचिरा विकृताः समन्तात्।
भिन्ना अनन्त-सुखदाः सुगृहाग्रभागाः
सर्वं विरूपमभवत् प्रकृतेः प्रकोपात् ॥५०॥

सर्वंसहे प्रकृतिदेवि ! नमो नमस्ते
त्वां सर्वथा वयमहो नितरां स्मरामः।
अस्माकमत्र सकले सुमनोज्ञराष्ट्रे
स्यात् सर्वदैव कुशलं तव दृष्टिपातात् ॥५१॥

इदानीं सर्वत्र प्रखरतरवर्षाभिरभितो
जलौघा दृश्यन्तेऽधिक-नृ-पशुसङ्घेषु भयदाः।
समुत्ताला नद्यस्तटविटपपातिन्य उरसा
जलप्लावाधिक्याज्जगति दुरवस्थैव सततम् ॥५२॥

ऋतौ वर्षायां ते सपदि जलसात्कारितगृहा।
विदेशे स्वीयेऽपि श्रवणनयनैः प्राप्य सकलाः।
प्रकृत्या सञ्जातं सलिलरयतो दूरग-बहून्
न शक्याः संरोद्धुं कथमपि पदार्था विघटिताः ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलैः पाल्या जीवा जगति विविधा जातिनिवहाः
कदाचित्तैरेव प्रबलतरसांवर्तशतकैः ।
प्रपीड्यन्ते तेऽपि प्रचुरसुखिजीवा अपि बहु
कथङ्कारं जीवैर्भवति सुखधार्योऽत्र विभवः ॥५४॥

अनेकेऽस्मिन् स्थाने प्रतिशरदमाप्ता क्षिततितिः
कृतो राष्ट्रध्वंसो विकटजलधाराभिरभितः ।
सकष्टं मृत्योर्द्रागभिमुखगताञ्जीवनिवहान्
विलोक्यैवं केऽपि प्रतिकरणकार्येऽक्षमतराः ॥५५॥

जलीय–विविधैरयैरतितरां बुधाः पीडिता
नरा युवति–बालका विविधजन्तवस्तर्जिताः ।
स्वजातिपरिवेशतः कथमपीह भिन्ना जनाः ।
सदाऽविचलचेतसा सनति सेहिरे पीडनम् ॥५६॥

गृहादिशरणे स्थलेऽपि परितो जलैरावृते–
र्वहन्ति बहुधा स्त्रियो रुदितबालकान् पृष्ठके ।
सशब्दपशुपक्षिणो विकृत–गोष्ठनीडान् भृशं
कथं कथमपीह खण्डितगृहे वसन्त्यत्र ते ॥५७॥

गिरेरुपरिभं सुदूरमपि भूतलं प्राणिभिः
सुसेवितमहो अतीव जलवीचिराक्रान्तकैः ।
स्वकीयपरिवारतो बुधजनैश्च तैः सेविता
बहूनि दिवसानि ते कथमपि प्रवासे स्थिताः ॥५८॥

विशालवसुधा हता जलरयप्रभिन्ना यदा
तदा बहुतरा जले समुदितेषु वार्वीचिषु ।
शवाश्च सततं जनैः सपरिवारजातैः स्मृता
जना अतिविचित्रकष्टसहने समभ्यस्तकाः ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधिकसलिलजातं ताण्डवं तं विलोक्य
प्रकृतिशरणयाताः बुद्धिमन्तः कियन्तः ?
स्वनयनपथयातान् भीषणान् दृश्यसन्धान्
सकलभुवनपात्रा निर्मितान् मेनिरे तान् ॥६०॥

अतिशयनिजकैः पुत्रादिभिः संयुतैस्तैः
सकलपरिजनैर्नित्यं सहैवाऽऽश्रयद्भिः ।
विकट-जलरयैर्दूरङ्गतैर्दुःखसंस्थै-
रिदमतिशयकष्टायैव जातं सुबुद्धम् ॥६१॥

सुदुःखेन गेहादिनाप्ता व्रजन्त-
स्तदा सर्वकारीयसेवाऽपि लब्धा ।
तदा कानिचिद् वासराणि प्रयाप्य
प्रशंसार्हगोहाटिनाम्न्यां नगर्याम् ॥६२॥

ततः प्रायशः क्षीणमार्गाश्रमा वा
ह्यगच्छाम सानन्द-तेजःपुरं तत् ।
तदा रोगिणी आवहन्ती मदीया
प्रसूः सर्वकारीयलब्धे गृहेऽसौ
चिकित्सापरा तत्र किञ्चिद् दिनानि ॥६३॥

मृता पादजात् स्फोटकात् सा तदानीं
वियोगो जनन्यास्तथाभूत आसीत् ।
यतोऽस्माभिरत्यन्तदुःखेन तत्र
जगत् सर्वमेतत्तमोव्याप्तमाप्तम् ॥६४॥

न दृष्टिः प्रदर्शार्थशक्तौ तदानीं
जगत् सर्वमेतत् तदा शून्यभावम् ।
गतं नात्र सन्देहलेशोऽस्ति कश्चित्
तथैवेति जातं जगच्छून्यभावम् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततोऽस्याः पुरः सर्वसौख्यस्य दात्र्या
विमुक्ताः समे ग्राम–नौवीलमाप्ताः ।
तदा केवलं जीवितैर्नेमसङ्ख्यैः
कियन्मासवृन्दं सकष्टं विषोढम् ॥६६॥

धरायां तदा जायमाना विपत्ति–
र्जनान् रोदयन्तीति नात्रान्यथाऽस्ति ।
तथा पीडिताः केचिदत्रैव मृत्युं
समालिङ्ग्य संयान्ति गन्तव्यदेशम् ॥६७॥

भूकम्पयुद्धजलवाहकृशानुजातै–
र्वात्यादिभिः प्रकृतिजन्यविचित्रभीतैः ।
कष्टप्रदैरतितरां सकलाः सुदेशाः
सम्पूर्णविश्वजनता च भृशं ह्रसन्ति ॥६८॥

सम्पूर्णेऽपि सुराष्ट्रमुख्यनिवहे सम्प्राप्तभूविप्लवै–
र्भूकम्पेन जलौघवेधशतशः प्राप्तो निधिर्व्यापकः ।
सर्वोऽप्यत्र समुद्रभागविविधै रम्येषु व्याप्तोऽनिशं
तेनासौ सततं जनैरविरतं रत्नाकरः कथ्यते ॥६९॥

आचार्याश्रमपूर्णचन्द्ररचिते माङ्गल्यदे शाम्भवे
सौन्दर्येण युते सुचारुकविताश्रेष्ठे मनोमोहके ।
काव्येऽस्मिन्नवमः स्वजीवनकथाकारुण्ययुक्तो व्यगात्
यं लब्ध्वा दशमं भवन्तु कवयश्चानन्दपूर्णाः शिवात् ॥७०॥

॥ इति नवमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दशमः सर्गः

(भूस्खलनभूकम्पादिजनितविप्लववर्णनात्मकः)

जातैर्वसन्तसमये तिलकैः प्रसिद्धि-
र्लब्धा विचित्रसुभगा जनतासु रम्या।
तेनाऽत्र सर्वविदुषां रुचिराऽस्ति सा वै
सङ्गृह्यतेऽत्र कविताकृतये मयाऽपि ॥१॥

भूलोकनिर्मितिदिनादधुनाऽत्र याव-
ल्लोकेषु जातबहुला विविधाः प्रकम्पाः।
तेष्वेव मानवकृमिप्रकृतिप्रधाना
जीवा अनेकगुणकाः पतगाश्च भीताः ॥२॥

भूकम्पजातगहनैः क्षतविक्षतैस्तै-
र्देशाः समस्तधनधान्ययुता विपन्नाः।
नार्यो नरा बहुविधैर्विकटैः सुविघ्नै-
र्जाताः स्वशक्तिरहिताः प्रतिघस्रमत्र ॥२॥

गोष्ठानि हस्तिभवनानि च वाजिशाला
आपद्रुता विकृतरूपतया प्रभग्नाः।
मार्गाश्च पाठ्यभवनानि विरूपरूपै-
र्युक्तानि तर्हि विषमा प्रकृतिर्विरूपा ॥३॥

याथार्थ्यमत्र कथने न च केऽपि विज्ञाः
पश्चाद् भवन्ति सततं विदितञ्च सर्वैः।
भूकम्पजातविलयैर्भुवि सर्वजीवै
राहित्यसूचक उपद्रवकोऽयमस्ति ॥ ४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धान्यानि शाकविविधानि फलानि यावत्
सर्वाणि दूषितगुणानि भवन्ति कम्पे।
उच्चैस्तमेऽपि भुवि जातसुकम्पजातै-
र्घृष्टाः समेऽचरचराः सकला विपन्नाः ॥५॥

शैला अनेकविधदुर्गतिमाप्तवन्तो
विष्फोटकैरतितरां स्फुटिता प्रघट्टैः ॥
सञ्चूर्णिताः कतिपये क्षितिसात्कृताश्च।
जीवादयोऽत्र सकला नितरां कियन्तः ॥ ॥६॥

किं वर्णयाम इह घोरतरे प्रकम्पे
भूप्रस्खलेन सुतरां विहताः समस्ताः।
आराष्ट्रविप्लवगता स्थितिरुद्धताऽस्ति
सर्वे च दर्शकजना नितरां निराशाः ॥ ॥७॥

आनन्दमग्नजनता न कदापि कम्पं
भूमेर्हि चिन्तितवती प्रबलं विचित्रम्।
एतादृशीं सकलनाशकरीं विपत्तिं
प्राप्यैव दुःखितहृदोऽतितरां प्रखिन्नाः ॥८॥

वृक्षाः प्रकोटिश इतस्तत आनतास्ते
मध्ये प्रभज्य पतिता जनतोपरिष्टात् ॥
तेनाऽत्र भूस्खलनजे महति प्रकष्टे
सम्पीडिता मनुज-वानर-पक्षिसङ्घाः ॥ ॥९॥

नद्यो नदा विपिनशैल-विखण्डखण्डै
रुद्धाः स्वमार्गपरिवर्तनजैश्च कार्यैः।
संवाहिता अगणिता जनताऽन्यजीवाः
सन्दर्शका विविधविज्ञजना विभीताः ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आपत्तिलीनविपिनानि बृहन्ति तत्र
सम्मिष्ट–फाल्यरस–सम्पद आदधन्ति ।
उत्खातितानि कतिचित् कतिचिच्च तत्र
खण्डैः सहैव पतिताः समपातिकम्पैः ॥११॥

मार्गाः समस्त–सरलाल्पबृहद्–वपुष्का–
स्ते राजमार्गसहिता नितरां विपन्नाः ।
मध्ये प्रविघ्नपथिकान् भुवि मेलयन्तो
भीतेः प्रदाः सकलपद्गजना विपन्नाः ॥ ॥१२॥

सौगन्ध्यवद्भिरधिकैः सुमनोहरैः स्वैः
पूर्वं सदा जनसुमोदकरैः सुपुष्पैः ।
रात्रिन्दिवं परिमलं परितो विकीर्य
ख्यातिं गता अवनिमध्यगताः सुवाप्यः ॥ ॥१३॥

भूकम्पकम्पनबलेन यदा शतानि
धूलीविशीर्णकुसुमानि मनोहराणि ।
अन्तः प्रगर्तविवराः सकलैरगम्या
जाता अहो ! अपि मनोहर–वाटिकास्ताः ॥ ॥१४॥

भूकम्पघोरतरघातबलेन विश्वे
ग्रामे पुरीविपणिरम्यगृहे च गोष्ठे ।
भूस्फोटनेन जनितेषु प्रगर्तकेषु
लीना अहो गृहजना अयुताश्च कष्टम् ॥ ॥१५॥

आनन्दसिन्धुभिरिहैव भुवि प्रजातैः
पङ्केरुहैरतितरां रुचिरास्तडागाः ।
स्वच्छोदकाः विमलवारिजकान्तिकान्ता
ध्वस्ता असङ्ख्यविभवाः पृथिवीप्रकम्पैः ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्णा जनेन परितः कमलैश्च तद्वत्
सम्पूर्णवस्तुजनितैर्विविधैः सुरम्यैः ।
पुष्पाचितैश्च सुमनोहरदृश्यभेदै-
राकर्षका अपि तडागतटा विशीर्णाः ॥१७॥

ग्रामा अनेकविधका विभवैः समेताः
सद्धर्मतत्परजनैः सततं परीताः ।
सत्पुत्र-सन्तति-सुहृज्जन-बन्धुवर्यै-
रासेविताः सकल-सौख्ययुता विनष्टाः ॥ ॥१८॥

भूकम्पनष्ट-गृहमन्दिर-चैत्य-गुम्बा-
मस्जीद-चर्च-विविधा रुचिरा विलोक्याः ।
तात्कालिका-जनसमाज-गता अनेके
नार्यो नरा अतिशयान्नमिता विपत्तेः ॥ ॥१९॥

सम्पूर्ण-राष्ट्र-नगरेषु भवाः पदार्था
उत्कृष्ट-कौशलयुता निखिला कलाश्च ।
स्वर्हासका गृहधुरन्धरका विनष्टा
भूकम्प-कम्प-निहता इतिहाससूच्याः ॥२०॥

रम्या अनेकविधभौतिकनिर्मितिः श्री-
र्युक्तालया सकलसौख्यसुदा अपूर्वाः ।
स्वस्तुल्यतैजसयुताः सुमनोहरास्ते
जाताः प्रकम्पशतशः खलु नामशेषाः ॥ २१॥

विश्वस्य सर्वविषयेषु विजातकम्पे
तज्जन्य-जन्य-सुविलक्षण-राष्ट्रपाते ।
नानापणाः स्वकमनोहरभागहीनाः
उद्योग-धान्य-भवनान्यपि भूमिसात्ते ॥ ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यालयाः कनकराशि-धनानि कोषाः
सर्वे च भूतलगता न च शेषलब्धाः ।
क्षेत्राणि धान्य-सुवसूनि सुरम्यकाणि
सर्वाणि भूमिविहितानि न किञ्च सुस्थम् ॥ ॥२३॥

गर्ते निलीनविभवेष्वतिशोकवन्तो
रात्रिन्दिवं विगतवित्ततया मलीनाः ।
सम्पूर्णजीवनकृतैः श्रमपूर्णकृत्यैः
सम्यक् समर्जितसुखाश्च वयं विनष्टाः ॥ ॥२४॥

एवंविधैः सकलजीव-विघातकैस्तै-
र्भूकम्पकम्पशतकैरधिकं विनष्टम् ।
सञ्जायते विविधदेशविभक्तभूमौ
नैवाऽत्र किञ्च परिवर्तनकारि तत्त्वम् ॥२५॥

भूर्ब्रूडिताः स्खलनजैरवनेः प्रकम्पै-
र्देवालयाः सुनगरापणका नगर्यः ।
गर्तेषु भूगतचराचरजीवलोकाः
शून्यायमानजगतः खलु भाग्यहीनाः ॥२६॥

जात्वत्रजैरधिक-भूमिगतैः प्रकम्पैः
कोटिप्रकोटि-गुणिता मनुजान्यजीवाः ।
नाशङ्गता अधिकभूः परिवर्तिता च
भूमौ स्थितानि सकलानि विखण्डितानि ॥२७॥

ख्यातुं नशक्यविभवो धनिराष्ट्रभावा
आकाशचुम्बिनगरस्थगृहेषु तत्र ।
वारं हि वारमिहजात-विपत्तिशैलाः
सर्वैश्च मानवगणैः पशुभिर्विषोढाः ॥ ॥२८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाध्यात्मके प्रकृतिजन्यविपद्विशेषे
सर्वे जडाऽजडचया नितरां निमग्नाः ।
कालेन ते च सकलाः प्रहसन्त इत्थ-
मेवं स्थितिर्भवति नाऽत्र समर्थभूताः ॥२९॥

भूकम्पघात-विकृता बहवः प्रदेशा
देशाश्च लब्धसुविघट्टन-नष्टशोभाः ।
उद्धारकर्मणि न कोऽपि तदा समर्था
ध्वस्ताश्च सर्वजगति क्षतियुक्तजीवाः ॥३०॥

धान्यादि-वैभव-सहस्र-सदा-प्रदाना-
द्देशाः सदैव सुखदार्थिकपक्षबल्याः ।
उद्योगिनो बहुविधैर्घटनैर्विकृष्य
व्यापार-धन्ध-बहुलाः किल येऽस्मरन् द्राक् ॥३१॥

कम्पाः कलाविदजनान् बहुशास्त्रविज्ञान्
वैज्ञानिकान् विविधकौशललब्धकीर्तीन् ।
वायोर्नियन्त्रणरतान् सुमनीषिणस्तान्
सर्वान् धुरन्धरजनान् समकम्पयद् द्राक् ॥३२॥

ध्वस्तेष्वनेकविधवस्तुषु जातशोकाः
प्राज्ञाः सुबुद्धिसहिताः पुनरेव लग्नाः ।
ध्वस्तस्य पूर्ववदिह प्रभवाय लग्ना-
स्ते चात्र दीर्घसमयेऽपि फलेन हीनाः । ॥३३॥

नैराश्यकाः प्रतिफलं गतवित्तलग्नाः
सर्वैर्भृशं नियतिजन्यफलं विदन्ति ।
भूकम्पकम्पबहुलेऽत्र विभिन्नदेशे
जाता विपत्तिरधिका कतिचिन्न सह्याः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तीव्रं प्रपीडितजनाः प्रियसार्थहीनाः
पत्नीपतिप्रियजनैश्च भृशं वियुक्ताः।
सम्मूर्च्छिताः सततघातशतैर्विचेष्टाः
साहाय्यमात्रमनिशं वत याचमानाः ॥३५॥

आकाशचुम्बिन इहैव भुवि प्रणीताः
शोभायमानबहुमूल्ययुता अनेके।
स्वर्हारका अतिसुरम्यविधानजाता
ग्राम्यालया अतिघनाः सुरकर्षकाश्च ॥३६॥

भूसात्कृता विकटकम्पशतैः समेताः
शुभ्रालया गगनचुम्बिन उच्चरूपाः।
विध्वंशिता मनुजपक्षिपशुप्रभेदा
गर्तैश्च धूलिबहुलैश्च धरा विरूपा ॥३७॥

भूकम्पकाल इह चोग्रविपत्तियुक्ता
नद्यो निरन्तरवहे प्रतिबन्धितास्ताः।
मार्गान्तराणि बहुधा कृतवत्य एता-
स्तत्राऽऽश्रिताः पुरवनादय आप्लुतास्ते ॥३८॥

भूकम्पविप्लवकृता बहवो विघाताः
ख्यातुं नशक्यविधया भुवि विद्यमानाः।
कस्याऽस्ति शक्तिरिह तत्कृतहानिवर्णे
नानाऽशिवं सकरुणं जगदादितत्त्वम् ॥३९॥

याथार्थ्यमस्ति स खलूत्तमदेवदेवः
कर्तुं विकर्तुमुत चाऽन्यथया कृतौ प्राङ्।
देवाऽधिदेव-शिव-धूर्जटिनामवर्ण्यः
शक्तः समर्थ इति तत्त्वविदां प्रघोषः ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्छ्रद्धया लिखितमत्र यथार्थवस्तु
जालेषु हानिविविधेषु यथार्थरूपम् ।
संवर्णितं विबुधसंसदि किञ्चिदत्र
तत्केवलं शिवसुभक्तिविदां समक्षम् ॥४१॥

उत्खातिता विविधवृक्षलताश्च गुल्मा
उत्पाटिता निवसतां वसतीरनेकाः ।
निष्पेषिता सुजनतानिवहा अनल्पाः
सञ्चूर्णिता रुचिरशैलगृहा अनेके ॥४२॥

भूकम्प–विद्ध–बहुसङ्ख्ययुते प्रदेशे
जाता अनेकविधहानिकराः प्रकम्पाः ।
तेषां सुबुद्धिविभवस्य जनस्य योग–
दानं न दृष्टमिह कैश्चिदपि प्रविज्ञैः ॥४३॥

भूमिस्खले सुपिहिते न मृताः कियन्तो
मर्त्यास्त्रयोदशदिनेष्वपि लभ्यमानाः ।
सौभाग्यभाज उदयोन्मुखलब्धरक्षाः
सन्त्येव सज्जनविभूतिमया अनेके ॥४४॥

अहो आपद्युक्ता अवनिभवजीवा असुभृतः
प्रकम्पे पीडादेः कथमपि सुरक्षां सृतवतः ।
अनेकां हानिं तां प्रकृतिजनितां प्राप्य च दृढान्
विरूपानेतान् वै सकरुणशिवः पाति सततम् ॥४५॥

प्रकम्पाघाताद् वै विचलितजना आश्रयगताः
समस्ता भौतिक्यो न सुसमविता नष्टगतिकाः ।
प्रदृश्यन्ते ते ते धनसुतमलीनाऽऽकृतियुताः
समस्तानां तेषां सततमवकः शङ्करगुरुः ॥४६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकम्पे भूजाताः सकलसचराः प्राणिनिवहा
भृशं दुःखार्तास्तेऽतिशयमलिनाः सन्ततियुताः ।
कथङ्कारं सर्वे वयमिह सुरक्षावृतदृढा
भवेमेत्येवं ते वत विकलतां प्राप्य निहताः ॥४७॥

अजस्रं संरब्धे प्रयतनविधौ व्यापृततमाः
समस्तास्तत्त्वज्ञाः क्षणमपि न शक्ताः प्रसहितुम् ।
अनेकैश्चोपायैः सहचरचराः सन्ततिवृता-
स्तथाऽप्येते सर्वे कथमपि न सार्थाः कृतशताः ॥४८॥

मनुष्यादीनां तेऽनिशसुखकरा देवसकला
इदानीं ते जाताः किमपि करणेऽत्यन्तमबलाः ।
प्रकृत्या तत्सर्वं कृतमिह सुसर्वासु ततिषु
न रोद्धुं सामर्थ्यं भवति जनुषां वास्तवमिदम् ॥४९॥

अतोऽसङ्ख्या जीवा भुवि जनितकम्पेन निहता
अनेकैर्द्रव्याद्यैर्भुवितलविलीनं स्वतितराम् ।
जडा जीवा अन्येऽजहुड-मृग-हस्त्यादिकगणाः
समे दुःखग्रस्ताः कथमपि सुरक्षाकृतचयाः ॥५०॥

किमुच्येत प्रख्येऽवनिजसुरिपोः कम्पविषये
प्रहारं कृत्वैवाऽतिशयविबलं कारितमिदम् ।
जगज्जीर्णं जातं तनयगृहिणीभिश्च सततं
सदाऽनन्दालब्धेः प्रजनितसुखास्ते वयमहो ॥५१॥

गृहीतं सर्वस्वं वयमिह न किञ्चित्करनराः
समस्तं रिक्तं तत् सपदि न सुखाऽवाप्तिसहिताः ।
कलत्रैः पुत्राद्यैः सहितगृहका नष्टविभवाः
कथं रक्षां कुर्मः क्व सहितसुतान् देशविकटे ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उन्मूलत्सकलाः सुघोरतरकाः कम्पा भुवो भीषणा
जाता यत्र सुनिश्चितं भवति तत्तीव्रा विपत्तिर्ध्रुवा।
भूखण्डेषु विजाततादृशनवैराघातिताः सज्जनाः
स्वाभीष्टैः क्षितिसंस्थितैः प्रभुवरैः संरक्षितास्ते तदा ॥५३॥

आचार्यप्रभपूर्णचन्द्ररचिते काव्योत्तमे शाम्भवे
वैचित्र्येण युते मनोहरकृतिश्रेष्ठे जगद्दुर्लभे।
काव्येऽस्मिन् दशमो धराचलनभूदुःखादिसर्गोऽव्यगाद्
रुद्रं वीक्ष्य बुधाः सदा प्रमुदिताः स्युर्देवदेवाधिपात्॥५४॥

॥ इति दशमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकादशः सर्गः

(जलाग्निविकृतिवर्णनात्मकः)

प्राप्ते वसन्त-समये तिलकैः प्रसिद्धि-
र्लब्धा विलक्षणतया जनतासु शोभा।
तस्मान्मया सुरुचिरा कविवंशमान्या
ह्यत्राऽपि काव्यसुकृतौ प्रगृहीतजाता ॥१॥

नामान्तरञ्च तिलकाग्रवसन्तिकाया
उद्भाषिणीति कवितारसिकैर्निरुक्तम्।
रामेण सन्निगदितं मधुमाधवीति
च्छन्दोविधा कविकुले नितरां प्रसिद्धा ॥२॥

भूमौ सदा त्रिविधदुःखयुता मनुष्या
अन्ये च जीवनिवहा नितरां तथैव।
दुःखाकुला अतिशयेन सुविप्लवेन
भूकम्पयुद्धसलिलप्रवहेण तेन ॥३॥

अत्यन्तवर्षणजलेन सदैव पूर्णा
भूमिर्निरन्तरमहो प्रतिवर्षभिन्ना ॥
ग्रामेषु पुर्सु सततं जलवर्षणेन
सर्वा मही भवति पूर्णजला विचित्रा ॥४॥

भूमौ त्रिभाग इह साम्बुनिरम्बुरस्ति
तद्भिन्नतार्तियिकभाग उपात्तनीरः।
किं कार्यते बुधजनैरसुरैः सुरैश्च
दुःखाश्रितैः सततदीनजनैरिदानीम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आपत्तिनाशकरणे न च केऽपि शक्ता
वर्षायुतेऽत्र समये विकटेऽतितीव्रे ।
ग्रामाः पुराणि कृषिभूमिसुगोचराणि
सर्वाणि तानि जलसात्कृतकानि सन्ति ॥६॥

सर्वत्र भूमिसकलां जलसात्कृतां तां
दर्शं प्रदर्शमभितो जनता विषण्णाः ।
उच्चैस्तरां हृदयरुद्धनिरीक्षका ये
ते चेह रोदनपराः कुशलं न केषाम् ॥७॥

नद्यो निरन्तरविजातजलप्रवर्षै-
रुत्तालरूपसृतभीषणरूपधर्त्र्यः ।
नौकादिसाधनधनैः सततं सुपारा
मर्त्याश्च सम्प्रति जलेन भृशं निरुद्धाः ॥८॥

सर्वत्रलब्धजलधारककूपवृन्दं
पानीयपूरितमभूत्सकलं कलत्रम् ।
गम्भीरदूरजलकानपि तान् प्रपूर्णान्
वीक्ष्यैव जीवनिवहाः सुतरां प्रखिन्नाः ॥९॥

वर्षाकृतेन दुरितेन जनाः सदैव
वर्षेषु दुःखितनिजाः सकलत्रकास्ते ।
ग्रामान्तरे प्रगमकार्यमिहैव रुद्धं
ज्ञात्वाऽतितीव्रदवदाहहता भवन्ति ॥१०॥

आप्लावनैः प्रतिसमं सकलानि तानि
राष्ट्राणि सर्वविधविप्लववन्ति सन्ति ।
ग्रामा गृहाणि सकलानि जलाप्लुतानि
चापद्रुतं सकलवस्तुपरे च राष्ट्रे ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वारिप्लुता विविधदेशजराजधान्य
आपद्गता प्रतिसमं विविधैर्जलौघैः ।
यानप्रयाणकरणेऽक्षमतां प्रलम्भ्य
रुद्धा भवन्ति नितरां गमनागमार्थम् ॥१२॥

आकाशयानजलयानमहीप्रयाणा-
न्यान्यप्रयाणविधयः प्रतिबन्धितास्ते ।
सम्पर्क एव जनतासु तदा निरुद्धो
जायेत किङ्क्रियत इत्यतिदुःखसिन्धुः ॥१३॥

सम्पर्कतारजटितं किल पूर्वजालं
किञ्चिच्च वारिबहुलैः सहसा न्यपाति ॥
तादृक्स्थितौ सकलमेव समृद्धराष्ट्रं
ह्यापद्गतं भवति तत्र च कस्य दोषः ॥१४॥

एवं विधैर्बहुविधैर्जलरोधजालैः
प्रायेण सर्वधरणी जलसाद्भवित्री ॥
आपद्गताः सुपशवो मनुजाः पतङ्गा
दैवेन संशयविनाशकृता भवन्ति ॥१५॥

अट्टालिका विविधरत्नयुता अनेका
आद्योपवाससुखदाः किल ता विचित्राः ।
सर्वा अपीह जलविप्लवयुक्तकाले
रम्याश्च ताः प्रखरविघ्नयुता अरम्याः ॥१६॥

क्षेत्राणि सर्वविधपक्वफलादिधान्यैः
पूर्णानि सुन्दरतराणि विकर्षकाणि ।
आदानकाल इह जातजलीयविघ्नैः
सर्वाणि बीजसुधनानि जले मिलन्ति ॥१७॥

उद्योगभूमय इहैव जगत्सु सन्ति
नानाविधा निखिलमानवसर्वदात्र्यः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रामीणसौख्यदविचित्रनवीनपात्रै
रात्रिन्दिवं प्रसुखयन्ति च तान् विपन्नान् ॥१८॥

पानीयमस्ति सकलस्य चराचरस्य
ह्याधारभूतमिह जीवनदं सुतत्त्वम् ।
तेनाऽत्र लोक उपमारहिता वदन्ति
पानीयजीवनसमे किल सार्थके च ॥१९॥

जीवान् स्वयं प्रतिदिनं परिपोषको य-
स्तत्तोयराशिरधुना सकलै विनिन्द्यः ।
पीयूषमप्यतिविषं हि भवेद् गिरीशात्
सत्यं हि सम्प्रति जलं विषतुल्यजातम् ॥२०॥

ननाविधैरवनिजातसजीववृन्दै-
र्वर्षायुते विकलकालघने विचित्रे ।
रात्रिन्दिवं प्रसहितो जलघात उग्रः
प्रत्यब्दमत्र सततं जलराशिराप्तः ॥२१॥

नव्याम्बुदाः परित उच्चरवा रमन्ते
तच्छब्दकर्णनसुखेन मयूरवृन्दम् ।
वारं सुवारमिह नृत्यरतं मनोज्ञं
सन्दृश्यते बहुजनैः प्रकृतिप्रियैस्तैः ॥२२॥

मेघाधिकैः परित आप्तसजातिकेन
सङ्घर्षकार्यकरणेन विघट्टितैर्द्राक् ।
वज्राणि तत्र निपतन्ति निरन्तरं यत्
तैरेव भूरिविभवा जनता विनष्टाः ॥२३॥

केषाञ्चिदत्र सुतनूषु पवेः प्रपाता-
त्तत्रैव मृत्युरतिहानिकरः समाप्तः ।
सञ्जायते न च तदा सहयोगकारी
कोऽपीति वस्तुषु यथास्थिति संशृणुध्वम् ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आप्लावनात् सततपूर्वभवान् विचित्रा-
नानन्दलब्धविभवान् सकलत्रसार्थैः।
भोक्तार आप्तजननायकशीलवन्तः
सौख्यप्रकोटिसहितैः स्म सदा रमन्ते ॥२५॥

प्राक्प्राप्तसर्वविभवा जनताः समस्ताः
पश्चात्तु हीनधनधान्यविपत्तियुक्ताः।
जायन्त इत्यपि कथं कतिचिन्मनुष्या-
स्तत्रापि ते प्रकृतिलब्धतया सहन्ते ॥२६॥

वारिप्रवाहजशतैर्निकटैः सुदुःखै-
र्युक्ता निरन्तरसपत्नवदत्र भीताः।
सुब्रूडिता जलगभीरयुतेऽपि कुण्डे
तस्माच्च युक्तिबलतः सहसा विमुक्ताः ॥२७॥

ग्रामे जलं नगरलब्धजलं जलौघं
व्याप्तञ्च सर्वपथिकं घनघोरगत्या।
सौधस्थिताः सपरिवारजना महान्तो
वारिप्रभं सुतुमुलं प्रसमीक्ष्य खिन्नाः ॥२८॥

वार्यौघलब्धमृतजीवसहस्रसंख्यै-
र्नानाविधैः पशुमनुष्यविटैः समन्तात्।
व्याप्ता मही सुकृतिनां भयदा तदाऽभूत्
जातं जगत्सकलकं कलभाषिणां तत् ॥२९॥

तोयप्लवैः सकलदेशभवा असंख्या
मुख्यालया सुरुचिरा सकला विनष्टाः।
भग्ना अनन्तसुखदा सुगृहाग्रभागाः
सर्वं विरूपमभवत् प्रकृतेः प्रकोपात् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वंसहे प्रकृतिदेवि नमो नमस्ते
त्वां सर्वथा वयमहो नितरां स्मरामः ।
अस्माकमत्र सकले सुमनोज्ञराष्ट्रे
स्यात् सर्वदैव कुशलं तव भक्तियोगात् ॥३१॥

यद्यद्धि किञ्चिदपि कुत्रचिदुग्रकृत्यं
जात्वत्र निर्दयतया क्रियतेऽतिमात्रम् ।
लोकाः सदैव दहने विकटे निमग्ना
जानन्ति भस्मबहुलेन विशुद्धरुद्रम् ॥३२॥

विश्वस्य काननशतानि विभिन्नकाले
दावा नयन्ति नितरां भसितस्वरूपम् ।
ग्रामाग्निना च शतशो गृहजालकानि
भस्मीभवन्ति नितरां प्रतिवर्षमेव ॥३३॥

उद्योगलग्नदहनस्य विधा विचित्रा
सर्वस्य भस्मकरणे स्थितिरत्र दृष्टा ।
कस्याऽपि तस्य दहनस्य विशान्तिकार्ये
चातुर्यकौशलविधा अफला भवन्ति ॥३४॥

दग्धानि काननशतानि सहस्रकानि
सूद्योगकोटिश उदग्रगृहान् सुधीराः ।
आलोक्य किञ्चिदपि वक्तुमनीशजाताः
पश्यन्ति सर्वविधवह्निकृतं विडम्बम् ॥३५॥

विश्वस्य भूमिसकलासु प्रशस्तरूपै-
र्जातेषु काननसहस्रचयेषु जाताः ।
उद्दीप्तवह्निबहुला शतशः प्रयासै
राष्ट्रैः कृतैश्च हि कदाचन शान्तिमाप्ताः ॥३६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं सयत्न-बहुधा प्रकृति-प्रशस्ते
षट्षड्ढि मासमधिकं प्रदहन्ति राष्ट्रम्।
यानैर्भृशं जलनिपातकरैश्च यत्नै-
र्निर्वापणं कथमपीह न जायते वै ॥३७॥

आग्नेयताण्डवमिदं बहुराष्ट्रभूमौ
प्रत्यब्दमापतति दुःखकरं ह्यसह्यम्।
कोटि-प्रकोटि-नगराणि वनानि ग्रामा
अग्निप्रकोप-विकलानि भवन्ति सत्यम्॥३८॥

इत्थं विचित्र-विकटानि वनानि भूयो
भूयः प्रदृश्य-वनरक्षक-वर्गदीनाः।
रक्षाविधावसफलाः कृतभूरियत्ना
ईक्षन्त उत्तमधियो वत वह्निकृत्यम्॥३९॥

देवाधिदेवशिवरूपमिदं विचित्रं
विश्वस्य सर्वविध-सौख्यकरं बहुत्रम्।
संहारकञ्च सकलस्य चराचरस्य
द्वैविध्यमस्य विबुधस्य विचित्ररूपम्॥४०॥

आग्नेयविप्लवरयाः प्रतिवर्षमेव
राष्ट्रीयसभ्यजनताः प्रविचालयन्ति।
उद्योगरक्षणविधौ सुविचिन्तयन्तो
जायन्त उद्यममुचो नितरां निराशाः॥४१॥

एवंविधैर्विविधरूपधरैर्विचित्रै-
राग्नेयताण्डवशतैर्बहुविघ्नितात्मा।
कोऽप्यत्र मानवबुधो न दयार्द्रदुःखी
सर्वोऽपि तीव्रकरुणः प्रभवेत् सदैव॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्न्युद्भवा विकट–कार्यकरा अनेक
उत्पातकाः सकलनाशनमात्रशान्ताः ।
श्रोतृप्रदर्शक–जनान् विकलान् भृशं तान्
कुर्वन्त आनतजनैर्नितरां प्रदृष्टाः ॥४३॥

आग्नेय–वारिदभवा विकटा अनेक
उत्ताण्डवा अवितथाः कथिता मयाऽत्र ।
आलोक्य कोविदजना विषये च तत्र
ध्यानं प्रदाय सततं प्रभवन्ति दक्षाः ॥४४॥

भूकम्पजातसकलस्य विनाशराशे–
रेवञ्च युद्धबहुलस्य च हानिपूर्तौ ।
वाःप्लावनेन शतशो भवनाशशान्त्यै
लब्धो विवेकिजननिर्मितराष्ट्रसङ्घः ॥४५॥

आपत्तियुक्तजनता सततं सुसेवी
भूकम्पयुद्धजलरोधिदशां प्रहर्ता ।
सम्पूर्णविश्वमिह वित्तसुदानकार्यात्
पाताऽस्त्यसौ प्रतिदिनं किल राष्ट्रसङ्घः ॥४६॥

तीव्रेण घोरतरविप्लवजालकेन
ग्रस्ता असंख्यजनता दयिता सदैव ।
युद्धानि सर्वजगति प्रतिरोधितानि
प्राज्ञस्त्वहो विजयते भुवि राष्ट्रसङ्घः ॥४७॥

सर्वत्र सम्प्रति विपन्नदयापरैस्तै–
स्तत्सङ्घसंस्थितजनैः सततं समस्ते ।
विश्वे कृतेन सहयोगशतेन देशा
रात्रिन्दिवं प्रगतिवृद्धिसहस्रयुक्ताः ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धन्याश्च तेऽत्र सकलाः कृतराष्ट्रसङ्घा
यैर्निश्चयं सकलविश्वजनाः सुपाताः।
सङ्घस्य तस्य सततं प्रगतौ प्रवृत्ता-
स्तेऽप्यत्र धन्यवदनाय समेऽग्रयाताः ॥४९॥

सम्पूर्णविश्वमधुना परिवारतुल्यं
जातं निरन्तरमहो अतिहर्षयुक्तम्।
गेहे यथा गृहपतिः परिवाररक्षां
राष्ट्रेषु सङ्घपगणः सकलं विधत्ते ॥५०॥

संस्थापकाः निखिलबन्धुजनाः सयत्नाः
प्राचीनकालजनिताः किल पूर्वजा ये।
यैः स्थापितो बहुलराष्ट्रहितैषिसङ्घ-
स्ते प्रत्यहं सकलराष्ट्रभवैः प्रणम्याः ॥५१॥

सङ्घोऽयमत्र जगति प्रकृतेः प्रकोपे
जातेषु तीव्रनशनेषु सदा प्रवर्ती।
जागर्ति नित्यमिह सर्वजनोदयेऽसौ
वस्तुस्थितिः सकलवेद्यतमाऽस्ति सत्या ॥५२॥

भूकम्पयुद्धजलजातसमस्तहानेः
पूर्त्यर्थमत्र भुवि जागृतराष्ट्रसङ्घः।
स्वीयेन शक्तिबहुलेन कृते प्रयत्ने
कोटिप्रकोटिजनताकरुणाकरोऽयम् ॥५३॥

पूर्वोक्तघातकसमूहगते त्रिकेऽत्र
भीतिप्रदं समरकोटिकमत्र नष्टम्।
भूकम्पतोयजनितं तु यथा तथैव
स्फीतं विनाशबहुलं प्रतिराष्ट्रमध्ये ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रीयसङ्घकृतसौख्यकरं प्रभूतं
साहाय्यमत्र भुवि वीक्ष्य समे प्रसन्नाः।
जायन्त इत्थमतिमोदकवृत्तविज्ञा
शंसन्ति सर्वघटनाश्रवमात्रतुष्टाः ॥५५॥

भूकम्पेन सलिलजातसुप्लवेन
भीतेरकारि समरजातविप्लवेन।
प्रत्यब्दं ह्यगणितजीवसंहतिः सा
नाशं वीक्ष्य भयकरं सदा सुदुःखा ॥५६॥

पीडाप्ताः सुकृतिन उत्तमं राष्ट्रसङ्घं
कृत्वैकेऽत्र जगति विभ्रमं लब्धवन्तः।
ते सर्वेऽपि निरतिशायिनः पृथिव्यां
सर्वत्रैव सकलमानवैः प्रणम्याः ॥५७॥

विश्वस्थाः सकलजना यथा ह्यदुःखा
जायन्ते तदतिशयेन कार्यमास्ते।
सर्वेभ्यो हितकरे कृतः सर्वमान्यो
राष्ट्रणां सकलबलेन राष्ट्रसङ्घः ॥५८॥

विश्वस्था अतिमनुजाः समेऽत्र सन्ति
तेषां विश्वहितकरं न कुत्रचित् काचित्।
संस्मर्यते किल मनुष्यवर्णजातै
राष्ट्राणां कृत अयमत्र राष्ट्रसङ्घः ॥५९॥

भूकम्पतोयजनितेषु विभीषणेषु
घातप्रघातबहुलेषु सुविप्लवेषु।
तेषां प्ररोधकरणे न च शक्तियुक्तः
सङ्घस्तथापि बहुनाशहरे समर्थः ॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातेषु कोटिमृतकेषु सविप्लवेषु
भूकम्पवह्निजलवायुविपत्तिमत्सु ।
आपद्रुतासु जनतासु सदैव वृत्तः
सञ्जायतेऽगदसुदानकृतैः सुकृत्यैः ॥६१॥

द्रव्यादिवस्तुवितरे खलु सोऽग्रगण्यो
रुग्णादिदुःखितजनान् दयते सदैव ।
इत्थं स्थितेर्गतिविधौ नितरां सयत्नः
सन्दृश्यते स खलु सङ्घ इहैव लग्नः ॥६२॥

प्रावर्ततां प्रतिदिनं खलु राष्ट्रसङ्घः
सञ्जायतां जनमनोहरकः सदैव ।
रात्रिन्दिवं विविधवृद्धिसमस्तयुक्तः
संनाश्यतां हि खलु विश्वविपच्च तेन ॥६३॥

रत्नाकरो जलनिधिः सकलैः समुक्त-
स्तेनाऽत्र विश्वजनताभिरयं समुद्रः ।
सम्पूर्णरत्ननिधिरूपतया गृहीत-
स्तेनाऽत्र विश्वजननायकमुख्यमान्यः ॥६४॥

वैविध्ययुक्तसकलेषु विघातकेषु
भूकम्पनीरसमरादिविनाशकेषु ।
सर्वेभ्य उग्रतमको जलजातघातो
योऽसौ सदैव जलसात्प्रकरोति विश्वम् ॥६५॥

भागत्रये किल विभाजितभूमिसर्वा
भागद्वयं जलपरिप्लुतमस्ति नित्यम् ।
शिष्टोऽपि भाग इह तोयरयो हि काले
वर्षायुते प्रतिदिनं जलसात्करोति ॥६६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूसात्कृतान्यपि धनानि सुखोत्थतोयं
नद्यादिमाध्यमविधा जलधौ ददाति।
नित्यं प्रशान्तजलराशिरयं धनीति
भूकम्पखातवसुधादिकथेयमस्ति ॥६७॥

नद्यादिभिर्जलधरैर्नियतप्रवाहात्
प्राप्ता अनन्तविभवा जलधिं समस्तम्।
द्रव्यान्वितं विदधते सुसमस्तरत्नं
रत्नाकरः स कथितः सकलैश्च तैर्हि ॥६८॥

सम्पूर्णेषु सुराष्ट्रमुख्यनिवहेषु प्राप्तभूविप्लवै-
र्भूकम्पेन जलौघवेधशतकैर्जातिन लब्धो निधिः।
सर्वोऽप्यत्र समुद्रभागविविधै रम्येषु जातोऽनिशं
तेनाऽसौ सततं जनैरविरतं रत्नाकरो भण्यते ॥६९॥

उन्मूलत् सकलाः सुघोरतरका कम्पाश्च दाहा भुवो
जाता यत्र सुनिश्चितं भवति यत्तीव्रा विपत्तिर्ध्रुवम्।
भूखण्डेषु विजात-तादृश-नवैर्व्याघातिताः सज्जनाः
स्वाभीष्टैर्दिवसंस्थितैः प्रभुवरैः संरक्षिताः सङ्कटे॥७०॥

असुधरविविधानां जीवसङ्घातकानां
विषमसमयलब्धा विघ्नसन्धानजाताः।
अधिकदमनकारी प्राप्तबाधा अनेकाः
कथमपि जनताभिः सेहिरे संयताभिः ॥७१॥

आचार्यप्रभ-पूर्णचन्द्ररचिते सौख्यप्रदे शाम्भवे
सौभाग्येन युते विचित्रकवितारम्ये मनोज्ञेऽमले।
काव्येऽस्मिन् जलवह्निवैकृतियुतो रुद्राङ्कसर्गो गतो
भानुं वीक्ष्य बुधाः सदैव सुखिनः स्युर्देवदेवाधिपात्॥७२॥

॥ इति एकादशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वादशः सर्गः

(रत्नाकरजलधिमन्थनवर्णनात्मकः)

मन्दाक्रान्ता बहुजलधयो भूरिरत्नैः समेता
न्यूनैर्यत्नैः प्रतिदिनमिमे नैव रत्नानि सन्ति।
तस्मात् सर्वे विविधसुमणीन् प्राप्तुकामा अजस्रं
तीव्राक्रान्त्या प्रयतनपरा द्राग् लभन्ते ध्रुवं ते ॥१॥

तीव्राक्रान्त्यै सुरदितिजवरा रौद्रवेगेन युक्ता
रत्नप्राप्त्यै खलु सुमिलिताः स्वीयतां सम्प्रदर्श्य।
पूर्वं जातं स्वरिभवनजं द्वेषजातं विनाश्य
सम्मिल्यैव प्रयतनपराः काश्यपास्ते सुनद्धाः ॥२॥

जलधिमथने सन्नद्धाः काश्पया हरिणीव ते
रभसशतका भीतप्राया इतस्तत ईक्षकाः।
सुकृतिसुलभे लक्ष्यप्रात्यै सन्दिहाना अपि
कथमपि च ते सूद्युक्ताः सागरस्य मथे घने ॥३॥

दितिजविबुधैर्दारिद्र्यस्य प्रणाशकृते तदा
ह्युदधिमथनं प्रारब्धं तैः प्रभाववशाद् ध्रुवम्।
प्रखरमथने प्रक्रान्ते द्राग् विचित्रनिधेः कृते
अहिपतिनतावेकैकस्मिन् स्वभागहरौ तकौ ॥४॥

सुगुरुलघुते कस्य क्षेत्रे समापतति तदा
विविधकुलयोस्तादृग्दृश्यं समीक्ष्य समे जनाः।
सुदृढमथिते पारावारे परस्परमेतयोः
सुगुरु लघु ते दर्शं दर्शं चमत्कृतावपतन् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधिबलयुतैः सन्नद्धैस्तैः सुरासुरपुङ्गवैः
प्रखरबलजादाकर्षात् स्थितिः प्रबला तदा।
अवनितलगो नीचैर्नीचैरभून्मन्दरो भृशं
विकटसमयेऽभूद्वैकुण्ठः सुकूर्मशरीरकः ॥६॥

जगति जनतारक्षाकार्ये सदैव निरतो विभु-
र्विचलिगिरेः सुस्थैर्यार्थं तदा प्रयताः सुराः।
सकलजनतासान्निध्ये प्राक् समादरतः क्रिया
मथनकरणे तस्मिन् सुस्थे कृतं च तदा पुरः ॥७॥

बहुविधकृतेऽन्योऽन्यैर्यत्ने तथापि न ते तदा
सफलकरणा नाऽभूवन्ते निराशतया युताः।
असुरविबुधा आश्चर्यात्ते परस्परमात्मना
मुखकमलकं साम्रेडं तद् विलोक्य तदाऽरुजन् ॥८॥

जलप्लवैर्युद्धसमीरपीडिताः
सुराऽसुराः पूर्णतया मथे वृताः।
समुद्रमन्थस्य कृते ह्यपेक्षितान्
पदार्थमुख्यान् सकलान् समानयन् ॥९॥

विलोडहेतोः सरलोऽस्ति मन्दरः
स गृह्यतां शीघ्रतयैव मा चिरम्।
मथे ध्रुवं ग्राह्यतया प्रयोजितः
सुरज्जुरूपोऽस्तु स वासुकिः खलु ॥१०॥

सुपूर्णतायुक्तविधौ प्रमन्थके
प्रवर्तितव्यं ह्यधुनैव सज्यताम्।
न कालपातः प्रभवेद्धि कर्हिचित्
क्रमे बुधैस्तत्परतां विधीयताम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्तगम्भीरबलैः सुराऽसुरैः
सवैनतेयानिलविष्णुभिर्भृशम्।
बलाधिकैस्तैर्दितिजैः सहैव ते
सयत्नरत्नाकरसिन्धुराहतः ॥१२॥

पूरस्थितस्यैव गिरेः प्रपुष्टतां
प्रलम्बमानत्वमपि त्रिलोकिनः।
विचार्य शीघ्रं निजकर्म ते खलु
तदा सुसज्जाः सकलाः प्रमन्थकाः ॥१३॥

विवेद्यमेकं कठिनं प्रमन्थकं
द्वितीयकं वासुकिजन्यरज्जुकम्।
तदत्र शिष्टस्य विधेस्तु पूर्णता-
कृते विधेया द्रुतकार्यलग्नता ॥१४॥

पुनर्विगत्यैव भुजङ्गराजकं
गृहं समाश्वास्य च सोऽनुनेयकः।
परस्परं जातविचारसन्ततै-
र्नुतोऽनिशं सत्यमुदारवासुकिः ॥१५॥

बलाधिकैः शीघ्रमनन्यमानसैः
सुराऽसुरैर्मन्दरशैल आहतः।
भुजङ्गरज्जुर्नितरां बभौ तदा
तदीयभूभाग उदुत्तमः शुभः ॥१६॥

अहो अहो अद्भूतदृश्यमागतं
पुरः प्रदेशे किललोकरञ्जकम्।
अलौकिकं पूर्वमभूतमद्भुतं
विलोक्य सर्वे मुदिता भृशं तदा ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वयोस्तयोर्वासुकिशैलयोर्युगं
युगाद्भुतं कर्म ततो न चाद्भुतम्।
शनैः शनैर्दृश्यसुखे प्रहर्षिताः
समे जना मध्यसमुद्रभूतले ॥१८॥

परस्पराऽलोकनजेन तत्क्षणे
स्वजातनैजत्वरसेन चाऽदृताः
समानमाना अभवन् हि काश्यपा
विचित्रता तत्र जनैरदर्शि सा ॥१९॥

सुपूर्वकालोपचिता स्वशत्रुता
सुविस्मृता तत्र गतैः सुराऽसुरैः।
प्रशस्तभूतेर्लभने सुसज्जितैः
तदा समे स्वीयतराः सुचिन्तिताः ॥२०॥

न कोऽपि शत्रुर्दितिजेषु निर्जरो
न वास्ति देवेस्वपि दानवो रिपुः।
परस्परं देवसुरद्विकौ मिथः
समानजातीयसुगौरवं श्रिताः ॥२१॥

समुद्रमन्थे वृतदेवदैत्ययोः
प्रदृश्य चैकत्वमपूर्वकं खलु।
मनुष्यमुख्या इतरे च जङ्गमाः
कुतूहलेनैव समञ्चिता भृशम् ॥२२॥

अहो अदितिनन्दना दितिसुता समे काश्यपाः
स्वशक्तिविभवेन वै सततवृद्धविज्ञानकाः।
अनेकविधका अपि स्वकजनैः समैरावृता
जलीयशतकैः प्लवैः समरजन्यभावैर्युताः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचलितगिरेः सुस्थैर्यार्थं तदा प्रयत्ने कृते
सकलजनतासान्निध्ये प्राक् प्रदर्शनलग्नकाः ।
प्रवचनविधौ संरुद्धे तत्तदा परितो जना
अतिशयमहो दर्शं दर्शं सुतुष्टिपराः समे ॥२४॥

प्रखरविधया कार्ये स्वीये प्रमथनके विधौ
सफलरहितेऽत्यन्तं श्रान्त्या सुपीडनदुःखितैः ।
विबुधदितिजैर्जाते तस्मिन् परस्परतो ध्रुव-
मुदधिमथने नैराश्यत्वात्क्रिया शिथिला कृता ॥२५॥

सकलभुवने तोयौघैस्तैर्निरन्तरविस्तृतैः
प्रसृतजलजैरुत्पातैर्द्राक् समस्तजगदागतैः ।
प्लवनजनितै रिक्तीकार्यैः सदैव दुर्विधा
अदितिदितिजाः सम्मिल्यैव प्रमन्थनरतास्तदा ॥२६॥

श्रमपरवशै रत्नालाभाशयाऽधिदृढैः समै-
र्विकटसमयेऽस्मिन् देवा दैत्या अतिपीडिताः ।
विकलहृदयैः प्रतिक्षणं रत्नानन्त्यचित्तकैः
दितिजविविधैश्चिन्ताव्याप्तैर्न किञ्चिदपि श्रुतम् ॥२७॥

मथनसमये हाहाकारो दृढः परितोऽभवत्
प्रबलपवनस्तत्राऽवाब्धि प्रजाशुविघट्टकः ।
तदिह समये संलग्नास्ते समस्तजनास्तदा
जलधिमथनाच्छ्रान्ताः सर्वेऽपि दूरतरं गताः ॥२८॥

इह कतिपये मूर्च्छाप्राप्ता महीं पतिता वत !
शमननिलयं ध्यायं ध्यायं विचेष्टितमानसाः ।
असुरसुरजा व्यापारस्था अपारविपद्गताः
अलमलमधुना सकलकृतिदृक् कः प्रभुः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति सकलकास्त्यक्तव्यापारा दितिजाः सुराः
प्रसृतशुचया व्याकुल्येन ध्रुवं सतताकुलाः ।
सुजननिवहैर्भीत्याक्रान्ताः कुत ईदृशा
कथमपि न ते स्वीयस्वान्ते सुखं वत ! लेभिरे ॥३०॥

अतिशयशुचा भीतस्वीया ऋषेस्तनया इमे
स्वपरसकलैः साकं चिन्तां परीततया तदा ।
सकलभुवने दुष्टु व्याप्ते मथेतरे बले
अहमहमिकैः पीडाप्राप्तैर्जनैरवितुं स्तुतम् ॥३१॥

उदधिमथने संलग्नास्ते समे मुनिजास्तदा
फलरहितता जाता तत्राऽप्रसन्नतया ध्रुवम् ।
विकृतमतिकाः सर्वे मन्ये परैरफलैः किल
समधिकगुणः सर्वध्येयः शिवः सुतरां स्मृतः ॥३२॥

सकलजगतां वैचित्र्यात्सोऽतिशायितभास्वरः
क्षम इह सततं रुद्रो मान्यश्चराचरसन्ततौ ।
अकरणकरे सामर्थ्यश्रित् तदन्यकरे क्षमोऽ-
शरणशरणो देवैः सर्वैः सदाऽधिकदः स्मृतः ॥३३॥

जगति जनताः सर्वा नित्यं विरोधकरा अपि
निरतिशयवन्तं सर्वे मथनस्था लोका भृशमाप्ताः ।
विविधमणीन् स्वेच्छापूर्त्यै सदा सेविनः सुरा
अतिशयमहो नैराश्याद्विद्रुता विविधास्तके ॥३४॥

असुरविबुधैः सम्यक् सम्मील्य स्वीकृतमात्मना
जलधिमथनं कार्यं वेगात् सुचालितमत्र तैः ।
अतिशयजवादानन्दाच्चात्र तैः सततं युतै-
र्बहुभिरपि घस्रैर्नैवाप्तं प्रयत्नफलं तदा ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत इह समे मन्थासक्ताः सुरासुरजास्तके
निरतिशयदूरस्तैर्व्याप्ताः सचित्करणैस्तदा ।
कृतयतनजां साफल्यप्राप्तिमप्यत्र न दर्शका
अतिशयितदुःखानम्रास्ते शरीरशुष्कतावृताः ॥३६॥

देवैर्दितिजैः सर्वैस्तैर्मणिमाला-
लाभार्थमिहाब्धेर्मन्थनकार्ये ।
साकं नियतं लग्नैस्तैर्मणिमाला
लब्धा न तदोत प्राप्तं विषादं तत् ॥३७॥

घोरं मथनस्य श्रोत्राप्रियशब्दं
श्रुत्वा भयभीतास्तर्कं कृतवन्तः ।
पारस्परिके ते शङ्कायुतचित्ता
अद्येह भवेत्किं राष्ट्राहितकर्तृ ॥३८॥

कर्णस्य कृते सोऽत्यन्तं श्रुतिदुष्टः
खण्खण्ध्वनियुक्तः सर्वाप्रियरौद्रः ।
सर्वस्य कृते शब्दोऽसाववररूपः
सर्वे मथनस्था लोका भृशमार्ताः ॥३९॥

शब्दाक्षरमाहो भङ्भङ्ध्वनिरुच्चै-
र्वैचित्र्यकरोऽसौ साश्चर्यमनेकैः ।
भीत्या नतसार्थैः सर्वैः परितोऽसौ
मन्थाश्रितपान्थैराकर्णि हताशैः ॥४०॥

दैत्याः सुरमुख्याः सर्वे बहुखिन्नाः
प्रारब्धविधौ ते नैराश्यसमेताः ।
अस्माभिरिह स्वीकार्यं बलवद्भि-
र्भाव्यं विरतिर्नात्र श्रेष्ठतराऽस्ति ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीचैः सञ्जातान् भीतिकरशब्दान्
श्रुत्वा नितरां ते खिन्ना मथलग्नाः।
पृथ्व्यामिह कार्यं यद्धि प्रबलैस्तैः
कस्मिन्नपि कष्टे न त्याज्यमिति वेद्यम् ॥४२॥

रत्नैरनिशं ते युक्ता वत नित्य-
मैश्वर्ययुताः सन्तोऽविरतं वै।
भाव्यात्मदिनानां संयापनलीना
देवासुरमुख्या मग्ना व्यथकाब्धौ ॥४३॥

वर्षासमयेऽस्मिन् विश्वं च्युतनीरैः
पृथ्वीजलयुक्ता नित्यं जलपूर्णा।
सौख्यस्य सुदानेऽशक्ता नियतं सा
जीवा नितरां ते दुःखाप्तेराकुलदेहाश्च ॥४४॥

तोयाधिकभूमौ रत्नाश्रितपृथ्व्या
भागा बहवोऽत्र ब्रूडाः प्रभवन्ति।
तेनैव समेऽविधाश्रेष्ठा मणियुक्ताः
पूर्णा जनबोधे तथ्यं प्रसृता चाऽस्ति ॥४५॥

रत्नाधिकलब्धौ चाशायुतलोका-
स्तीव्रेण कृतेऽस्मिन् मन्थेऽपि न लब्धेः।
दुःखाकुलसार्थाः कार्याक्षमहता-
श्चिन्तायुक्ता देवादिबलौघाः ॥४६॥

आलस्योपहतास्ते त्रैलोक्यसुपातारः
पुत्रा अदितेर्देवाश्चात्र मलीनाः।
कार्यार्ततरास्ते नम्राः सुखलुब्धा
रात्रिन्दिवमात्मसौख्यार्थमुदात्ताः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्यन्तमिमेऽस्मिन् कार्ये वत! लग्ना
लाभस्य न लब्धेर्दुःखातुरचित्ताः।
आश्चर्ययुतेऽब्धौ घोरे कृतवीर्याः
साफल्यसुलाभं यावत् कृतमौनाः ॥४८॥

दुर्गम्यतरेऽस्मिन्नब्धौ कृतयत्नाः
पुत्रा अदितेस्ते देवाश्च सवेगाः।
लक्षस्य नलब्धौ दीनाऽऽनतशीर्षाः
सर्वे मथने युक्ताः क्षीणतराश्च ॥४९॥

अब्धेर्मथनेऽस्मिन् लग्नाः सततं वयं
बाह्या जनतास्ता वैचित्यदशामिमाम्।
दृष्ट्वा विमता अत्यन्तं वत ! खिन्नाः
स्थित्याः खलु ज्ञातायास्तेऽत्र सुमुग्धाः ॥५०॥

अद्यैव वयं द्राक् साफल्ययुताः स्मो
नाऽत्राऽणुरपि प्रत्यूहः प्रसृतः स्यात्।
साफल्यकृते केऽप्यत्र श्रमचौराः
सन्तीति समे सञ्जानन्तु रहस्यम् ॥५१॥

तीव्रस्य मथस्य प्रारब्धतयाऽत्र
नास्ति श्रमरोधी बाधाकरविघ्नः।
तस्मादिह नैसर्गेणैव फलं स्या-
दन्ते समये तत्र निश्चिततमाद्याः ॥५२॥

अत्यन्तमनोयोगादनन्यपराः स्मः
सर्वे वयमत्र स्वान्तान्मिलिताश्च।
साफल्यकृतेऽत्र श्रान्ता अपि लग्ना
एषा समवस्था स्यादेव सुसौख्यम् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्माभिरिह द्राग् यन्निश्चितमत्र
तत्कार्यमिहैवाऽऽदरात् कृतमेव।
नास्त्यत्र कृतेऽपि व्यापार अनुक्त-
स्तस्यामपि स्थितौ केचित्कृतशङ्काः ॥५४॥

अस्मिन् सुकृतो यो यत्नः स फलैर्युक्
स्वस्त्यैव न शङ्का नो वा गतिरोधः।
सर्वे वयमेवं वर्तामह इत्थं
क्लेशै रहिता स्मो नास्ति श्रमबाधा ॥५५॥

श्रेष्ठे सुकृतव्यापारे श्रितलोका
धन्याः फललाभे दक्षचेतनास्ते।
लीना नितरां प्राप्तदुःखशतार्ता-
स्तस्यां च मितौ सम्यक्प्राप्तिकचित्ताः ॥५६॥

आप्तैर्मथखिन्नैः श्रान्तैः कृतकार्यं
दीनत्वयुतं साकल्याप्तिविहीनम्।
जातं कृतकं दर्शं दर्शमदीनाः
केचित्सुमथा धीराः सुस्थतया स्थाः ॥५७॥

देवा असुरास्ते तोयौघधरायां
ब्रूडैर्बहुपृथ्वीकाप्तैरतितोयैः।
द्रव्यग्रहणे तैः संलग्नमनोभि-
रत्यन्तशुचाक्रान्तैः संहतिराप्ता ॥५८॥

अब्धेर्मथनेनैवोभौ धनवन्तौ
देवासुरसङ्घौ जायेतामिति तथ्यम्।
विज्ञाय सुरास्ते दैत्याश्च मिथोऽत्र
ह्येकत्रितरूपौ मन्थे खलु वृत्तौ ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मान्यैर्हि सुपूर्वं तैः सुष्ठु विचरोऽ-
कारि प्रवरः स्वात्मीयः सुखकारी।
पश्चान्मथने ते लग्नाः सहसाऽत्र
सौहार्दबलं दृष्टं तदृषिवंशे ॥६०॥

सर्वे लग्नजनाः सुरासुरगणाः सम्मील्य ते काश्यपा
वृत्ताऽब्धेर्मथने सयत्नसकला नानाविधाः सङ्गताः।
अत्यन्तं प्रवृताः सुलोभवशतः वैचित्र्ययुक्तास्तके
नैराश्येन युता नितान्तविकला आशशतैः कर्षिताः ॥६१॥

श्रीपूर्णेन कृतेऽत्र चन्द्रपरकेणाऽऽयुष्यदे शाम्भवे
स्वैश्वर्येण युतेऽत्र मञ्जुकवितायुक्ते मनोहारिणि।
काव्येऽस्मिन् रविसंख्यको मथयुतः सर्गः समाप्तिं गतो
वीक्ष्येमं त्रिदशा बुधाश्च सुसुखं विन्दन्तु देवाधिपात् ॥६२॥

॥ इति द्वादशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयोदशः सर्गः

(प्रशस्तरत्नलाभनिमित्तकसमुद्रमन्थनात्मकः)

आसक्तदेवदितिजाः सकला मिलित्वा
सामुद्रमन्थनविधौ क्रमशः प्रवृत्ताः ।
आसन्निमे सततचिन्तनलीनयत्ना-
स्तोयप्लवैः प्रतिदिनं धनधान्यहीनाः ॥१॥

रत्नाकरोऽर्णव इतीह च ये वदन्ति
ते विघ्नजातविवशाः सुविघट्टिता द्राक् ।
रत्नानि भूरि विविधानि मिलन्ति सत्यं
तस्मान्मथाय बलवीर्ययुता भवन्तु ॥२॥

यत्नेन सिध्यति कृतं न हि तत्र शङ्का
कार्या कथञ्चन न कैश्चन मामकीनैः ।
इत्थं विचार्य सहसाऽब्धिविलोडकार्ये
लग्ना अहंहमिकया दितिजाः सुराश्च ॥३॥

तत्रैव काल इतरेतरजातशङ्के
प्रारब्धमद्भुततमं मथनं कठोरम् ।
पाषाणसङ्घघटनैरनुजातशब्दै-
रस्ता बभूवुरधिका विकलाश्च जाताः ॥४॥

पाथोधिमन्थनभवेन भयङ्करेण
दुःशब्दजेन रिपुभूतकुतूहलेन ।
केचित्पलायनपराः पुनरेक एके
स्थैर्येण युक्तमनसा स्थितवन्त दाढ्र्यात् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृश्यावलोकनरताः प्रखराः सुजीवाः
सङ्घट्टनाज्जनसमुत्थरजोधृताश्च ।
सम्पूर्णसाहसहरो बहुभीतिदोऽसौ
पाताद् विघट्टयति मन्थरतान् समस्तान् ॥६॥

जातश्रमैर्बहुविधैरपि मन्थकार्ये
लग्ना जनाः प्रगतिजन्यफलं न वीक्ष्य ।
लक्ष्यस्य प्राप्तिविषये कृतभूरिशङ्का
अन्योऽन्यदर्शनविधौ सुतरां प्रवृत्ताः ॥७॥

सम्पूर्णशक्तिमुपयुज्य कृते प्रयत्ने
तत्रापि काञ्चिदपि लाभदशां न वीक्ष्य ।
अत्यन्तखिन्नमनसो विबुधाश्च दैत्याः
कार्येऽधिकं श्रमबलं लगतीति जज्ञुः ॥८॥

विघ्नेशदेवगणनायकसिद्धपूजां
कर्तव्यकर्म विबुधैरसुरैश्च हित्वा ।
प्रारब्धमन्थनविधौ सहसैव जातो
विघ्नोऽभवद्विषम उग्रविषेण तत्र ॥९॥

त्यक्त्वा प्रमन्थनकृतिं सकलाः सुरेशा
विष्ण्वादयोऽसुरसुरा द्रुतमत्र विद्धाः ।
जाज्वल्यमानदहनेन यथा मनुष्या
दग्धास्तथैव सुरदैत्यजनाः समन्तात् ॥१०॥

केचिज्जनाः प्रबलमूर्च्छननष्टचेष्टा
अन्ये मृता इव विदूरजनैः प्रदृष्टाः ।
तत्रोत्थतीव्रगरलस्य विदाहि रूपं
नीतं प्रवातपवनेन सुदूरदूरम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रत्य उग्रपवनो विषवाष्पवोढा
यत्रागमत्तदवनिः समभूद्विपन्ना ।
सर्वे जना गरलजन्यरुजा विपन्ना
उच्चोच्चघोरदहनाद्विषजाद्दुरन्तात् ॥१२॥

हे मात ! आव्रज पितः ! कुत एहि शीघ्रं
त्वं रक्ष नः प्रकटदुःखदलेन दग्धान् ।
नूनं हि तावपि विजातविषेण दग्धौ
कानाह्वयाम इह दुर्धरदुःखहर्तॄन् ॥१३॥

हे विश्वरक्षक विभो भगवाननन्त !
रक्षस्व नः प्रखरदुःखमृतात्मतुल्यान् ।
भूत्वापि विश्वजनरक्षकनामधारी
कुत्राऽसि विष्णुभगवान् न तु दुःखहर्तः ॥१४॥

एवं विलापशतधा बहुशः स्तुतोऽपि
विष्णुर्न जात इह दुःखहरे समर्थः ।
दुःखाग्निदग्धविबुधा दितिजाः समस्ता
देवान्तरे पशुपतौ सहसा प्रवृत्ताः ॥१५॥

पश्चाच्च देवदितिजाः खलु ये विषाद्धि
दूरायिता अपि सुनिश्चितवन्त इत्थम् ।
संहारदेव इह दग्धजनानुकूल्ये
सामर्थ्यवान् निखिलशक्तिनिधौ गरीयान् ॥१६॥

देवाधिदेवशिवशङ्करमात्रमस्ती-
त्येवं विचार्य विषनाशविधौ प्रवृत्ताः ।
देवासुरास्तदितरे विषसम्मुखस्था
भीता भवन्ति नितरामपि दूरसंस्थाः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ये सन्ति भीतहृदया विषकम्पमाना-
स्ते ते सशक्ततनवो न कदापि सन्ति ।
कालस्य कालविकरालविषस्य हर्ता
ह्येकोऽस्ति मृत्युभयनाशनकार्यकारी ॥१८॥

दूरुस्थ ईशोऽपि तदा विषोद्भवां
स्थितिं विचार्यैव भृशं प्रपीडितः ।
स्वदिव्यदृष्ट्या हि सुदुःखिताञ्जनान्
स्मृत्वैव जातः करुणापरायणः ॥१९॥

आपत्पयोधिपतितान् दितिजान् सुराँश्च
दृष्ट्वैव खण्डपरशुर्नितरां दयालुः ।
यूयं किमर्थमसमां स्थितिमाप्तवन्तो
दुःखाग्निनैव भृशदग्धमुखा विपन्नाः ॥२०॥

वातप्रचण्डविषदग्धशरीरभागाः
सर्वे जना विषमदुःखजवेन चान्धाः ।
साकं विचुक्रुशुरिमेऽत्र शिव ! त्वमेव
नान्योऽस्ति कोऽपि बलवाँस्त्वदृते जनापाः ॥२१॥

वायुः प्रचण्डघनघातयुगान्तकारी
तत्रैति तीव्ररयवान् प्रववौ समन्तात् ।
तेनैव दुःखबहुलं समभूदसह्यं
देहस्य भस्मकरणं वत ! कष्टजातम् ॥२२॥

देदीप्यमानविषदग्धशरीरयुक्ताः
सर्वे जना विषजकष्टशतेन खिन्नाः ।
साकं विचुक्रुशुरिमेऽव शिव त्वमेव
नान्योऽस्ति कोऽपि जनदुःखहरे समर्थः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्माद्विषाद्धि भगवन्नवने त्वमेव
शक्तोऽसि सर्वविधशक्तियुतस्त्वमेकः ।
विष्ण्वादिदेवसकला इह नैव शक्ता
ज्ञाता विषात् कथमपीति वदन्ति सर्वे ॥२४॥

शत्रोर्विषस्य विषमस्य कथैव भिन्ना
तस्माद्बिभेति सुतरां त्वदृतेऽन्यदेवः ।
कालस्य कालविकराल इति प्रसिद्धं
त्वां जानते सकलविश्वजनाः सदैव ॥२५॥

रक्षाविधौ कथमपीह कृते विलम्बे
नूनं विनङ्क्ष्यति जगत्त्रिककं समस्तम् ।
तेनाऽत्र शीघ्रमधुना सशिवः प्रमाणं
संरक्षयेज्जगदिदं प्रसुघस्मराद् द्राक् ॥२६॥

ज्वाला विषस्य विषमा परिपीडिकेयं
जाता सुविघ्नजनिका प्रकृते सुमन्थे ।
प्रारब्धकार्यसुखदाधिफलप्रसूतौ
कालेऽत्र विघ्नविहता जनताऽभवत् सा ॥२७॥

रत्नाकरो जलनिधिस्तु च येऽवजग्मु-
स्ते विघ्नभूतविषशोषितसत्त्वका द्राक् ।
शक्तिः समुद्रमथने न च कस्य साऽस्ति
विस्मारितं विषमहालहलेन सर्वम् ॥२८॥

देवासुरैर्विकटकण्टकपीडितैस्तैः
सर्वं विसृज्य शिवभक्तियुतैरिदानीम् ।
प्रारब्ध एव नतमस्तकदेहपातं
सर्वोत्तमा स्तुतिरपीह न दृष्टपूर्वा ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वस्य देवनिवहा सुतरां मिलित्वा
स्तोतुं प्रवृत्तमनसो घटनं विचित्रम्।
चिन्तासमाकुलमुखा सह गद्गदेन
श्रद्धाविनम्रशिरसः सहसाऽभिजग्मुः ॥३०॥

देवाधिदेव! भगवन् ! भवतो विमर्शात्
कर्तव्यकार्यमिदमस्ति तथापि शम्भो।
प्रारब्धमात्रमथनं तदिदं तथापि
क्षन्तुं भवान् प्रभवति प्रभुरेक एव ॥३१॥

अब्धेः प्रमन्थनविधौ भवतः सदैव
साहाय्यमेव नितरां समपेक्षितं तत्।
पूर्वं विना भगवतो भवतो विमर्शं
जाते विना प्रकृतकेऽत्र फलं सुलब्धम् ॥३२॥

विश्वस्य रक्षणविधौ भवतैव विष्णु-
र्युक्तोऽहमेव नितरां परियालयामि।
जातेन तत्र विषमेण परिश्रमेण
लब्धं मयाऽपि विविधं खलु तीव्रदुःखम् ॥३३॥

युक्तेन साधनधनेन विनाऽपि नित्यं
वैराय तत्परभवा रिपवः परास्ताः।
तत्रानुभूतमिह दुःखमनन्तमस्ति
मह्यं प्रदेहि भगवन्निति यन्मयोक्तम् ॥३४॥

ज्ञात्वा त्वदीयकरुणां कमलैः समेता
पूजा च देववर ! त्वत्प्रति या ह्यकारि।
उद्दण्डशत्रुनिधनाय दयापरेण
शस्तं सुदर्शनमदायि कृपा प्रचक्रे ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वावतारसमयेषु भवान् मदर्थं
ज्ञानानि दिव्यसुखदानि सदैव योगात्।
प्रादात्तदा सकलशत्रुबधाय शक्तो
जातोऽहमेष विषयो न तिरोहितोऽस्ति ॥३६॥

कृष्णावतारसमये भवता मदर्थं
सन्तानतानविभवः कृपया वितीर्णः।
तेनैव सर्वविषयेषु दृढोऽहमस्मि
सम्पत्तिदेहबलबोधद ईश्वरस्त्वम् ॥३७॥

शक्तः सुयोग्यतम एकसुरोऽहमस्मि
नाऽन्योऽस्ति विश्वजगतीति बलेन युक्तौ।
प्राङ् नावुपेन्द्रचतुराननयोः सगर्वौ
ज्योतिर्मयेन भसितेन तदा स्वमारि ॥३८॥

लिङ्गेन साकमिह भूमितलेऽपि शम्भो
जातस्त्वमेव च तदाऽविशदत्र कायम्।
उच्चैरधोगमनकार्यविशिष्टयुक्तौ
जानन्तु मच्छिरस उच्चतमत्वमूले ॥३९॥

इत्येव लब्धवचनौ भवतस्तदानी-
मुच्चैरहं प्रगतवान् स च विष्णुरव्यात्।
पारं न लब्धमतुलं भवतः प्रशक्ते-
स्तस्माच्च कार्यसकलाद् भगवान् भवान् वै ॥४०॥

एवं च सर्वविपदासु भवान् सुरेश-
स्त्राता सदैव वसुधातल एकवीरः।
अद्यापि तीव्रविपदा दृढया परीतान्
पातुं स्वयं प्रणतभक्तजनान् सुशीघ्रम् ॥४१॥

तत्कालजेन समलोकसकौतुकेन
लिङ्गेन तदद्वितयगर्वभवः प्रकर्षः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्थं द्वयोः प्रबललिङ्गविनाशि तेजः
सन्नाशितं तदिह सर्ववशा स्थितिर्द्राक् ॥४३॥

दुःखाग्निदग्धविबुधानसुरान् समस्तान्
भक्तिस्तुतिश्रुतिमतोऽवितुमीश ऐच्छत् ।
देवासुरीयमधुरस्तुतिजातहर्षं
लब्ध्वा सदाशिव उदात्ततया प्रवृत्तः ॥४४॥

अभूतपूर्वाद्विषसङ्कटान्नः
पातुं स नद्धश्च दृढः सदैव ।
कर्तुं न कर्तुं सुविधातुमन्यद्
देवाऽधिदेवोऽस्ति हि केवलस्त्वम् ॥४५॥

अपूर्वरूपैः शरभादिभिर्या
प्रदर्शिता येन विचित्रशक्तिः ।
न तत्र शक्तावितरौ सुरेशा-
वावां सदा तत्त्वविचारदक्षौ ॥४६॥

देवाधिदेवकथनेन सदैव सर्वे
ब्रह्मादिदेवदितिजाः सततं स्तुवन्ति ।
आलोक्य विश्वजगति स्थितकार्यजातं
सर्वोत्तमोऽस्ति भगवानिति कीर्त्यते तैः ॥४७॥

सर्वे महेश्वर ! सदा सकलस्य रक्षां
कुर्या इतीह सततं प्रवदन्ति नित्यम् ।
माहेशभक्तजनता हि विपत्तिकालेऽ-
वश्यं स्मरन्ति दितिजाः सुरराजमुख्याः ॥४८॥

श्रीपूर्णेन कृतेऽत्र चन्द्रपरकेणाऽऽयुःप्रदे शाङ्करे
वैलक्षण्ययुतेऽतिदिव्यकविताशुभ्रे मनोमोहके ।
काव्येऽस्मिन् त्रिदशाङ्कयुक् स्तुतिपरः सर्गो व्यगाद् वेदभू
युक्तं वीक्ष्य बुधाः सदा सुखयुताः स्युर्देवदेवाधिपात् ॥४९॥

॥ इति त्रयोदशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्दशः सर्गः

(सामुद्रतीव्रविषपीडितजीववर्णनात्मकः)

विषस्य वेगेन विमूर्च्छितान् सुरान्
सजीवसङ्घानसुरान् समन्ततः ।
समीक्ष्य तस्मिन् सरितांपतेर्मथे
सुदुःखितोऽभूद् भगवान् गिरीशः ॥१॥

प्रचण्डमन्थेन बहिः समुद्भवद्
विषं जिघत्सुः प्रलिहच्चराचरम् ।
समीरसंसर्गवशात् प्रदूषितं
प्रचण्डभूतं निखिलप्रदाहकम् ॥२॥

तदैव हालाहलमित्ररूपिणा
प्रभञ्जनेनाऽपि कृतं कुतूहलम् ।
विषस्य सम्पर्कभवेन तत्क्षणा-
दभूत्करालं गरलं यथा तथा ॥३॥

प्रचक्रवातबहुलेन तथान्यवात्या-
प्रशस्तमात्राभिरलं प्रवर्धितः ।
करालकालः समभूद् गरः स
विश्वस्य नाशाय तदा व्यजायत ॥४॥

मृतानिवाऽत्यन्तविमूढचेतसः
पलायमानाँश्च विषेण कम्पितान् ।
विपद्गुतान् विस्मृतबन्धुबान्धवान्
जनान् विमोक्तुं मन आदधे शिवः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रचण्डहालाहलरुद्धनिःश्वसान्
करालकालस्य मुखे निवेशितान्।
असंख्यलोकान् पशुपक्षिमानवान्
समीक्ष्य सर्वेश उवाच तान् प्रति ॥६॥

समस्त–देवा असुराः पलायिता–
स्ततस्तु रक्षास्थलमीक्षणे रताः।
समीक्ष्य दुर्दृश्यमुदन्वतस्तटेऽ–
वशिष्टलोकास्तु पलायितास्ततः ॥७॥

न ये जना दूरतरं हि शीघ्रतो
गता विषस्यैव वशे तके जनाः।
तदाऽभवत्तत्र समुद्रमन्थने
विषाग्निको घोरतरश्च दाहकः ॥८॥

धनाद्यतेच्छाभिरिहैव मन्थने
प्रवृत्तदेवा असुरा विषाप्लुताः।
विचित्रदृश्यं परितो गतं दृशो–
र्विलोक्य पान्थाश्च सुदुःखिता भृशम् ॥९॥

प्रचण्डवेगेन समुद्भवद्विषं
सुतीव्रवातेन च वर्द्धितं मुहुः।
समस्तविश्वे प्रसृतं भयङ्करं
प्रजासु जातं जगतां च मृत्युदम् ॥१०॥

विषेऽत्र दुर्दम्यतया समुत्थिते
तदा हि त्रैविध्यजगद्विषान्वितम्।
इह स्थितौ केवलमीश्वरेश्वरः
सुरक्षकः पूर्णतया स्थितः शिवः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न चेत्स ईशो जगतीतले प्रभु-
रवश्यमेवेदमभावरूपकम्।
समस्तलोकस्य दशा सुशङ्कया
विनाशनौन्मुख्यतया युताऽभवत् ॥१२॥

अहो अहोभिर्नितरां सुघोरकं
प्रदृश्यते सम्प्रति दुःखवर्षणम्।
अनन्तरं प्राप्य दिनानि तानि नो
भवेयुरानन्दविरोधकानि वै ॥१३॥

विषोद्भवस्थानत एतदद्भुतं
विषं सुतीव्रेण नभस्वताऽऽहतम्।
तदा जगत्यां समगाद्यतस्ततः
सुमूर्च्छिताः प्राणिचया विशेषतः ॥१४॥

सुमित्रवायोः सहयोगलब्धितोऽ-
भवत् समस्तं जगदन्तकान्तकम्।
कृतान्तवक्त्रे पतनं सुनिश्चितं
भवेत्तदा सर्वसुशून्यरूपता ॥१५॥

दर्शं प्रदर्शं सचमत्करं दृढं
तद्रूपवैचित्र्ययुतस्य कारणात्।
शरीरमेतस्य सुदुर्दृशं प्रभो-
रभूत्तदा दर्शकचक्षुरन्धकम् ॥१६॥

विचार्य देवाधिपतिर्महेश्वरो
जगत्स्थितिं हीदृशमन्तरात्मना।
कृपापरस्त्राणसहेऽत्र कर्मणि
सुसज्जितो भीषणरूपधारणात् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदद्वयास्फालनरौद्रमुद्रया
समस्तदेहस्य दृढीकरिष्यता।
विचित्रयोगेन समन्वितः प्रभु-
स्तदाऽभवद्दर्शकभीतिदायकः ॥१८॥

तदा प्रदर्श्यं सचमत्करं दृढं
तदीयवैचित्र्ययुतं कलेवरम्।
अभूत्तदा दर्शकचक्षुरन्धकं
विलोक्य पीडाविहता हता भृशम् ॥१९॥

विषण्णब्रह्माण्डदशां विलोक्य तै-
र्जनैर्भृशं तप्तमनोव्यथायुतैः।
कर्तव्यकार्यस्य विलम्बदुःखतो
विषस्य दाहेन च दृष्ट ईश्वरः ॥२०॥

स एकदेवः सकलं कलं हरे-
दसंशयो यस्य निदानकर्मणि।
सुरासुराः सम्प्रति विघ्निता भृशं
समस्तविघ्नस्य हरो हरः शिवः ॥२१॥

समाधिमास्थाय स सम्प्रति प्रभुः
स्थितोऽस्ति लीनः स्वक आत्मनि प्रिये।
हृदा विचित्यैव तपःस्थलं लघु
प्रसादमाप स्तुतिपाठमङ्गलैः ॥२२॥

त्रिलोकलोकेषु दयालुताकृते
परीक्षिता सुष्ठुतया प्रधानता।
गतोऽस्त्यसन्देहमिदं सुदूरगं
त्रिलोकलोकाः प्रवदन्ति सत्यकम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोऽत्र सर्वस्वहरे भयङ्करे
सुविप्लवे शून्यजगत्प्रसाधके।
विपत्करेऽस्मिन् विषवह्निपीडके
न कोऽपि तस्मादितरः सुरक्षितः ॥२४॥

सुरासुरापं विनिगत्य सादरं
प्रसादयामः सुविशिष्टगायनैः।
स चाशुतोषः प्रथितस्त्रिलोके
कृते प्रयासे ध्रुवसिद्धिरच्युता ॥२५॥

अतोऽतिशीघ्रं वयमद्य तत्स्थलं
तपःप्रभावेण समाधिसंयुतम्।
दिव्यातिदिव्यं सुजगत्पवित्रकं
प्रयाम आनन्दरसेन पूरितम् ॥२६॥

दिव्यातिदिव्यं त्रिजगत्पवित्रकं
शिवस्य स्वानन्दकरं मनोहरम्।
प्रयाम गन्तव्यमहो सुरासुरा
विधीयतां क्षिप्रतया गमक्रिया ॥२७॥

एवं हि ते काश्यपजाः परस्परं
वदन्त इत्थं सकला ययुश्च ते
शीघ्रातिशीघ्रं पुरतः प्रभोस्तदा
प्राप्ताः श्रमार्ताः सकलाः प्रखेदिताः ॥२८॥

भवस्य पार्श्वे प्रगता अकिञ्चनाः
सुरासुरा नम्रशिरोधरा भृशम्।
प्रणेमुरानन्दघनाः समस्तकाः
सुराऽसुराणां गुरुमेकदैवतम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहैव प्रोचुर्हि सुशान्तमानसाः
प्रभो वयं सम्प्रति कालविद्रुताः ।
भवत्कृपानौकिकया विषोदधिं
प्रतर्तुकामा इह ते पुरः स्थिताः ॥३०॥

विना कृपां त्वत्सुकृतां वयं प्रभो
न किञ्चिदौन्नत्ययुतं प्रकुर्महे ।
तथा स्थितौ पूर्णतया भवान् ध्रुवं
प्रमाणमस्त्येव न संशयः किल ॥३१॥

अतो वयं सम्प्रति सर्वरक्षणे
भवत्कृपां सर्वत उत्तमोत्तमाम् ।
विचार्य भावत्कसमीपमागताः
कृपां कुरु त्वं करुणानिधे प्रभो ॥३२॥

त्वयैव सर्वत्र विपत्पयोधिषु
कृपा कृता तेन सदैव सर्वथा ।
सुखं प्रयामो वयमत्र दुस्तरे
प्रघोरदुःखेषु ततोऽव शङ्कर ॥३३॥

विधेहि सर्वस्य किमप्यनुत्तम-
मपूर्वकार्यं न कदाऽपि कारितम् ।
कृतं न केनापि जनेन कर्हिचि-
त्तवैव पार्श्वेऽस्ति निदानमद्भुतम् ॥३४॥

असंख्यमूर्तेऽखिलजीवमूर्तिक !
चराचराणां पतिरूपधारक !
जगत्प्रकर्तो जगतः प्रपालक !
जगत्प्रहारिन् ससमग्रभक्षक ! ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषं भवेन्नैव विनाशकारणं
जगत्त्रयस्यैव च शून्यतां वहत्।
न जातु मर्त्यैस्त्रिजगद्विहीनकं
भवेत्कदाचिन्न च तद्दुरासदम् ॥३६॥

विषस्य कोऽपीति समूलनाशको
ह्युपायभूतः प्रविचिन्त्यतां प्रभो।
न चेज्जगच्छून्यतयाऽवृतं त्रिकं
तस्माद् विभो रक्ष सुरक्ष सम्प्रति ॥३७॥

यतो यतो दृष्टिनिपातनं भवेत्
ततस्ततोऽन्धत्वसमागतं पुरः।
विदाम आनन्दनिधे जगद्गुरो
विधेहि कर्तव्यधुरन्धरं हठात् ॥३८॥

पुरा यदा देवकुलं प्रबाधितं
सुरारिभिस्तैर्महिषासुरादिभिः।
तदा मिलित्वैव समस्तनिर्जरैः
स्वकं स्वकं शक्तिबलं सुसञ्चितम् ॥३९॥

तमेव संरक्षितशक्तिसञ्चयं
प्रगृह्य देवी तव शक्तिमूलिका।
प्रवृद्धदेहा समनाशयद्रिपून्
जहर्षुरिन्द्रादिगणा अनेकशः ॥४०॥

तथैव सम्पूर्णबलं प्रगृह्यतां
सुरव्रजस्येति वदन्ति केचन।
वयं तथा कर्तुमयुक्तमानिनः
सदाशिवे त्वय्यखिलत्ववेदिनः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तुं न कर्तुं च तथाऽन्यथाविधौ
सदाशिवः शक्तियुतः स सर्वथा।
समर्थ एवाऽस्ति न संशयः खलु
सदैव पूर्णो न किमप्यपेक्षकः ॥४२॥

स देवदेवो जगतां शुभेच्छुकः
सदैव कल्याणकरोऽस्ति निश्चितम्।
अवश्यमेवात्र सुखाय विक्रमेत्
विपदद्रुतप्राणिसमस्तदुःखिनाम् ॥४३॥

विधीयतां कार्यविशेष आकुले
जगत्त्रये वैषविनाशकम्पिते।
समुद्रमन्थाय विषस्य घातये
सुरासुराधीश विभो विधीयताम् ॥४४॥

प्रयुज्यतां शक्तिरमोघशक्तिमन्
शिव त्वयि प्रोच्चबलं विनिश्चितम्।
पुरःस्थितः कोऽपि रिपुर्न सक्षमो
विजीयते शैवबलेन सर्वकम् ॥४५॥

विषप्रसूतेन तनुप्रतापिना
प्रचण्डदोर्दण्डधनुष्प्रणाशिना।
वयं निदाघेन भृशं प्रखेदिताः
समुद्ध्रियन्तां गुरुणा त्वया सता ॥४६॥

इतः परं स्तोतुमसक्तमानसा
वयं विभो केवलदर्शने क्षमाः।
समाधिमास्थाय तवैव चिन्तनं
प्रकुर्महे हे शिव रक्ष दुर्गतान् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिरायते सम्प्रति देव विक्रमो
ह्यवश्यकार्योऽसुविधातृरक्षणे ।
त्वदीयरोधस्य पुरो विषं ध्रुवं
सहस्रधाभूय विनङ्क्ष्यति स्वयम् ॥४८॥

विमूर्च्छिता मृत्युसमा अनेकशो
जगत्त्रये सम्प्रति नैकवंशजाः ।
पुनः प्रभो ते कुशलाः सबान्धवा
भवन्तु निर्दुःखतमा निरन्तरम् ॥४९॥

अलं प्रभो सम्प्रति सञ्चिरायते
कर्तव्यकार्यं भवदायतं ध्रुवम् ।
विधीयतां तद्धि विधेयमद्भुतं
पुरःस्थितः कोऽपि विभो न शक्तिमान् ॥५०॥

स्मरारये देववराय शूलिने
प्रकोटिधाऽस्मै क्रियते नमो नमः ।
अनेकवर्गैः कृतभक्तिसंस्कृता-
स्तवेन सन्तापमलं सुगृह्यताम् ॥५१॥

अतःपरं कश्यपगोत्रजैः स्तुतः
स्वयं च पीडावृतजीववत्सलः ।
स्वतः प्रवृत्तस्त्रिजगद्गुरुः शिवः
प्रचण्डवैषीयकृतान्तनाशने ॥५२॥

यदीयकार्यं हि सदैव नैजकं
तदन्यलोको न कदापि तादृशः ।
सदैव चैकः स परात्परः प्रभुः
प्रक्रान्तवान् भीषणशत्रुनाशने ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरन्तरानन्दयुतः स्वके क्रमे
विशृङ्खलं व्याप्तविषं विनाशितुम्।
द्विहस्तसंयोजनजन्यसम्पुटान्
मनोज्ञनैजाञ्जलिनाऽग्रहीद्विषम् ॥५४॥

विमूर्च्छनात्सर्वविधान् सुजीवकान्
विषाक्तवातेन च भिन्नमर्मकान्।
चराचरान् प्राप्तविचित्रदुर्दशान्
परस्पराङ्श्लिष्टमुखान् व्यलोकयत् ॥५५॥

विलोक्य सर्वत्र मुमोह धूर्जटिः
पश्चात्ततोऽसौ श्रुतिसूक्तसम्मताम्।
प्रकृष्टशक्तिं समदर्शयत्प्रभु-
र्विषस्य तीव्रस्य विनाशनेऽलगत् ॥५६॥

विषं प्रचण्डं प्रतिगृह्य पाणिना
प्रसह्य पातुं स विचक्रमे स्वभुः।
सुतीव्रवेगीव समुद्रनिम्नतः
समुत्पतत्तद्गरमाशितुं दृढः ॥५७॥

देवाधिदेवेन कृतं विचित्रक-
मलौकिकं कार्यनिधिं समीक्षकाः।
विमूर्च्छिता रौद्रविषाग्निपीडिताः
समे जना अद्भुतदृश्यतानिताः ॥५८॥

सदैव भूगोलखगोलयोः स्थिता
विचित्रजीवा युगपद्विचुक्रुशुः।
सुरासुरेशः शितिकण्ठ आत्मवित्
समस्तजीवेश इहाऽवको महान् ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतःपरं सर्वजना वयं बुधा
अवश्यपूर्वस्थितिलब्धितः क्षणात्।
जायेम ह्यानन्दयुताः पुरा यथा
नमाम उच्चैर्विबुधं महेश्वरम् ॥६०॥

समस्तविश्वस्य सुसङ्कटे घने
गरप्रभावेण समस्तविह्वले।
पुनः सुजीवाय विभिन्नजीविनां
विषस्य पात्रे भवते नमो नमः ॥६१॥

यदा यदा चेत्थमपूर्वसङ्कटं
प्रजायते तत्रभवान् सुरक्षकः।
भवेन्न कोऽपीदृशदुःखहारक
ऋते भवन्तं न हि कश्चन क्षमः ॥६२॥

अहो वयं धन्यतमास्त्रिलोकजा
विषाक्तवातेन विमूर्च्छिता अहो।
शिवेन लोकातिगशक्तियोगतः
सुरक्षिताः सम्प्रति निर्भयाः किल ॥६३॥

शिवोपकारः सततं सुसंस्मृत-
स्त्रिलोकजानां भवतीति मे मतिः।
तदीयकार्यं विषनाशनं खलु
सदैव सर्वस्य हृदि स्थितं भवेत् ॥६४॥

सर्म्पूर्णायां वैषशान्तौ प्रयुक्तः
उत्कर्षोऽसौ चन्द्रमौलौ स्थितोऽस्ति।
तेनैवाऽर्यैः सर्वशक्तेः समस्त-
स्रोतोविज्ञैः शङ्करे कीर्तितं तत् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वातन्त्र्याऽऽनन्त्यद्विके च शक्ती
तत्रैवोग्रे स्तः सदा विद्यमाने।
अख्यानाशक्याः सहस्रानननैस्तैः
तस्यैवेशस्याऽङ्गभूता वयं ये ॥६६॥

अस्माभिर्युक्तः सदा विश्वद्रष्टा
विश्वस्रष्टा रक्षको हारकश्च।
सर्वाञ्जीवान् स्वस्वकार्ये नियुङ्क्ते
तेनैवाऽद्याऽत्र स्म चैकात्म्यभूताः ॥६७॥

अहो आदेः कालात्सर्वथाऽसौ शिव-
स्तुतोऽस्माभिः सानन्दः सदा सर्वशक्तिः।
अस्माकं सत्यं सर्वथा रक्षकः स
सदेवानां देवः समोदः शमस्थः ॥६८॥

आचार्याग्रगपूर्णचन्द्ररचिते सौख्यप्रदे चाद्भुते
सौन्दर्येणयुते विचित्रकविताविज्ञानसन्तोषके।
काव्येऽस्मिन् मनुसंख्यकः शिवकृपापूर्णश्च सर्गो व्यगाद्
पञ्चाद्यं च दशं विलोक्य विबुधाः स्वान्तःसुखं प्राप्नुयुः ॥६९॥

॥ इति चतुर्दशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चदशः सर्गः

(विश्वविनाशकसामुद्रतीव्रविषपायिदेवाधिदेव-श्रीनीलकण्ठवर्णनात्मकः)

अलौकिकः सोऽस्ति सदैव सर्वथा
विचित्रता तस्य कृतौ विराजते।
तदीयवाहा विविधाश्च ये खलु
चलन्त आत्मीयतया समासते ॥१॥

बली बलीवर्दकनन्दिसिंहका
मयूरसर्पेण युताः समूषकाः।
परस्परं शत्रुसमानरूपिण-
स्तथाऽपि रुद्रस्य पुरोऽविरोधिनः ॥२॥

बिभेति सर्वोऽपि सुरासुराधिपात्
प्रशस्तसामर्थ्ययुतोऽपि कम्पते।
सुरासुराणां सकलो युगान्तको
भयङ्करो विप्लवतुल्य ईश्वरः ॥३॥

सदाशिवः सर्वजनार्तिहा खलु
तकं विना केऽपि सुरा न सक्षमाः।
समानभावोऽस्ति शिवस्य सर्वतः
सुरासुरेषु प्रबला समानता ॥४॥

न पक्षपातोऽस्ति शिवस्य कुत्रचित्
समानभावाद्धि स मान्यते समः ॥
शिवः शिवोऽस्त्येव बुधाः सदैव
स नैजसृष्टेरवकः सदाशिवः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वयं स पञ्चानन आत्मजौ पुनः
षडाननो हस्तिशिरो गणेश्वरः ।
सुसौरसेनाधिपकार्तिकेयकाः
पराम्बया ते सततं प्रपालिताः ॥६॥

विचित्रसौख्यस्य सदैव भागिनो
सदैव पूर्णा अनपेक्षवस्तुकाः ।
यथा स्थितौ तोषधरा सुतृप्तिका
न तदृशाः केऽपि सुरासुराधिपाः ॥७॥

अहो अहोरात्रमनन्यमानसा
न किञ्चिदिच्छासहिताः प्रलोभिनः ।
विलक्षणौपम्यत आत्मतन्त्रका
अशक्यकार्याणि विधाय कीर्तिताः ॥८॥

न तस्य देवासुरजीववृन्दकं
पुरः स्थितिं कर्तुमपि प्रकल्पते ॥
स देवदेवो बहुधाऽन्यदैवतै-
र्विलोकने चाऽपि न शक्यते ध्रुवम् ॥९॥

बिभेति सर्वोऽपि सुरासुराधिपात्
प्रशस्तसामर्थ्ययुतोऽपि कम्पते ।
विश्वस्य सर्वेषु स वै युगान्तकः
सर्वार्तिहा सर्वसुखाकरो महान् ॥१०॥

स पातुमैच्छत् सकलं विषानलं
सुदुःसहं घोरकरालमृत्युदम् ।
न तत्र कोऽपि प्रबभूव बाधको
महेश्वरो मौनरतः पपौ विषम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभिन्नवर्गीयजनैरनेकशः
प्रभूतजीवैः समनन्तजातिकैः ।
तदुक्तनानाविधसत्यसंस्थितैः
स जीयते केवलमीश्वरेच्छया ॥१२॥

शनैः शनैः पातुमनन्यमानसः
प्रवृत्त एवेह समद्धुते विधौ ।
अहो अहोभिर्महिमाऽम्बिकापतेः
प्रवर्द्धते तीव्रतया जगत्त्रये ॥१३॥

प्रपीयमानेऽतिगभीरमृत्युदे
विषे त्वनिष्टे जनता मुदाऽन्विताः ।
प्रचुक्रुशुर्दीनमुखा अनेकशो
वयं विमुक्ता भयदाद् विषानलात् ॥१४॥

इदं विषं नैव सहं कदाचन
जगद्विनाशार्थमिदं किलागतम् ।
सुदाहकः कष्टकरो जगत्त्रयं
विशेषतो व्याप्तसमस्तकष्टकृत् ॥१५॥

वने रणे ग्रामजलाग्निमध्यमे
स्थितान् समस्तानतिदोलजीविनः ।
सुपामि सत्यं कथयन्निदं स्वयं
सुरक्षकः शङ्करदेव आपिबत् ॥१६॥

सुघोर उद्दीप्तविषाग्निसञ्ज्वलः
समन्ततो व्याप्त इहैव मन्थने ।
तदाऽत्र मन्थे वृतदेवदैत्यजौ
धरास्थलीलुण्ठितकायिकौ कृतौ ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमूल्यरत्नार्थमिमे प्रमन्थकाः
प्रवृत्तिमन्तो गरमुल्वणं तदा ।
अभूत्करालस्तत आर्षभेयका
विषादयुक्ता अभवन्नहो विधे ॥१८॥

मृतो मृतोऽस्मीति रवं विचित्रकं
पिपासितो जात इहेति दुःखदम् ।
स्वयं समाकर्ण्य जनास्तदेदृशं
सुकष्टसिन्धौ नितरां निमज्जिताः ॥१९॥

तदा प्रचण्डोऽतिविचित्रशब्दजः
कराल उद्घोष इहैव सूत्थितः ।
अकल्पकोलाहल इत्यतो महान्
निशम्य दृश्येन समाकुला भृशम् ॥२०॥

तदैव घोरो घनगर्जनोत्थित-
स्तदात्मचेतोहर उग्र उद्धतः ।
बभूव सम्प्रोद्धततीव्रदुःखदः
सुतीव्रघण्टारवतुल्य भीषणः ॥२१॥

अये विषस्यैव गभीरवह्निना
सुदग्ध एवाऽस्मि विपद्गतो भृशम् ।
अवन्तु मामिष्टसुराः समन्ततः
स्वाभीष्टदेवाः करुणाकराः सदा ॥२२॥

मृतोऽस्मि भो दाहकवैषजाग्निना
सुतीव्रपीडाकरमृत्युदायिना ।
प्रयान्तु मामन्यतमाँश्च दुःखितान्
न कोऽपि सन्दृश्यत अत्र रक्षकः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रिताऽत्र पीडा नितरां प्रबाधते
कृतान्तजातैव सुदुःखदायिना।
सुपीडयत्येव निरन्तरं बुधा
अहो न कोऽप्यत्र सुरक्षकः खलु ॥२४॥

प्रयत्नशतकैस्तैरत्रयुक्ता-
स्तदपि न कृतदूरा तापपीडा।
सुघोरविषभवतापैः सर्वथा ते-
ऽतिशयविनतशीर्षाः स्मो वयं वै ॥२५॥

विषस्य पानेन सुकर्मणा तदा
सुरक्षणं प्रारभते महेश्वरः।
विमूर्च्छितास्ते सकलाः समुत्थिताः
सुलभ्यते तत्स्थितहर्ष ऊर्जितः ॥२६॥

सुरासुराजीवसमूह उद्धतः
प्रचण्डवैषीयसुगर्तकात्तदा।
सुरक्षिता स्वीयकृतेन कर्मणा
न कोऽपि जीवोऽस्ति शिवेन हापितः ॥२७॥

विषस्य पानं सकलस्य रक्षणं
सुरासुरापीडनहारकं ध्रुवम्।
सुकर्म कृत्वा भगवान् सदाशिव-
स्तदा करोत्येव क्रियां सुदुःसहाम् ॥२८॥

प्रचण्डवेगेन बहिः समुद्भवद्
विषं प्रगृह्य प्रलिहच्चराचरम्।
तदीयसंस्पर्शविदूषितानिलात्-
प्रखेदितान् वीक्षितवाँस्त्रिलोचनः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनन्तरं विस्मृतबन्धुपुत्रकान्
विषाग्निदग्धान् सुविलुण्ठितोदरान्।
निराशया नम्रमुखान् समन्ततः
परस्पराकृष्टजनान् व्यलोकयत् ॥३०॥

चलाचलैः पादतलैः परस्परं
समीपलब्धौ कृतदेहकम्पनान्।
पिपासितान् रुद्धगलान् पुरःस्थितान्
विलोक्य भूतेशविभुर्विकम्पितः ॥३१॥

तदैव हालाहलमित्ररूपधृक्
प्रभञ्जनोऽत्यन्तभयङ्करोऽभवत्।
विषस्य संसर्गवशात् समागम-
न्नभूत्करालं गरलं यथा तथा ॥३२॥

मृतानिवाऽत्यन्तविमूढविग्रहान्
पलायमानानपि कायरुग्युतान्।
विपत्तिवेगैरधिशोकबाधितै-
र्न दुःखपारस्य विदर्शकाञ्जनान् ॥३३॥

प्रदृष्टवान् देववरः सदाशिवो
न कं च सुस्थं प्रवरं प्रसन्नकम्।
समेऽपि जीवा अधिकं भयाकुला
विपत्तियुक्ताः पुरतो विलोकिताः ॥३४॥

बलिष्ठदेवाः सकलाः पलायिताः
सुदुर्बलास्तत्र विषेण पीडिताः।
दितेः सुताश्चापि तथैव दुःखिताः
सुरक्षणस्थाननिरीक्षया कति ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गता विदूरं कथमप्यनेकशः
स्थितिर्विचित्रा समभूत्तदा किल ।
सर्वेऽपि घोरेण विषेण पीडिताः
स्थितावमुष्यां शरणं शिवो ध्रुवम् ॥३६॥

यदैव जातं विषमुल्वणं द्रुतं
न ये गतास्ते तु विषाग्निमूर्च्छिताः ।
निरीक्ष्य तत्रत्यविषाग्निमुत्कटं
दयार्द्रचित्तेन युतो हरोऽब्रवीत् ॥३७॥

पुरा मया दुःखददृश्यमीदृशं
कदाऽपि नालोकितमस्ति कुत्रचित् ।
समीक्ष्य विज्ञाय सुतप्तमानसो
दयार्द्रचेताः प्रकरोमि दुःसहम् ॥३८॥

अहं न शक्नोमि जनान् प्रपीडितान्
क्षणं च सोढुं कथमप्यहो जनाः ।
विलोक्य जीवान्ननु दुःखितानहं
तदा न शोचामि नशक्यकं क्वचित् ॥३९॥

मदीयकर्तव्यपथे भयङ्करे
न केऽपि गन्तुं प्रभवन्ति निर्जराः ।
मयैव सर्वत्र भृशं प्रपीडितान्
जनान् समुद्धर्तुमकारि वर्त्म सत् ॥४०॥

स मत्क्रमः शीर्णसमस्तकण्टको
न कैरपि व्रज्यतमः सुदुःसहः ।
त्रिलोकलोकेषु भवाम्यहं सदा
समग्रतो दुःखसमुद्रतारकः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समन्ततो दुःखसमुद्रपातितान्
प्रचण्डवैषीयविपीडया द्रुतान् ।
विलोक्य सोत्साहविचित्रवीर्यवान्
समुद्धरार्थं कृतयत्नवान् भवः ॥४२॥

क्षणं विरम्यैव तदा स शङ्करो
व्यचारयत् कार्यदिशां स्वकीं खलु ।
विचित्रबुद्ध्या सुविचारतत्परं
मनः समाधाय पुनर्व्यलोकयत् ॥४३॥

अदम्यहालाहलरुद्धजीविनो
ह्यसह्यकालस्य मुखे समागतान् ।
असंख्यजीवान् सुसमीक्ष्य वेपितो
जनान् सुपातुं प्रबभूव धूर्जटिः ॥४४॥

अदृष्टपूर्वं विविधं कुदृश्यकं
शनैः शनैर्दृष्टिपथे समागतम् ।
विचार्य सूग्रो नितरां जगद्गुरुः
प्रवृत्त उग्रातिविचित्रकर्मणि ॥४५॥

असंख्यजीवान् गरपीडिताँस्तदा
सुदुःखितान् प्राणहरेण वायुना ।
दिवानिशं मुक्तिविचारचेतसा
युतान् विलोक्येश उवाच तान् प्रति ॥४६॥

भयङ्करेणैव विषाग्निना हतान्
सहायताप्राप्तिकृते समुद्यतान् ।
विभिन्नजीवान् सुतरां समीक्षको-
ऽहमत्र सम्प्राप्त उदग्रभूमिकः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं हि विश्वस्य समस्य दुःखहा
स्थितेर्हि सम्पूर्णतया विचारकः ।
प्रधान एकोऽस्मि जगत्त्रये शिवो
न कोऽपि दुःखार्णवतारणे क्षमः ॥४८॥

असह्यदुःखेन निरन्तरं युतान्
कृतान्तवक्त्रे हि शरीरदायिनः ।
मदन्य एकोऽपि समातुराञ्जनान्
पातुं न शक्तोऽस्ति न कोऽपि कर्हिचित् ॥४९॥

अतोऽहमेतर्हि विषं पिबामि भो
न कोऽपि मां रोद्धुमलं भवेदिह ।
विषस्य पानान्मम शक्तिवर्धनं
ह्यसह्यदुःसाध्यविषस्य नाशकम् ॥५०॥

न मेऽस्ति कश्चिद्विभवो जनार्तिदः
परः स एवाऽस्मि निधिर्जनाविता ।
अतोऽहमत्रैव सुकर्मणि प्रिये
प्रवृत्त आनन्दविधायके विधौ ॥५१॥

अनन्तरं तत्क्षण एव शङ्करः
समस्तजीवाद्यवने दृढव्रतः ।
कारुण्यपूर्णो लघु कालकूटकं
नियन्तुकामो बुभुजेऽमृतं यथा ॥५२॥

शनैः शनैः पीतविषे महामुनौ
विदूरदूरस्थितजीवबान्धवाः ।
तदा महिम्ना परमेश्वरस्य सा
मही बभूवाऽचलसत्त्वसंयुता ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदैव सर्वत्र विषस्य वाहक-
श्चराचरप्राणहरः प्रभञ्जनः ।
विषे प्रपीते स्वकमित्रभञ्जिते
प्रशान्त आसीच्छिवशक्तिवेपितः ॥५४॥

ततस्तु सङ्गृह्य विकीर्णबिन्दुक-
मितस्ततो व्याप्ततया करालकम् ।
देवाधिदेवेन समापितं गरं
समीक्ष्य जीवाः सुतरां प्रहर्षिताः ॥५५॥

सर्वं प्रशान्तं कृतवान् कृपानिधि-
र्विषानिलेऽस्मिन् प्रहतेऽखिलाः शुभाः ।
अहो अनन्तस्य कथाऽस्त्यनन्तिका
जगत्त्रयस्यैव कृतेऽस्ति चाद्भुता ॥५६॥

सहायताहेतुविदूनचेतसः
समेऽपि जीवाः सुतरां समेधिताः ।
प्रहर्षसोत्फुल्लशरीरकास्तदा
सुखोत्सवं चक्रुरदीनमानसाः ॥५७॥

समुद्रवापीस्थितमद्भुतं विषं
हठाच्च पीत्वाऽखिलदेव ईश्वरः ।
व्यधत्त सर्पैः स्वगणैश्च ताण्डवं
विलोक्य सर्वेऽतिसुखेऽतिशेरते ॥५८॥

सुघोरहालाहलपानकर्मणि
समस्तमेवोद्गममश्नुवाञ्छिवः ।
गभीरसामर्थ्यसमस्तकेन स
जयत्यहो सर्वविधान् सुरासुरान् ॥५९॥

सुपीतघोरस्य विषस्य कारणा-
दहो उमेशस्य गलोऽतिनीलकः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजात आश्चर्यमिदं त्रिलोकिनां
समस्तसामर्थ्ययुतेन तेन वै ॥६०॥

अनन्तशक्तिः सततं स्थितोऽस्म्यह-
मलुप्तशक्तिश्च तथैव चाऽस्म्यहम्।
निजेन सामर्थ्यसमस्तके न च
गलस्य नीलत्वमहं विनाशये ॥६१॥

तथा कृते चाऽत्र जनाः प्रहर्षिताः
समर्थयिष्यन्ति न कण्ठशुक्लताम्।
अवश्यकार्यं त्वितिहासरक्षण-
मतोऽहमिच्छामि तकस्य संस्थितिम् ॥६२॥

विचार्य सम्यग् भगवान् सदाशिवः
स्वरक्षयत् सुष्ठुतयैव नीलताम्।
तदादिदेवस्तु स नीलकण्ठकः
प्रजात आनन्ददनामकः सदा ॥६३॥

इतस्ततः क्षिप्तविषस्य भोजिनः
सवृश्चिकाः प्राणिविशेषभोगिनः।
गृहीतवन्तो विषबिन्दुकान् बहून्
तेनैव जाताः सकलास्त उद्धताः ॥६४॥

तदाऽभवन् सौम्यसुखावहा दिशः
निशाश्च सौन्दर्यगुणैः सुशोभिताः।
चलाचलानां च कृते मनोहरा
जाताः क्षणात् सर्वसुखस्य हेतवः ॥६५॥

देवाधिदेवशिवभिन्नभवा हि देवाः
सर्वेऽपि सङ्ग्रहविलग्नहृदो विदृष्टाः।
देवारयो दितिजनामयुताः प्रसिद्धाः
सर्वेऽपि तेऽनवरतं स्पृहयन्ति वित्तम् ॥६६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनोर्वंशजाताः समे मानवास्ते
सदैव वित्तार्जनलग्नचित्ताः।
रात्रिन्दिवं हि प्रभवन्ति लीना
द्रव्यार्जनेनैव सुदीर्घचिन्ताः ॥६७॥

अस्यां स्थितौ सकलपदार्थनिधौ
प्रवृत्तवाञ्छाप्रकोटिपूर्तिकृते।
लग्ना भवन्ति सततं तद्विचित्रं
विचार्य सर्वं विरामोऽस्त्यवश्यमार्याः ॥६८॥

सुरासुरज्येष्ठतमेन शूलिना
गरे प्रपीतेऽपि स पूर्ववद् बली।
स्थितः प्रशान्तः सुरसंघहीरकः
सुरारिभिश्चाऽपि मुहुर्मुहुर्नतः ॥६९॥

अग्नेः स्वल्पाऽपि मात्रा विश्वदाहे समर्थाऽस्ति
वदन् सामुद्रं तीव्रं विषं पीतवान् स देवाधिदेवः।
अत्यन्तं कान्तिमानाश्चर्यान्वितस्तापसोऽसौ
सानन्दं सागरीयं तोयं यथा तज्जघास ॥७०॥

समस्तविश्वस्थितजीवसंहति-
स्तदाऽभवत् सौख्यसहस्रसंयुता।
जगत्त्रयं पूर्ववदेव सम्प्रति
संलब्धवान् शान्तिसुकोटिसंख्यिकाम् ॥७१॥

श्रीपूर्णेन कृतेऽत्र चन्द्रपरके कारुण्यपूर्णे शिवे
सौन्दर्येण युते मनोज्ञकविताकान्ते कलाकाव्यके।
क्ष्वेडस्य प्रतिकारकर्मपरके बाणेन्दुसंख्यान्वितः
सर्गः पूर्तिमगादधीत्य रशभे शं नन्दिताः स्युः शिवात् ॥७२॥

॥ इति पञ्चदशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षोडशः सर्गः

(विश्वनाशकसामुद्रतीव्रविषशमनोत्तरस्थितिवर्णनात्मकः)

तदा त्रिलोकी विषसिक्तवायुना
प्रकम्पिसम्मूर्च्छितजीवपङ्क्तिभिः ।
सहैव शान्ते भयदे प्रभञ्जने
विनष्टदाहा समभूद्धि तत्क्षणात् ॥१॥

कठोरहालाहलदीप्तवह्निना
प्रभञ्जनात् प्राप्तबलेन गर्विणा ।
न भस्मभूतं त्रिजगद् यथायथं
स्थितं यथापूर्ववदेव सज्जनाः ॥२॥

तदत्र देवाधिपदेवदेवकः
समस्तविद्यादिकलागुरुर्भृशम् ।
प्रमाणभूतोऽस्ति महेश्वरो महान्
सुरक्षितास्तेन सुरासुराः समे ॥३॥

सहेलयैवं प्रपपौ दृढं गरं
समस्त संसारविलोकिते क्षणे ।
विषे सुदीप्ते भयदे समन्ततो
गलेऽभवञ्छाश्वतिकं विभूषणम् ॥४॥

सदैव कर्पूरवदेव वर्णकोऽ-
पि नीलकण्ठो ह्यभवद् विभुः स्वयम् ।
क्षमोऽप्ययं पूर्ववदेव शुक्लकं
कर्तुं समर्थोऽपि न चाऽकरोत्प्रभुः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इहैव चैतिह्यपुराणभाषिते
महत्त्वपूर्णेऽखिललोकमङ्गले।
यथार्थतादानकृते जगद्भुवा-
मत्यन्तमावश्यकतां न चाऽत्यजत् ॥६॥

समुद्रमन्थेऽभवदाकुलं जगद्
विषस्य वेगैश्च समिश्रवायुना।
जगत्त्रयं व्याप्तविषं कृतं खलु
मयैव संरक्षितमद्य तत् सुखि ॥७॥

ममेदमैश्वर्यमनादिविश्वके
जागर्ति नित्यं न च तत्क्षयो भवेत्।
गलस्य नीलत्वविनाशने त्वहं
सदा समर्थोऽस्मि यथार्थमेव तत् ॥८॥

जगत् स्थितस्यास्य सुदिव्यभूमिक-
सदैतिहासस्य सुरक्षणीक्रिया।
मया गलस्याऽस्य विनाशितेऽसिते
भवेत्तदैतिह्यविनाश उद्धतः ॥९॥

अतो मयैतस्य विनाश उज्झितः
सुकार्यमेतत् कृतमत्र रक्षणम्।
बृहद्भिराचार्यमुखैः सदाकृत-
मतोऽधुनाऽशाधि मया सुरक्षितम् ॥१०॥

प्रकम्पनेनैव भृशं सुमीलितं
जगत्त्रयं ध्वंसयितुं सुभीषणम्।
समुद्यतं वीक्ष्य जगद्गुरुं विषं
सुपीतवान् सर्वमपि प्रभीषकम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शशाम सोत्पातभवा उपद्रवा-
विषस्यपाने निखिला च।
अनन्तसंख्या अतिकष्टकारका
अहो वयं धन्यतामा महाभगाः ॥१२॥

अहोऽहमत्रैव विचारनिश्चये
स्थितोऽस्मि चैतिह्यसुरक्षणक्रमे।
गले पुनः शुक्लकृते च निश्चित-
मैतिह्यनाशाद्धि भवेद् सुदुःखम् ॥१३॥

इतो दिनादेव सदाऽहमत्रके
जगत्समस्ते खलु नीलकण्ठजात्।
नाम्नः प्रसिद्धः प्रभवामि सर्वथा
तदस्य नाम्नः सुमहत्त्वमस्ति यत् ॥१४॥

अकर्तुमोङ्कर्तुमथान्यथाकृतौ
शक्तोऽस्मि कैलापितिर्जगद्गुरुः।
न शक्त ईशादपरः कथञ्चन
रहस्यमेतद्धि पुरः प्रकाश्यते ॥१५॥

सुरासुरा मानवजीवजातिका-
श्चराऽचराः स्थावर जङ्गमादिकाः।
समस्तजीवा मदभिन्नरूपका
मदंशजाता न तिरोहितं क्वचित् ॥१६॥

त्रिलोकलोकैः सचराऽचरैः खलु
मदीयमेतत् कथितं विचार्यताम्।
यथाऽहमासं विषलब्धितः पुरा
तथैव शुक्लेन गलेन संयुतः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनश्च तादृग् भवितुं न चोत्सहे
यथास्थिति स्थातुमहं प्रकामये।
सदा तदैतिह्यमहं सुरक्षणे
दृढो भविष्यामि न चात्र शंसयः ॥१८॥

अतस्तु नैवाहमिदं विभूषणं
कदाऽपि विस्मर्तुमहो यतिष्ये।
सदैव सर्वत्र ममेदमाह्वयं
जगत्प्रसिद्धं सततं विभावये ॥१९॥

इतः परं देवनराः सुरारयो
वदन्तु मां सस्पृहया निरन्तरम्।
स नीलकण्ठोऽस्ति सदा समुत्कटे
भयङ्करे कर्मणि सर्वरक्षकः ॥२०॥

विधाय चैतिह्यविशिष्टकर्मकं
सुरासुरान् रक्षितवान् सदाशिवः।
अनन्तरं ते हि सदैव निष्ठया
समादरेणैव गृणन्ति सन्ततम् ॥२१॥

स नीलकण्ठो भगवान् महेश्वरो
विख्यात आनन्दकरो जगत्त्रये।
सुशोभते ज्येष्ठतया दिवौकसां
न तत्समो नाऽप्यधिकोऽस्ति कश्चन ॥२२॥

अहो विचित्रं विबुधार्षभस्य तद्
विमृश्य सर्वातिशयं प्रकर्षकम्।
सुरा नरा दानवराजगुह्यका
मुहुर्मुहुर्नम्रशिरस्कतां ययुः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलौकिकं वीक्ष्य शिवस्य पौरुषं
ह्यनन्यसाधारणमद्भुतं महः ।
नतानना धिक्कृतनैजविक्रमाः
सर्वेऽपि ते जीवगणा विलज्जिताः ॥२४॥

सुरासुराधीशसहस्रशस्तदा
सुरम्यमाधुर्यगुणप्रकर्षजैः ।
स्तवैः समेताः स्तुतिपङ्क्तिमालिका-
प्रकोटिकोट्या समवर्णयञ्छिवम् ॥२५॥

विलेशयैर्हे शिव ते निरन्तरं
विचित्रवात्सल्यसुखं प्रकाम्यते ।
चितानलप्लुष्टिविभूतिरञ्जनं
कृताभिषेकेऽर्पितद्दिव्यमौषधम् ॥२६॥

प्रमन्थघर्षेण समुत्थितं विषं
प्रचण्डदुर्धर्षणजातसङ्कटम् ।
विचित्रसंसर्पितधृष्टवायुतः
प्रकम्पितः प्राणिसमूह आहतः ॥२७॥

जनैः कदाचिद् बहुदुःखदं पुरा
दृश्यं न कुत्राऽपि च हीदृशं बुधाः ।
इदं सुसत्यं प्रवदाम आनता
अहो इदानीं कथिता यथास्थितिः ॥२८॥

निरीक्ष्य विज्ञाय च घोरपीडितान्
जनान् समुद्धर्तुमहं सुजागृतः ।
पुरस्थितश्चाऽस्मि विषाक्तचेतसां
सुरक्षितानां हतमूढतावताम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दयाऽर्द्रभावाद् गहने भयङ्करे
प्रवृत्त एवाऽस्मि जगत्पुरस्थितः ।
अलौकिकं दुर्विसहं जगद्द्रुहं
कृतं मया कार्यमिदं सुभीषणम् ॥३०॥

अहं न शक्नोमि सुपीडिताञ्जनान्
समीक्षितुं काँश्च प्रकम्पितान् मुहुः ।
विलोक्य जीवान् शततं सुदुःखितान्
तदुद्धरे कर्मणि मे हठाद् गतिः ॥३१॥

समुद्रमन्थेन समुद्भवान् मणीन्
सङ्गृह्य सौख्यार्णवमग्नमानसाः ।
सुरासुराः सौख्यघनाः निरन्तरं
सुतीव्रतापे ह्यपतन् वताऽहह ॥३२॥

न कोऽस्ति मादृक् विबुधेषु कुत्रचित्
गम्भीरदुःखे पतितान् समुद्धरेत् ।
ममैव कर्तव्यमिदं सुनिश्चितं
विषं प्रचण्डं विनिपीय रक्षणम् ॥३३॥

सदैव तृप्तोऽस्मि कदाऽपि किञ्चन
पदार्थजातं न लषामि कर्हिचित् ।
समस्तवस्तूनि वितीर्य सम्प्रति
दिगम्बरो जात इतीह सत्यकम् ॥३४॥

सुतीक्ष्णहालाहलरुद्धचेतसः
करालकालस्य मुखे समागतान् ।
असंख्यजीवान् प्रसमीक्ष्य दुःखितः
सुरासुराधीश उवाच तान् प्रति ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतीवचण्डेन विषेण मूर्छितान्
सहायताप्राप्तिकृते सुचिन्तकान्।
अनेकजीवानतिकष्टपीडितान्
स्वयं विलोक्यैव दयापरोऽभवम् ॥३६॥

तदैव जीवा विषसक्तवायुना
प्रकम्पिता मूर्च्छितभिन्नजातिकाः।
सहैव शान्ते मृतिदे प्रभञ्जने
विनष्टदुःखा अभवन् सुराऽसुराः ॥३७॥

यतो यतो वायुरयः प्रवर्तते
ततस्ततः प्राप्तविषादपीडिताः।
विषेण तीव्रेण सवायुना हता-
मुमूर्षवोऽन्त्यस्थितिसन्निधिं गताः ॥३८॥

विषाक्तवायुर्दिशि यत्र सङ्गत-
स्तदीयगन्धेन च रुद्धनिःश्वसाः।
चराचरप्राणिसमूह उत्पत-
न्निपातकाले तु सुमूर्च्छयाऽप्लुताः ॥३९॥

अहो अहो दर्शकवृन्दमाहतं
कथं कथङ्कारमिदं सुरक्षितम्।
समीक्ष्य सर्वानतिदुःखसंवृतान्
विचित्रतायुक्तदशां समागतान् ॥४०॥

विलक्षणं वीक्ष्य भवस्य पौरुषं
सुरासुरा उग्रतरं समुद्यतम्।
मुहुर्मुहुर्ध्यानपरा विवेकिनो
न शेकुराश्चर्ययुता सुवेदितुम् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतिप्रचण्डेन गरेण मूर्च्छितान्
सहायताप्राप्तिकृतेऽतिचिन्तकान् ।
अनेकजीवान् भवितव्यसङ्कुलान्
सुवीक्ष्य तन्नाशयितुं व्यचिन्तयत् ॥४२॥

अहं हि विश्वस्य विचित्रदुःखद–
स्थितौ हि साकल्यतया निवारकः ।
एकोऽस्मि नाऽन्योऽस्ति मदन्यरक्षको
ह्यतोऽहमद्यैव विषस्य नाशकः ॥४३॥

ततस्तदाऽसौ भगवान् महेश्वरः
करालकालस्य मुखाद्विमोचने ।
सृतस्तदेषामतिकष्टजीविनां
समस्तदुःखार्णवनाशने दृढः ॥४४॥

ततोऽन्तिकस्थाः सकला विखेदिता–
श्चराचराजीवजगत्प्रकोटिकाः ।
भयङ्करान् मृत्युमुखात् पृथक्कृताः
सहायताप्राप्तिकृतौ समाकुलाः ॥४५॥

तदेव सर्वत्र विषस्य वर्द्धक–
श्चराचरप्राणहरः प्रभञ्जनः ।
विषस्य पाने सति तत्क्षणादसौ
प्रशान्त आसीद् विकलः प्रभञ्जनः ॥४६॥

समुद्रमन्थप्रभवं सुभीषणं
पीतं समस्तं कृतकौतुकं बृहत् ।
तदस्य हालाहलपानकालिके
क्षणे तदा हस्तबहिर्गतं तत् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षिप्तं समस्तं प्रपपुर्विषैषिणः
ससर्पजीवाः सकलाश्च भोगिनः।
तदाऽभवत् सौम्यसुखावहं दिनं
निशाश्च सौन्दर्यगुणैः सुखप्रदाः ॥४८॥

समस्तदेवासुरलोकिते क्षणे
स देवदेवः प्रपपौ हलाहलम्।
एवं सुपीते सकले पुरस्थिते
तदाऽभवन्नीलगलस्त्रिलोचनः ॥४९॥

सुरासुरज्येष्ठतमः सदा शिवो
गरे प्रपीतेऽपि तथैव शक्तिमान्।
स्थितः प्रसन्नः सकलैः प्रपूजितो
विचित्रशक्तिः परमेश्वरो हरः ॥५०॥

भवन्तु नित्यं शिवभक्तिकारका-
स्तथैव नित्यं समुपासकाः समे।
योऽसौ समस्तेषु जगत्सु रक्षकः
सदैव वर्वर्ति न संशयो बुधाः ॥५१॥

सुरासुरेन्द्रस्य शिवस्य पौरुषेऽ-
द्भुतां प्रशक्तिं परिदृश्य विस्मिताः।
प्रकोटिजीवा नतमस्तका भृशं
समादराच्चक्रुरहो नमो नमः ॥५२॥

प्रचण्डवातेन प्रवर्धितं विषं
निपीतमुग्रं बलवत्पिनाकिना।
विषं विनष्टं सुविलोक्य तत्क्षणे
तदा जना व्याकुलतां प्रतत्यजुः ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलं विषोत्पत्तिकथा प्रकीर्तना-
दलं विषाद्धीनदशाविवेचनात्।
अलं पलाय्यैव गतप्रचर्चना-
दलं तदीयस्य च शौर्यवर्णनात् ॥५४॥

इयं हि वेला जगदीश्वरस्य सा
सुकीर्तिसंख्यानकृते सुयुक्तिका।
बुधा भवन्तो नितरां भवन्तु भोः
कदाऽपि दूरस्थितिका न पृष्ठगाः ॥५५॥

इतः पुराऽब्धेर्मथने सुसंगताः
सुरासुराः पूर्णतया मथे वृताः।
समुद्रमन्थस्य कृते ह्यपेक्षितान्
पदार्थमुख्यान् सकलान् समानयन् ॥५६॥

आचार्याद्यकपूर्णन्द्ररचिते चातुर्यदे शाम्भवे
सौन्दर्येण युते मनोज्ञकविताश्रेष्ठे मनोमोहके।
काव्येऽस्मिन् मधुरः रसेन्दुसहितः सर्गो व्यगादग्रिम
वारेन्दुं च बुधा विलोक्य सुखिनः स्युर्देवदेवाधिपात् ॥५७॥

॥ इति षोडशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तदशः सर्गः

(देवकृतप्रश्नानुसारं ब्रह्मविष्णुकृतशिववैशिष्ट्यवर्णनात्मकः)

समुद्रमथनाय तैः प्रयतितं सुसम्मृद्धिकै-
स्तथाऽपि मणिरत्नलम्भनकृतौ सशङ्काश्च ते।
विषेण हतसाहसा अपि तदाप्तिलग्ना पुनः
प्रचक्रुरतिवेगतो मथनकार्यकं संहताः ॥१॥

परस्परमतीव ते स्वजनबन्धुतामागताः
स्ववश्य उदधेर्मथे द्रुतपरस्परस्वीयकाः।
प्रमन्थुरतिबुद्धिभिर्विकटमन्दरः प्रार्थितो
भुजङ्गपतिवासुकिर्मथनरज्जुतां प्रापितः ॥२॥

सुसम्भृतसमस्तका मथनयज्ञशालासिनः
प्रफुल्लवदनार्यभाः प्रचुरकाम्ययुक्ताः समे।
समारभणतत्परा अकृतविघ्नदेवार्चनाः
पुनश्च मिलिताः प्रचक्रमुरनन्तरं ते मथम् ॥३॥

बलादुभयतोऽधिकः कषणवेगजन्यो ध्वनिः
सुदूरभुवनस्थितैरपि जनैः समाश्रूयत।
कुतूहलसमन्विताः किमिदमस्ति चैवं तदा
विचार्य सहसाऽऽगता अत उदुग्रमर्दो ह्यभूत् ॥४॥

गणेशसुरपूजनं प्रथमकं विसृज्यैव ते
बलेन बहुना समे जलधिमन्थलग्ना इमे।
प्रवृद्धतरसाहसाः सकलदेवदैत्यास्तदा
सुतीव्रविषसञ्चराज्जनितभीतिमन्तो भृशम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदादिकवलादने जनितमक्षिकापातनं
यथा भवति दुःखदं तदिव दुर्धरं कष्टदम्।
प्रभग्नमनसः समाकुलतमा विवर्णास्तके
सरत्नविभवाप्तिभञ्जनभयान्निराशाः कृताः ॥६॥

पुरस्थितसुघोरभीषणविषेण रुद्धाः समे
कियन्त इत उद्गुताः कतिपये दृढं मूर्च्छिताः।
तदैव चलिते प्रचण्डपवने विषं वर्धितं-
सुविस्तृततरं च जातमधुना समे व्याकुलाः ॥७॥

तदा मथनलीनका असुरदेवमुख्या इमे
सुमूर्च्छिततमान् समीक्ष्य करुणापरा दुःखिताः।
विचार्य विषरोधकं सुखकरं शिवं सम्प्रति
प्रमत्य कनकाचलं सुशिखरं च कैलासकम् ॥८॥

जवेन सहसा प्रजग्मुरित इष्टकैलासकं
सुरम्यसकलं मनोहरतमं सुदृश्यैर्युतम्।
विदृश्य सकला इमेऽमुमचलं मुदा संयुताः
पुरस्थितमुमेशदेवममरं प्रणेमुर्मुदाः ॥९॥

प्रगृह्य सकलानि ते विविधवस्तुभूतानि च
समुद्रमथनस्य कर्मणि रताश्च ते काश्यपाः।
कृते च मथने समे प्रबलविघ्नभूतं विषं
विलोक्य भृशदुःखिताः शरणदं प्रभुं संश्रिताः ॥१०॥

उपायरहिता वयं शिवगिरिं हि कैलासकं
विषज्वलनदुःखिताः शरणदं सुरेशं प्रभुम्।
गता विनतमस्तका गरलभग्नलक्ष्याः समे
विमृष्य भगवान् मृडोऽतिकरुणापरो दुःखहा ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षमाः सकलकर्मणि प्रचुरशक्तिमन्तः सदा
भवन्त उदिता भृशं कथमहो अकिञ्चित्कराः ।
महर्द्धिकसुरासुरा अतिशयं प्रतप्ताः खलु
कथञ्च मम सम्मुखे मथनकर्म हित्वाऽऽगताः ॥१२॥

कथं सकलशक्तिका दिविषदो भवन्तः स्थिराः
परस्परसुमीलिता रुचिरलक्ष्यभावान्विताः ।
धुरन्धरसुपौरुषा अखिलजीवपूज्या भृशं
विपत्तिबहुलैर्द्रुता मम समीपमुत्प्लुत्य वै ॥१३॥

सनिःश्वसनकर्मणा हतसमस्तकार्योजसो
नभिन्नमनसो ह्यभिप्रचुरभक्तिभावैर्वृताः ।
अनन्यशरणाः सुदुःखदविषेण सम्पीडितां
मयैव करणीयमों यदि किमस्ति चेत् प्रोच्यताम् ॥१४॥

विहाय भयसन्ततिं निखिललज्जनं दूरतो
निधाय कुशला भृशं प्रकथयन्तु यूयं द्रुतम् ।
भवन्त इह सङ्गता मम समीपमग्रे स्थिता
मया समभिनन्दनं क्रियत इत्थमादौ ननु ॥१५॥

जलं मधुरशीतलं विविधरस्यपुष्पाणि च
प्रगृह्य सकला अपि प्रचुरमिष्टखाद्यं तथा ।
सुदुःखममरास्तथा दितिसुतास्त्यजन्तु स्वकं
मदाप्तिजनितात् सुखाद् भवति दुःखनाशो ध्रुवम् ॥१६॥

सुशीतलमनोहरं परमसुन्दरं पर्वतं
विभिन्नशिखरं शुभं सकलसौख्यदं पावनम् ।
निराधि निवसन्तु भो समधिगम्य कैलासकं
समस्तसरितांनिधेर्जनितवैषपीडायुताः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुद्रमथनक्रमे सकलजीवशङ्काप्रदे
सुरासुरसमक्षजः प्रखरविघ्नहालाहलः ।
सुदुःखयति सर्वथा प्रमुखकार्यमन्थोत्सवे
भवन्मुखविलोकनाच्च कुशलं मया चिन्तितम् ॥१८॥

प्रचण्डगरलस्य यः सकललोकसन्दाहकः
निदाघ इव घर्मदः क्रमश उग्रमृत्युप्रदः ।
गरप्रसर उद्धतः सकललोकनाशाय स
भवेदिति भयाकुलैरधिगतञ्च कैलुकम् ॥१९॥

समस्तजगतां सरक्षणमितः समारभ्यतां
प्रभो ! सकलनाशको गर इतः सुवृद्धिं गतः ।
प्रचण्डपवनान्वितोऽतिशयमुग्रकायाश्रितः
समस्तजगतां क्षणाद् भुवनभस्मसात्कारकः ॥२०॥

तदर्थमिह चाऽऽगता वयमहो ! कृपाब्धेः पुरो
ह्यनन्यशरणास्त्वयि प्रबलभक्तिभावान्विताः ।
अनन्यकरुणापर ! प्रखरकर्म कृत्वैव नः
समस्तजगतां भयापहरणं प्रकुर्या द्रुतम् ॥२१॥

अतीव शरणागतैरुदितशब्दवृन्दं प्रभु-
र्विचार्य जवसंयुतो निखिलविश्वरक्षाकृते ।
स्वभिन्नसुरनायकैर्नकृतपूर्वकार्ये दृढे
प्रसह्य लघुमृत्युदे गरलपानकार्ये वृतः ॥२२॥

जगत्त्रिकविनाशने सततमुद्यतं भीषणं
प्रवृद्धमतिवेगतो विषमिदं प्रदृश्यैव ते ।
समुद्रमथने युता असुरदेववीरा मुहु-
रतीव विकलाः समे गरलवाष्पपीडायुताः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकार्यकुशला अपि प्रबलकीर्तियुक्ता इमे
प्रमन्थनकृतौ समुत्पतितविघ्नहालाहले ।
न लब्धमितरद्बलं सततलग्नचित्तैश्च तैः
सहस्रश उमापतेः शरणलम्भनाद्धर्षितैः ॥ ॥२४॥

प्रसर्पिविषपीडितैः शतश उग्रचिन्तापरैः
समुद्रमथतत्परैरतिबलैश्च सर्वैरपि ।
न लब्धमिह साधनं किमपि सार्थकं सौख्यदं
ततश्च कुशलैः सुरासुरगणैः श्रितः शङ्करः ॥२५॥

वृतो भृशमयं शिवो निखिलशक्तिभूमिर्दृढः
सुमत्य सकलाश्च ते मथनलग्नचिन्ताः समे ।
तमेव शरणं गताः सकलदुःखहानाय वै
स एव विषनाशने प्रचुरशक्तियुक्तो भवः ॥२६॥

सुवेशयुतमन्थकान् प्रचुरशक्तियुक्तान् दृढान्
द्रुतं स्वपुरतः स्थितान् गरलशङ्कुलानाहतान् ।
विदृश्य जगतांपतिर्निखिलविश्वपाता शिव-
स्तदैव भयमोषकैः शुभवचोभिरानन्दयत् ॥२७॥

भवन्त इह काश्यपा ऋषिकुलस्य कीर्तिप्रदा
अमेयबलवीर्यका रिपुकुलाय वज्रायिताः ।
ममाऽत्र गिरिमाश्रिता सततसौख्ययुक्ताः दृढा
भवन्तु कुशला द्रुतं निखिलदुःखपारं गताः ॥२८॥

अहं सपदि शीघ्रतो गिरिसुतामतं चाऽऽददन्
व्रजामि विषशान्तये मदनु यूयमागच्छत ।
द्रुतं तदुपचारकृत् कथमपीह जाये ध्रुवं
विदूरगतबाधका भवत यूयमद्यैव भोः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतीव शरणागतैः कथितशब्दवृन्दं प्रभु-
र्विचार्य जवतायुतो निखिलविश्वरक्षाकृते।
निवेदनकरैर्युतस्त्रिजगतां गुरुः शङ्करो
हठात् सकलशक्तिको गरलसक्तभूमिं गतः ॥३०॥

भयङ्करयमायुतान् दृढतया सुमूर्च्छापरान्
प्रतप्तविषपीडयाऽधिगतया मुमूर्षायुतान्।
गजाननमपूज्य वै जलधिमन्थने संयुतान्
विदृश्य जगतांगुरुर्हि करुणानिधिः कम्पितः ॥३१॥

कृपालुभगवाञ्छिवः स्वशरणे समागन्तृभिः
सहैव गरलोद्भवे स्थलविशेष उग्राऽवनौ।
विमूर्च्छितनिदानकृद् भुवनरक्षणे धूर्जटि-
र्भयेन हतकायकैः पुनरहो मथे संवृतैः ॥३२॥

न कार्यमधुना ध्रुवं बहुविधं विचिन्तादिकं
प्रचण्डविषपीडकः परित आगतो दुःसहः।
प्रणश्यति सुनिश्चितं विषहरः पुरः संस्थितो
न भीतिकरता विषात्, प्रलय आगतस्तस्य भोः ॥३३॥

आचार्यव्रतपूर्णचन्द्ररचिते विद्वज्जनानन्ददे
साहित्यात्मभवे रसादिविविधैर्युक्ते मनोमोददे।
काव्येऽस्मिन् भवशक्तिवर्णनमये वारेन्दुसर्गो गतो
वाजीन्दुं च विलोक्य सुखिनः स्युर्देवदेवाधिपात् ॥३४॥

॥ इति सप्तदशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टादशः सर्गः
(देवाधिदेवनीलकण्ठस्य सर्वातिशायिकृत्यवर्णनात्मकः)

इतः परं प्राक्रमते स्वकीयके
सुराधिपः प्रार्थित इत्थमादृतः।
प्रचेष्ट आनन्दयुतः स्वके क्रमे
विशृङ्खलं प्राप्तविषं तिरोहितुम् ॥१॥

विमूर्च्छनात् सर्वविधान् सुजीवकान्
विषाक्तवातेन च भिन्नमर्मकान्।
चराचरात् प्राप्तविचित्रदुर्दशान्
परस्परं खिन्नमुखाँश्च दीनवत् ॥२॥

विलोक्य सर्वत्र मुमोह धूर्जटिः
पश्चात्ततोऽसौ श्रुतिसूक्तसम्मताम्।
प्रकृष्टशक्तिं समदर्शयत् प्रभु-
र्विषस्य तीव्रस्य विनाशनेऽलगत् ॥३॥

विषं प्रचण्डं प्रतिगृह्य पाणिना
प्रसह्य पातुं स विचक्रमे क्रमात्।
सुतीव्रवेगीव समुद्रनिम्नतः
समुत्पतत्तद्गरमाशितुं दृढः ॥४॥

देवाधिदेवेशकृतं विचित्रक-
मलौकिकं कार्यविधिं समीक्ष्य ते।
विमूर्च्छिता रौद्रविषाग्निपीडिताः
समे जना अद्भुतदृश्यतानिताः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अलौकिकः सोऽस्ति सदैव सर्वथा
विचित्रता तस्य कृतौ प्रदृश्यते।
तदीयवाहा विविधाश्च ये खलु
चलन्त आत्मीयतया समासते ॥६॥

बली वलीवर्दसनन्दिसिंहका
मयूरसर्पेण युताः समूषकाः।
परस्परं शत्रुसमानरूपिणः
परं शिवाग्रे तु सुसौहृदान्विताः ॥७॥

बिभेति सर्वोऽपि सुरासुराधिपात्
प्रशस्तसामर्थ्ययुतोऽपि कम्पते।
सुरासुराणां सकलो युगान्तको
भयङ्करो विप्लवतुल्य ईश्वरः ॥८॥

सदाशिवः सर्वजनार्तिहा ध्रुवं
तकं विना केऽपि सुरा न सक्षमाः।
समानभावोऽस्ति शिवस्य सर्वतः
सुरासुरेषु प्रबला समानता ॥९॥

न पक्षपातोऽस्ति शिवस्य कुत्रचित्
समानभावाद्धि स मान्यते समैः।
शिवः शिवोऽस्त्येव बुधाः ! सदैव हि
स एव कर्ताऽवक उत्तमो हरः ॥१०॥

स्वयं स पञ्चानन आत्मजौ पुनः
षडाननो हस्तिशिरो गणेश्वरः।
सुशौर्यसेनाधिपकार्तिकेयकः
पराम्बया ते सततं समेधिताः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचित्रसौख्यस्य सदैव भागिनः
सदैव पूर्णा अनपेक्षवस्तुकाः ।
तथा स्थितौ तोषधरा धुरन्धरा
न तादृशा केऽपि सुरासुराधिपाः ॥१२॥

अहो ! अहोरात्रमनन्यमानसा
न किञ्चिदिच्छासहिता अलोभिनः ।
अलक्षणौपम्यत आत्मतन्त्रका
असाध्यकार्याणि विधाय मानिताः ॥१३॥

न तस्य देवासुरजीववृन्दकं
पुरः स्थितिं कर्तुमपि प्रकल्पते ।
स देवदेवो बहुधाऽन्यदैवतै
र्विलोकने चाऽपि न शक्यते ध्रुवम् ॥१४॥

बिभेति सर्वोऽपि सुरासुराधिपात्
प्रशस्तसामर्थ्ययुतोऽपि कम्पते ।
विश्वस्य सर्वेषु स वै युगान्तकः
सर्वार्तिहा सर्वसुखाकरो महान् ॥१५॥

स पातुमैच्छत् सकलं विषानलं
सुदुःसहं घोरतरं यमप्रभम् ।
न तत्र कोऽपि प्रबभूव बाधकः
स जीयते केवलमीश्वरेच्छया ॥१६॥

शनैः शनैः पातुमनन्यमानसः
प्रवृत्त एवेह समद्भुते विधौ ।
अहो ! अहोभिर्महिमाऽम्बिकापतेः
प्रवर्द्धते प्रत्यहमत्र विश्वके ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषस्य पानेन सुराधिपो ध्रुवं
करोति रक्षामिति जातनिश्चयाः ।
विमूर्च्छितास्ते क्रमशो विमूर्च्छनां
विहाय जाताः सकलाः सहर्षकाः ॥१८॥

सुरासुराजीवसमूह उद्धतः
प्रणष्टवैषस्थिजातसम्मदः ।
सुरक्षिताः स्वीयसुकर्मणा समे
न कोऽपि जीवोऽस्ति शिवेन हापितः ॥१९॥

विषस्य पानं सकलस्य रक्षणं
सुरासुरौद्भुत्यकरं विचित्रकम् ।
सुकर्म कृत्वा भगवान् सदाशिव-
स्तिरस्करोत्येव सुरासुराधिपान् ॥२०॥

प्रचण्डवेगेन बहिः समुद्भवद्
विषं प्रसह्य प्रलिहच्चराचरम् ।
तदीयसंसर्गसुदुष्टवायुना
प्रखेदितान् वीक्षितवान् महेश्वरः ॥२१॥

अनन्तरं विस्मृतबन्धुबान्धवान्
विषाग्निदग्धान् भुवि लुण्ठितोदरान् ।
निराशया सुष्कमुखान् समन्ततः
परस्परासक्तकरान् व्यलोकयत् ॥२२॥

चलाचलैः पादयुगैः परस्परं
सम्पर्कहेतोश्च कृताङ्गकम्पनान् ।
पिपासितान् रुद्धगलान् पुरःस्थितान्
समीक्ष्य रुद्रः करुणापरोऽभवत् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदैव हालाहलमित्ररूपधृक्
प्रभञ्जनोऽत्यन्तभयङ्करोऽभवत् ।
विषस्य संसर्गवशात् समन्ततो
ह्यभूत्करालं गरलं यथा तथा ॥२४॥

मृतानिवात्यन्तविमूढमानसान्
पलायमानानपि वैषरुग्युतान् ।
विपत्तिजातैरधिशोकबाधितैः
स्वदुःखपारस्य विचिन्तकाञ्जनान् ॥२५॥

प्रदृष्टवान् देववरः सदाशिवो
न कं च सुस्थं प्रवरं धुरन्धरम् ।
समेऽपि जीवा अधिकं भयाकुला
विपत्तियुक्ताः पुरतो विलोकिताः ॥२६॥

समस्तदेवाः प्रबलाः पलायिताः
सुदुर्बलास्तत्र विषेण पीडिताः ।
दितेः सुताश्चापि तथैव दुःखिताः
सुरक्षणस्थाननिरीक्षया कति ॥२७॥

गता विदूरं कथमप्यनेकशः
स्थितिर्विचित्रा समभूत्तदा किल ।
सर्वेऽपि घोरेण विषेण पीडिताः
समस्तलोकाः समचिन्तयञ्छिवम् ॥२८॥

यदैव जातं विषमुल्वणं तदा
न ये गतास्ते तु विषाग्निना हताः ।
संवीक्ष्य तत्रत्यविषाग्निमुत्कटं
दयार्द्रभावेन युतो हरोऽब्रवीत् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरा मया दुःखददृश्यमीदृशं
कदापि नाऽऽलोकितमस्ति कुत्रचित्।
निरीक्ष्य संज्ञाय भृशं सुतप्तको
दयान्वितोऽहं प्रकरोमि दुःसहम् ॥३०॥

अहं न शक्नोमि जनान् प्रपीडितान्
क्षणं च सोढुं कथमप्यहो ! जनाः।
विलोक्य जीवान्नु दुःखितानहं
तदा न शोचामि नशक्यशक्यतम् ॥३१॥

मदीयकर्तव्यपथे भयङ्करे
न केऽपि गन्तुं प्रभवन्ति निर्जराः।
मयैव सर्वत्र भृशं प्रपीडिताञ्-
जनान् समुद्धर्तुमकारि सत्पथः ॥३२॥

सुमत्कमार्गोऽस्ति प्रकीर्णकण्टको
न कैरपि व्रज्यतमः सुदुःसहः।
त्रिलोकलोकेषु भवाम्यहं सदा
समग्रणीर्दुःखसमुद्रतारकः ॥३३॥

समन्ततो दुःखसमुद्रपातितान्
प्रचण्डवैषेण विलोक्य सोत्सहः।
विचित्रदृश्यैः सुतरां समुन्नतो
ह्यतःपरं सर्वमपि प्रहापितम् ॥३४॥

क्षणं विरम्यैव तदा स शङ्करो
व्यचारयत् कार्यदिशां स्वकां खलु।
विचित्रबुद्ध्या सुविचारतत्परं
मनःसमाधाय पुनर्व्यलोकयत् ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अदम्यहालाहलरुद्धजीवनाञ्-
जनान् समुद्धर्तुमहो ! समुद्यतः ।
असंख्य जीवान् सुसमीक्ष्य वेपितो
जनान् सुपातुं प्रबभूव धूर्जटिः ॥३६॥

अदृष्टपूर्वं विविधं कुदृश्यकं
शनैः शनैर्दष्टिपथे समागतम् ।
समीक्ष्य सूग्रो नितरां जगद्गुरुः
प्रवृत्त उग्रातिविचित्रकर्मणि ॥३७॥

असख्यजीवान् गरपीडिताँस्तदा
सुदुःखितान् प्राणहरेण वायुना ।
दिवानिशं प्राणहरस्य चिन्तया
युतान् विलोक्येश उवाच तान् प्रति ॥३८॥

भयङ्करेणैव विषाग्निना हतान्
सहायताप्राप्तिकृते समुद्यतान् ।
विभिन्नजीवान् सुतरां समीक्षको
रुद्रः स्वयं प्राप्त उदग्रभूमिकः ॥३९॥

अहं हि विश्वस्य समस्य दुःखहा
स्थितेर्हि सम्पूर्णतया विचारकः ।
प्रधान एकोऽस्मि जगत्त्रये शिवो
न कोऽपि दुःखार्णवतारणे क्षमः ॥४०॥

असह्यदुःखेन निरन्तरं युतान्
कृतान्तवक्त्रे हि शरीरदायिनः ।
मदन्य एकोऽपि समातुराञ्जनान्
सुपातुमर्होऽस्ति कदापि कर्हिचित् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोऽहमेतर्हि विषं पिबामि भो
न कोऽपि मां रोद्धुमलं भवेदिह।
विषस्य पानान्मम शक्तिवृद्धितो
ह्यसह्यदुःसाध्यविषस्य मर्शिता ॥४२॥

न मेऽस्ति कश्चिद्विभवो जनार्तिदः
परः स एवाऽस्मि निधिर्जनाविता।
अतोऽहमत्रैव सुकर्मणि प्रिये
प्रवृत्त आनन्दविधायके विधौ ॥४३॥

अनन्तरं तत्क्षण एव शङ्करः
समस्तजीवाद्यवने दृढव्रतः।
कारुण्यपूर्णोऽतिकरालकं विषं
करे समादाय सुखं स पीतवान् ॥४४॥

शनैः शनैः पीतविषे महामुनौ
विदूरदूरस्थितजीवबान्धवा।
मही महिम्ना परेश्वरस्य तद्
बभूव सत्यं चलसत्त्वसंयुता ॥४५॥

तदैव सर्वत्र विषस्य वाहकः
श्चराचरप्राणहरः प्रभञ्जनः।
विषे प्रपीते स्वकमित्रभञ्जने
प्रशान्त आसीच्छिवशक्तिवेपितः ॥४६॥

ततस्तु सङ्गृह्य विदूरसंस्थितं
तडागसंस्थञ्च पुरः प्रकम्पितम् ॥
समस्तमप्यत्र स पीतवान् गरं
सहायतार्थं हि विपत्तिखिद्यताम् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषं प्रशान्तं कृतवान् कृपानिधि-
स्तस्मिन् प्रशान्ते सकलाः प्रशान्तकाः ।
अहो ! अनन्तस्य कथाऽस्त्यनान्तिका
जगत्त्रयस्यैव कृतेऽस्ति चाद्‌भुता ॥४८॥

सहायताहेतुविदूनचेतसः
समेऽपि जीवाः सुतरां समेधिताः ।
प्रहर्षरोमाञ्चितविग्रहास्तदा
सुखोत्सवं चक्रुरदीनमानसाः ॥४९॥

समुद्रवापीस्थितमीदृशं विषं
हठाच्च पीत्वाऽखिलदेव ईश्वरः ।
व्यधत्त सर्पैः स्वगणैश्च ताण्डवं
प्रदृश्य सर्वेऽतिसुखेऽतिशेरते ॥५०॥

प्रचण्डहालाहलपानकर्मणि
समस्तमेवाङ्ग ! समश्नुवाञ्छिवः ।
गरीयसामर्थ्ययुतेन तेन तु
जाता शिवस्यैव गले सुनीलता ॥५१॥

इतस्ततःक्षिप्तविषस्य ग्राहकाः
ससर्पकाः प्राणिविशेष भोगिनः ।
गृहीतवन्तो विषविन्दुकान् बहून्
तेनैव जाताः सकलास्त उद्धताः ॥५२॥

तदाऽभवन् सौम्यसुखावहानिला
निशाश्च सौन्दर्यगुणैः सुशोभिताः ।
चलाचलानां च कृते सुवासरा
जाताः क्षणात् सर्वमनोहराः खलु ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुरासुरज्येष्ठतमेन शूलिना
गरे प्रपीतेऽपि स पूर्ववद बली।
स्थितः प्रशान्तः सुरसङ्घहीरकः
सुरारिभिश्चापि मुहुर्मुहुर्नतः ॥५४॥

समस्तविश्वस्थितजीवसंहति-
स्तदाऽभवत्सौख्यसहस्रसंयुता।
जगत्त्रयं पूर्ववदेव सम्प्रति
सुकोटिशान्तिं पुनरप्यलब्धवत् ॥५५॥

विशालविश्वं हि विषघ्नपूर्वकं
पीते गरे विस्मयकारिशङ्करात्।
सहैव शान्ते भयदे प्रभञ्जने
विनष्टदाहाभिरभूयत क्षणात् ॥५६॥

कठोरहालाहलदीप्तवह्निना
प्रभञ्जनप्राप्तबलेन गर्विणा।
न भस्मभूतं त्रिजगद्यथायथं
स्थितं यथा पूर्ववदेव सज्जनाः ॥५७॥

तदत्र देवाधिपदेवदेवकः
समस्तविद्यादिकलागुरुर्भृशम्।
प्रमाणभूतोऽस्ति महेश्वरो महान्
सुरक्षितास्तेन सुरासुरादिकाः ॥५८॥

स हेलयैवं प्रपपौ गरं दृढं
समस्तदेवादिविलोकिते क्षणे।
विषे सुपीते सकले समन्ततो
गलेऽभवच्छाश्वतिकं विभूषणम् ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदैव कर्पूरवदेव वर्णको-
ऽपि नीलकण्ठो ह्यभवद्विभुः खलु।
क्षमोऽप्यमुं पूर्ववदेव शुक्लकं
गलं प्रकर्तुं न तथाऽकरोत् प्रभुः ॥६०॥

इहैव चैतिह्यपुराणशास्त्रके
महत्त्वपूर्णेऽखिललोकमङ्गले।
यथार्थतादानकृते जगद्भुवा-
मत्यन्तमावश्यकतां न मुक्तवान् ॥६१॥

समुद्रमन्थेऽभवदाकुलं जगद्
विषस्य वेगेन समिश्रवायुना।
जगत्त्रयं व्याप्तविषं कृतं खलु
मयैव संरक्षितमद्य तत्सुखि ॥६२॥

ममेदमैश्वर्यमनन्तविश्वके
संवर्तते स्यान्न विलुप्तिमस्य तु।
गलस्य नीलत्वविनाशनेऽप्यहं
न लग्न ऐतिह्यविलुप्तिकर्मणि ॥६३॥

इयञ्च वार्ता जनसङ्घवर्णिता
पुनः पुनः श्रोत्रपथं विकर्षति।
समर्च्य विघ्नेशमितः प्रमन्थनं
प्रवर्त्यतामित्यवदन् सुरासुराः ॥६४॥

आचार्यप्रभपूर्णचन्द्ररचिते विद्वन्मनोग्राहिणि
सच्छास्त्रान्वितसौम्यमुग्धरचनायुक्ते सतां तोषिणि।
सर्गोऽयं वसुसोमसंख्यक इतः पूर्णो ग्रहेन्दुं पुन-
र्दर्शं दर्शममुं सुकाव्यरसिकास्तुष्यन्तु देवाधिपात् ॥६५॥

॥ इति अष्टादशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकोनविंशः सर्गः

(देवासुरैर्गणेशपूजनपूर्वकं पुनः प्रारब्धमथनवर्णनात्मकः)

शेमुश्च सोत्पातभवा उपद्रवा
विषे प्रपीते निखिलाः प्रपीडकाः ।
अनन्तसंख्या अतिकष्टकारका
अहो ! वयं धन्यतमा महाभगाः ॥१॥

अहोऽहमत्रैव विचारनिश्चये
स्थितोऽस्मि चैतिह्यसुरक्षणे क्रमे ।
गले पुनः शुक्लकृते च निश्चितं
विनाशितं स्यादितिहासगौरवम् ॥२॥

इतो दिनादेव सदाऽहमत्रके
जगत्समस्ते खलु नीलकण्ठतः ।
नाम्ना प्रसिद्धः प्रभवामि सर्वथा
एतस्य नाम्नः सुमहत्त्वमस्ति यत् ॥३॥

अकर्तुमोऽङ्कर्तुमथोऽन्यथाकृतौ
शक्तोऽस्ति कैलाशपतिर्जगद्गुरुः ।
न शक्त ईशादपरः कथञ्चन
रहस्यमेतद्धि पुरः प्रकाश्यते ॥४॥

सुरासुरा मानवजीवजातिका-
श्चराचराः स्थावरजङ्गमादिकाः ।
समस्तजीवा मदभिन्नरूपका
मदंशजाता न तिरोहितं क्वचित् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिलोकलोकैः सचराचरैः खलु
मदीयमेतत् कथितं विचार्यताम्।
यथाऽहमासं विषलब्धितः पुरा
तथैव शुक्लेन गलेन संयुतः ॥६॥

पुनर्न तादृग् भवितुं न संयते
यथास्थिति स्थातुमहं प्रकामये।
सदा तदैतिह्ययथार्थरक्षणे
दृढो भविष्यामि न चात्र संशयः ॥७॥

अतस्तु नैवाऽहमिदं विभूषणं
न नीलकण्ठत्वविनाशने युतः।
सदैव सर्वत्र ममेदमाह्वयं
प्रसिद्धमस्त्वेवमहं विभावये ॥८॥

इतः परं देवनरासुरारयो
वदन्तु मां सस्पृहया निरन्तरम्।
स नीलकण्ठोऽस्ति सदा समुत्कटे
भयंकरे कर्मणि सर्वरक्षकः ॥९॥

विधाय चैतिह्यविशिष्टकृत्यकं
सुरासुरान् रक्षितवान् सदा शिवः।
अनन्तरं ते हि सदैव निष्ठया
तं नीलकण्ठं प्रणमन्ति सादरम् ॥१०॥

स नीलकण्ठो भगवान् महेश्वरो
विख्यात आनन्दकरो जगत्त्रये।
सुशोभते ज्येष्ठतया दिवौकसां
न तत्समो नाप्यधिकोऽस्ति कश्चन ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो विचित्रं विबुधर्षभस्य तद्
विमृष्य सर्वातिशयप्रकर्षकम् ।
सुरा नरा दानवराजगुह्यका
मुहुर्मुहुर्नम्रशिरस्कतां ययुः ॥१२॥

अलौकिकं वीक्ष्य शिवस्य वैभवं
ह्यनन्यसाधारणमद्भुतं महः ।
नताननां धिक्कृतनैजविक्रमाः ।
सर्वेऽपि ते जीवगणा विकम्पिताः ॥१३॥

सुरासुराधीशसहस्रशस्तदा
सुरम्यमाधुर्यगुणप्रकर्षजैः ।
स्तवैः समेताः स्तुतिपङ्क्तिमालिका-
प्रकोटिकोट्या समवर्णयञ्छिवम् ॥१४॥

विलेशयैर्हे शिव ते निरन्तरं
विचित्रवात्सल्यसुखं प्रकाम्यते ।
चितानलप्लुष्टविभूतिरञ्जनं
कृताषभिषेकेऽर्पितदिव्यमौषधम् ॥१५॥

प्रमन्थघर्षेण समुत्थितं विषं
प्रचण्डदुर्धर्षतरं व्यथादिदम् ।
विचित्रसम्पर्कितधृष्टवायुना
प्रकम्पितः प्राणिसमूह आहतः ॥१६॥

मया कदाचिद् बहुदुःखदं पुरा
दृश्यं न कुत्राऽपि च हीदृशं बुधाः ।
दृष्टं सुसत्यं प्रवदामि सम्प्रति
अहो ! इदानीं कथितं यथास्थितम् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरीक्ष्य विज्ञाय च घोरपीडितान्
जनान् समुद्धर्तुमहं प्रजाग्रतः ।
पुरस्थितश्चाऽस्मि विषघ्नचेतसां
सुरक्षितानां हतमूढतावृताम् ॥१८॥

दयार्द्रभावाद् गहने भयङ्करे
प्रवृत्त एवाऽस्मि भवत्पुरःस्थितः ।
अलौकिकं दुर्विषहं सुतीक्ष्णकं
पीत्वा मया कार्यमिदं कृतं शुभम् ॥१९॥

अहं न शक्नोमि सुपीडिताञ्जनान्
समीक्षितुं काँश्चिदपि त्रिलोकके ।
विलोक्य जीवान् शततं सुदुःखितान्
तदुद्धरे कर्मणि मे हठाद् गतिः ॥२०॥

समुद्रमन्थेन समुद्भवान् मणीन्
सम्प्राप्य सौख्यार्णवमग्नमानसाः ।
सुरासुराः सौख्यधनाः निरन्तरं
सुतीक्ष्णता चोपहता विषोद्भवा ॥२१॥

न कोऽस्ति मादृग् विबुधेषु कुत्रचित्
गम्भीरदुःखे पतितान् समुद्धरेत् ।
ममैव कर्तव्यमिदं सुनिश्चितं
विषं प्रचण्डं विनिपीय रक्षणम् ॥२२॥

सदैव तृप्तोऽस्मि कदापि किञ्चन
पदार्थजातं न लसामि कर्हिचित् ।
समस्तवस्तूनि वितीर्य सम्प्रति
दिगम्बरो जात इतीह सत्यकम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुतीक्ष्णहालाहलरुद्धजीवनान्
करालकालस्य मुखे समागतान् ।
असंख्यजीवान् प्रसमीक्ष्य दुःखितः
सुरासुराधीश उवाच तान् प्रति ॥२४॥

अतीव चण्डेन विषेण मूर्छिताः
सहायताप्राप्तिकृते सुचिन्तकाः ।
अनेकजीवाः पतिताः सुदुःसहां
स्थितिं विलोक्यैव दयापरोऽभवम् ॥२५॥

तदैव जीवा विषसक्तवायुना
प्रकम्पिता मूर्च्छितभिन्नजातिका ।
सहैव शान्ते मृतिदे प्रभञ्जने
विनष्टदुःखा अभवन् सुरासुराः ॥२६॥

यतोयतो वायुरयः प्रवर्तते
ततस्ततः प्राप्तविषादपीडिताः ।
विषेण तीव्रेण सवायुना हता–
मुमूर्षवोऽन्तःस्थितिसन्निधिं गताः ॥२७॥

विषाक्त वायुर्दिशि यत्र सङ्गत–
स्तदीयगन्धेन च रुद्धनिःश्वसाः ।
चराचरप्राणिसमूह उत्पत–
न्निपातकाले तु समूर्च्छयाप्लुतः ॥२८॥

अहो ! अहो दर्शकवृन्दमाहतं
कथं कथङ्कारमिदं सुरक्षितम् ।
समीक्ष्य सर्वानितिदुःखसंवृतान्
विचित्रताबद्धदशां समागतान् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विलक्षणं वीक्ष्य भवस्य पौरुषं
सुरासुरोदग्रतरं समद्भुतम् ।
मुहुर्मुहुर्ध्यानपरा विवेकिनो
न शेकुराश्चर्ययुताः सुवेदितुम् ॥३०॥

अतिप्रचण्डेन गरेण मूर्च्छितान्
सहायतायै सततं विचिन्तकान् ।
अनेकजीवान् पतितानसह्यतां
सुवीक्ष्य तन्नाशयितुं व्यचिन्तयत् ॥३१॥

अहं हि विश्वस्य विचित्रदुःखद-
स्थितेर्हि साकल्यतया निवारकः ।
एकोस्मि नाऽन्योऽस्ति मदन्य उद्धरो
ह्यतोऽहमद्यैव विषस्य नाशकः ॥३२॥

ततस्तदाऽसौ भगवान् महेश्वरः ।
करालकालस्य मुखाद् विमोचने ।
वृतः स तेषामतिकष्टजीविनां
समस्तदुःखार्णवनाशने दृढः ॥३३॥

ततोऽन्तिकस्थाः सकला विखेदिता-
श्चराचरा जीवजगत्समावृताः ।
भयङ्करान्मृत्युमखात् पृथक्कृताः
सहायतालब्धिनिमित्तमाकुलाः ॥३४॥

तदैव सर्वत्र विषस्य वर्द्धक-
श्चराचरप्राणहरः प्रभञ्जनः ।
विषस्य संसर्गयुतोऽपि तत्क्षणात्
प्रशान्त आसीद् विकटोऽप्यसौ तदा ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुद्रमन्थप्रभवं सुभीषणं
समस्तमेवेदमभक्षयच्छिवः ।
तदस्य हालाहलपानकालिकं
क्षणे तदा हस्ततलाद् बहिः सृतम् ॥३६॥

विषं समस्तं प्रपपुर्विषैषिणः
ससर्पजीवाः सकलाश्च भोगिनः ।
तदाऽभवत् सौम्यसुखावहं दिनं
निशाश्च सौन्दर्यगुणैः सुखप्रदाः ॥३७॥

समस्तदेवासुरलोकिते क्षणे
स देवदेवः प्रपपौ हलाहलम् ।
एवं सुपीते सकले विषानले
नीलो गलो मङ्गलसूचकोऽभवत् ॥३८॥

सुरासुरज्येष्ठतमः सदाशिवो
गरे प्रपीतेऽपि तथैव शक्तिमान् ।
स्थितः प्रसन्नः सकलैः प्रपूजितो
विचित्रशक्तिः परमेश्वरो हरः ॥३९॥

सुरासुरेन्द्रस्य शिवस्य पौरुषे
विनष्टसंज्ञाः परितः प्रसर्पिताः ।
सहस्रशो जीवविशेषमूर्धजाः
शिवस्य हालाहलपानमोहिताः ॥४०॥

अलं विषोत्पत्तिकथा प्रकीर्तना-
दलं विषाद्धीनदशाविवेचनात् ।
अलं पलाय्यैव गतस्य चर्चना-
दलञ्च लोकस्य मुदः प्रवर्णनात् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इयं हि वेला जगदीश्वरस्य सा
सुकीर्तिसंख्यानकृते सुयुक्ता ।
बुधा भवन्तो नितरां प्रवृत्तिगा
भवन्तु नूनं न कदापि पृष्ठगाः ॥४२॥

पुराऽब्धिमन्थे हि सुसङ्गता जनाः
सुरासुराः पूर्णतया मथे वृताः ।
समुद्रमन्थस्य कृते ह्यपेक्षिताः
पदार्थमुख्याश्च पुनः समाहृताः ॥४३॥

सम्पूर्णतायुक्तविधौ प्रमन्थके
प्रवर्तितव्यं सकलैश्च सम्प्रति ।
न कालपातः कुशलाय कर्हिचित्
सर्वैर्बुधैस्तत्परतैव सेव्यताम् ॥४४॥

पूर्वं परित्यक्तमपि प्रपूजनं
कृत्वा गणेशस्य विधानपूर्वकम् ।
भूयो विलग्ना मथने सुरासुराः
समानभावा बहुरत्नलोभिनः ॥४५॥

कस्यापि जीवस्य कदापि कर्हिचि-
दाकाङ्क्षितार्थस्य समस्य पूरिका ।
दृष्य न काऽपीति विशिष्टशक्ति-
स्तथापि तैः स्वीकृतमन्थकार्यम् ॥४६॥

आचार्यप्रभपूर्णचन्द्ररचिते काव्याङ्गपूर्णेऽमले
काव्येऽस्मिन् शिवकृत्यवर्णनपरे भूयो मथारम्भकः ।
रत्नप्राप्तिनिमित्तकौतुकयुतैरेकोनविंशो व्यगात्
विंशं चैव पुनर्बुधाः प्रपठनात्तुष्टा भवेयुः शिवात् ॥४७॥

॥ इति एकोनविंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विंशः सर्गः

(सामुद्रतीव्रविषतप्तस्थावरकृतशिवस्तुतिवर्णनात्मकः)

वयं स्थावराः कानने वर्द्धमाना-
स्त्वयोत्पादिताः पालिताः स्मः ससङ्घाः।
इदानीमनेका असङ्ख्या बलिष्ठाः
प्रजाता दृढाः सर्वशैलादिभूषु ॥१॥

भेदा विंशतिलक्षकास्तरुलतागुल्मादिका मञ्जुलाः
सम्पूर्णेषु जगत्सु सुस्थितियुता अज्ञानिनस्ते वयम्।
रक्षां प्राप्य सदैव तुष्टिसुखदां त्वत्तो विभो शङ्कर
भूयो भूय उदारभावसहितं रक्षाकरं त्वां नुमः ॥२॥

सदैव वयं कृमिकीटपतङ्गा
दयालव एकलक्षयुता दशलक्षाः।
सुविस्तृतवंशयुता मृदुलाश्च
त्वदीयसुरक्षणश्रिताः शरण्याः ॥३॥

निरन्तर-मस्तक-लग्नविपत्ती-
नहंहमिकासहिता भगवान् हि।
भवान् सततं हरतीति न शङ्का
वयं नतमस्तकका नमामस्त्वाम् ॥४॥

सन्तानैः सह सदा मत्स्यकूर्मनक्राः
सानन्दा वत नवलक्षसङ्ख्यकाः प्राक्।
वर्धिताऽनवरतं वयं सदैव
विश्वरक्षकगिरिशं मुहुर्नतास्त्वाम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेदानामतिशयितं प्रवर्धमानैद्रौग्
वृद्धिं प्राप्तजलजाः सर्वबन्धुवर्गाः ।
एतर्हि प्रकृत–भवतां कृपास्त्रा–
द्रक्षाप्ता अतिसुखास्त्वां नमामः ॥६॥

बहुविधाः पक्षिणो वनवापिश्रिता वयं
स्वसुतासुतादिरक्षणवृता दशैव लक्षाः ।
सपदि वयं सुभीषण–विषस्य तापतोऽ–
वनलभा दुःखहरकात् स्मरहरादविताः ॥७॥

चटक–कपोत–कीरसहिता अनेकशः
शशरिपुताप–काक–पिक–गृध्रवनजाः ।
उभय इहत्यका दशलक्षका वयं
सकलगुरुं शिवं प्रति नताः सदैव भृशम् ॥८॥

सततमहो बलिष्ठ–पतगस्य पीडनात्
प्रतिहतकायका भयशतैः सदाकुलाः ।
कथमपि जीविता विषभयात् सुरक्षिताः
प्रतिविपदं प्रभोऽनवरतं सुरक्षतु ॥९॥

ग्रामीणा गोमहिषाः खरहुडाश्व–गोऽश्वप्रभृतिका
वन्या भीतिप्रदाः सिंहगजवृकाद्याः खड्गसहिताः ।
देवेश ! विश्वेश्वर ! रक्षणजसुकृपया सञ्जीवितबलाः
त्रिंशल्लक्षा बहुसुखिनो वन्दामहे त्वां प्रभो ! ॥१०॥

कीशा नाना चतुर्दशलक्षविधय इह सन्तानैरधिकनता–
स्तीव्राद् वाताद् वयं श्रीमता मुदितकृपाऽस्मान् पावितवती ।
रक्षाकार्ये भवान् वै सततनिरत ईशस्त्वां प्रति नताः स्म–
स्तेनैवात्र प्रदेशे प्रतिदिनभगवतो दयाभावरक्षा वयम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं कुत्सितमानसानां फलैस्तैः
प्रजाता नरा भारवाहाः सदैव।
समे शिक्षया शून्या भूता इदानीं
कृतान्तेन तुल्येन विषेण दग्धाः ॥१२॥

सुराणां स्वामिना श्रीमता सम्प्रति
विषे ह्याशिते नष्टदुःखास्तदत्र।
वयं निष्ठापरास्त्वां नमामोऽनिशं
नमामो रक्षिता सम्प्रति स्वामिनम् ॥१३॥

भूतप्रेताः पिशाचाः सत्यं वयं देवतुल्या
देवानां सर्वदैवाऽधिकतरं सदा तं पूजयामः।
विश्वब्रह्माण्ड–संस्था येनैव संरक्षिताः स्मो
देवानां योनयः पूर्वस्थानलब्धाः सुगुप्ताः ॥१४॥

अहो भाग्यवन्तो वयं भाग्यवन्तो
महादेवदेवेन रक्षा कृताः स्मः।
समेषां शरीराणि पुष्टानि नासन्
अनेकाश्च तहा ! वै दिवं सङ्गतास्ते ॥१५॥

नमामो वयं तं नमामो वयं तं
स्मरामो वयं तं स्मरामो वयं तम्।
कृतं तेन सर्वं कृतं तेन सर्वं
कृतं तेन सर्वं कृतं तेन सर्वम् ॥१६॥

जनाः प्राणिताः प्राणितास्तेन सर्वे
जना जीविता जीवितास्तेन सर्वे।
प्रचण्डं विषं तेन पीतं समस्तं
गलस्तस्य जातः सुकृष्णः सुकृष्णः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्ता आराधकाः पूजाकारिण आस्माकाश्च
सैश्वर्यायुर्धृताः पृथ्वीगामिभिरत्र श्रितास्ते ।
पूर्णाकाङ्क्षाः सर्वथा सन्तानैश्च युक्ता भवन्ति
दत्तैरस्माभिरत्यन्तं द्रव्यभेदैः सुपूर्णाः ॥१८॥

ऐश्वर्यार्थं समस्ता व्यापारिणः प्रायशस्तेऽ-
स्माकं रम्यामुपासां कृत्वैव स्वाढ्या भवन्ति ।
भौमाः प्राणिप्रधाना नित्यधन्याः समस्ताः
ये देवानां सुदेवमधिकतरं मृत्युञ्जयं सन्नमन्ति ॥१९॥

धर्मप्राणा इदानीमस्माकमत्र सम्यक् प्रणामं
कुर्वन्त्येव ते देवदेवस्य नित्यं प्रपूजाम् ।
सन्दृश्यन्ते सदा ते सुसम्पन्ना गार्हस्थ्ययुक्ताः
प्राजापत्याः प्रवीणाः कीर्तिश्रिता मञ्जुलाश्च ॥२०॥

विश्वेदेवा दशाख्यास्ते स्मः सदा श्राद्धदेवा
आदित्याद्या दशैते प्राकाश्ययुक्ताः समन्तात् ।
अन्ये गण्याः सदैव स्वाम्येन पूज्याश्चरैश्च
श्राद्धे यागे समस्तैर्नित्यं समाराधनीयाः ॥२१॥

एते गणदेवा गण्या गणनया
ह्यस्मान्प्रति नित्यं शिवदस्नेहाः ।
आशीस्तदनुप्रभुरेकोऽस्ति शिवोऽसौ
सर्वत्र समस्ता देवा वयमीशाः ॥२२॥

आदित्यादिविविधसाध्यान्ता
विख्याता नवसमुदायस्थाः ।
शूलिन् वयममराः ख्याताः स्मो
नित्यं त्वां प्रति नतमूर्धानः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतर्हि प्रचण्डाद् वैषादविता द्राक्
तापच्छिवशक्त्यैवात्र समविताः ।
विषान्निजस्यैश्वर्यस्य व्ययकार्यात्
सर्वे वयं मृत्युतो रक्षिततमाः ॥२४॥

एतादृशा इत्थम्भूता वयमत्र
भूतेशकृपां प्राप्य प्राणितवन्तः ।
नित्यं सुखिनः स्मो रुद्रस्य दृष्टे-
रेष त्रिदेवेशो नम्योऽस्ति विषपाः ॥२५॥

प्रभो शूलपाणिन् समस्तस्य पात-
स्तवैवाऽज्ञयाहं जगत्सृष्टिकर्ता ।
स्वकीयेऽत्र कार्ये सदैवाऽस्मि लीनः
कदापि त्वदीया समाज्ञा न त्यक्ता ॥२६॥

भवेत् सर्वथाऽवश्यपाल्यैव कीर्ति-
रिदानीमकस्मात् प्रजातोच्चतीव्रात् ।
विषात् पीडिता द्वाःस्थिता रक्षितास्ते
ततस्ते समे सर्वथा त्वां नता द्राक् ॥२७॥

सदा सर्वदा रक्षणीयाः समस्ता
अविच्छिन्न-वात्सल्यभावेन सर्वे ।
प्रयुक्ता भवेयुः सदाऽऽद्यैव भूमन्
नमस्यो नमस्यो नमस्योऽस्ति शूलिन् ! ॥२८॥

विश्वस्य रक्षाकरणाय सर्वथा
पूर्वं नियुक्तो भवता सदा दृढः ।
तत्रैव निष्ठासहितश्च तत्पर
एतर्हि पीडादविषेण कम्पितः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदेशलाभाय रतोऽनिशं स्वतो
विष्णुस्त्वयं भिन्नस्वरूपधारकः।
नानारिसम्यग्दलने प्रवृत्तिमा-
नातङ्कभीतिप्रदजीवनाशने ॥३०॥

जागर्मि नित्यं प्रणतश्च तावकः
श्रीमन्निदेशः सततं सुपाल्यते।
वैषस्य दोषस्य निवर्तको भवान्
रात्रिन्दिवं त्वां प्रणतोऽस्मि सम्प्रति ॥३१॥

स्वर्गस्य राजाऽस्मि पुरः पुरन्दरो
यज्ञीयकार्येषु रतः सदा प्रभो।
श्रीमत्सु सेव्येषु निरन्तरं नतो
देवैश्च सर्वैः सततं पुरस्कृतः ॥३२॥

सामुद्रवैषेण हि सर्वथा हता
ह्येतर्हि संरक्षितजीवसंहतिः।
त्रैलोक्यसंस्थाः सकलाश्च जीविता
समस्तजीवैर्न हि विस्मृतो भवान् ॥३३॥

श्रीमन् सदा स्मर्यत आनतैर्भृशं
तथ्यं विभो धीरचया विजानते।
आनन्दलीनाः सहजङ्गमास्थिरा-
स्त्वामीडते शुद्धहृदा सदाऽऽनताः ॥३४॥

त्रयस्त्रिंशत्कोटि-सुतदिविषदोऽमर्त्यसकला
वयं प्रायः शान्ता अतिशयरयेण प्रमथनात्।
अकस्मात् सञ्जाताद् विषमगरलाद् दग्धवपुषो
भवन्तं दैवाद्यं विषहरविभुं सम्प्रति नताः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शम्भो हाहाहुहूकाद्या अनेके,
गन्धर्वाज्जाता वयं गायकास्ते।
गीतौ नृत्ये वादने लग्नचित्ता
देवान् सर्वान् रञ्जयामः सदैव ॥३६॥

देवान् दैत्यान् मानवान् प्राणिनोऽत्र
नित्यं युक्ताः स्वीयकार्ये समन्तात्।
देवादीनां रञ्जने मानसानां
सर्वे नित्यं तत्पराः स्वीयकार्ये ॥३७॥

द्यावाभूमिप्राणिनो गानलीनाः
पूर्णा नित्यं दृश्यमाने सदैव।
गाने नृत्ये सज्जिता देवमुख्या
नित्यं घस्रान् लीलया यापयन्ति ॥३८॥

नृत्यैर्गीतैर्वाद्यजातैश्च नित्यं
मोदेनैवं लीनदेहाः सदैव।
सम्प्रत्येव स्वर्ग्यदेवेषु शक्तो
ह्यस्मान् शीघ्रं कालकूटादमोचत् ॥३९॥

सर्वत्रैवालौकिकं कार्यमित्थं
कृत्वा सर्वोच्चत्वं लब्धवान् द्राक्।
तस्यैवैश्वर्यं तदा वीक्ष्य हृष्टै-
रस्माभिर्नोनूयते सर्वथा सः ॥४०॥

सुमूर्च्छां सम्प्राप्तास्तदशनविकर्त्राऽत्रभवता
स्वतः सम्यक् त्राता रिपुभविषपातादतितराम्।
सपुत्राः पौत्राद्याः सततसुखिनः सम्प्रति वयं
पुनः पूर्वस्थित्याऽधिकतरसुमोदेन सहिताः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं दानवाः पूर्वदेवा इदानीं
समुद्रस्य मन्थे वृताः सद्विचाराः।
प्रमन्थे स्वकार्येऽत्र शम्भो! विचित्रे
ह्यकस्माद् विषं कालकूटं प्रजातम् ॥४२॥

प्रकम्पे स्वकार्येऽत्र शम्भो विचित्रे
ह्यकस्माद् विषं घोररूपं विजातम्।
वयं कां दिशं याम इत्येव चिन्तां
प्रकुर्वन्त इत्थं स्थिताः कञ्च कालम् ॥४३॥

विषं पीतमत्रैव सञ्जीविताः स्म-
स्त्वया श्रीमता विश्वपात्राऽधुना द्राक्।
वयं त्वां स्मरामो वयं त्वां नमामः
सुनीता वयं सर्वथा सर्वसौख्यम् ॥४४॥

सदा सर्वदा त्वां भजामो भजामो
यतः सर्वतोषेण युक्ता भवामः।
इतोऽग्रे कदाचिद् भवेद् दुःखमेतत्
त्वदीयां सुचिन्तां करिष्याम इत्थम् ॥४५॥

देवा दैत्या मानवाः प्राणिनोऽत्र
नित्यं युक्तां स्वीयकार्यप्रभेदे।
देवादीनां रञ्जने सम्प्रवृत्ते
सर्वे लीना विस्मृतस्वीयकार्याः ॥४६॥

गीतिक्षेत्रे प्राणिनो गानलीना
गाने पाने रञ्जिता देवमुख्याः।
वयं किन्नराः श्रीशदूता अनेके
धनाध्यक्ष-यक्षस्य कार्ये प्रलग्नाः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वसामोऽलकायां भृशं रम्यपुर्यां
सदा सौम्ययुक्तास्तथोत्कर्षलब्धाः ।
श्रुतं सम्प्रति श्रुत्ययोग्यं विचित्रं
वचो वैषशत्रुस्थितं भीतिदातृ ॥४८॥

तदस्याऽस्य नाशाय शम्भोः प्रवृत्ति-
स्तदात्रैव दृष्टा ऽ तिभव्या सशक्तिः ।
विषं भक्षयित्वा कृता विश्वरक्षा
ततः सर्वजीवा विनष्टाऽपदस्ते ॥४९॥

विषेणाऽभिभूतस्य विश्वस्य हेतोः
कृतं शम्भुनाऽलौकिकं कार्यमेतत् ।
प्रमाणं सदा कुर्म एतं विशिष्टं
सुराणामपि त्रायकं देवदेवम् ॥५०॥

अनेनैव सर्वे त्रिलोकस्थजीवाः
सदा रक्षितास्त्वां नता स्मो वयं द्राक् ।
कदाचित् कथञ्चिन्न जायेत हीदृक्
सदोत्तारिता नः सदोत्तारिता नः ॥५१॥

दिक्पाला स्मो लोकरक्षापरा वै
स्वर्गीयाणां सर्वदा योगदाने ।
व्यग्राः सन्तो जायमानाः समस्ताः
सृष्टेन्द्राद्यानन्तकान्ता वयं ते ॥५२॥

श्रीमन् रक्षाव्यापृतस्त्वं सदैव
भाग्यप्राबल्याद् वतास्माभिरित्थम् ।
साहाय्यं प्रलब्धं भवत्तः सुरम्यं
देवानां देवेश ते सन्नमामः ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृत्युप्रदात्रा सुदुःखस्य दात्रा
तप्ता अत्यन्तं विषेणैव पालाः ।
नित्यं लीलाभिर्दिनानां यापकास्त्वं
संयोगेनैव श्रीमान् दृष्टिकोणे प्रयातः ॥५४॥

सर्वेषां स्वं रिक्थभूतः सुरेशो
गौरीस्वामी कालकालः सदैव ।
सर्वं कर्तुं तत्परः प्राणिसङ्घेऽ-
स्माभिर्नित्यं नम्यते श्रद्धया द्राक् ॥५५॥

खगोलगोले च निरन्तरं स्थिताः
परस्परं जातिनिजत्वसंयुताः ।
वयं महादेवकृतां जगत्स्थितिं
नितान्तसम्पालनतत्परा ध्रुवम् ॥५६॥

त्रिलोकशून्यत्वकरस्य ध्वंसिनो
विषस्य सम्पायिविभुं नता वयम् ।
तमिस्रहाब्जप्रभृतिग्रहाः सदा
रमामहे जीवसुखस्य कारकाः ॥५७॥

वियत्स्थिता राशिभतारकादिका
नभोऽवलम्बाः स्थिरराशिकाः सदा ।
त्रिलोकजातेषु समस्तजन्तुषु
भविष्यभूतादिकवार्तमानके ॥५८॥

शुभाशुभं सर्वविधं फलादिकं
प्रकाश्य सर्वस्य हितं प्रकुर्महे ।
यदा वयं मार्गितया स्थितास्तदा
ध्रुवं फलं रम्यतमं प्रजायते ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विमार्गगा नीचतया स्थिता यदा
तदा फलं नैव शुभं भवेत् खलु।
ग्रहीययागे प्रकृते जनैर्भृशं
तदा वयं राष्ट्रसुखस्य कारकाः ॥६०॥

समस्तवस्तूनि प्रदद्महे स्वयं
जगत्–स्थितानि प्रबलानि कान्यपि।
गिरीशनिर्देशनकालका वयं
सदैव तस्यैव शरण्यमागताः ॥६१॥

सर्वस्य नाशाय समुद्यतस्य तद्
विषस्य सन्तापविदूरकारिणः।
शिवस्य सौख्यप्रददुःखहृत्कृपा
त्वियं सुबेलास्ति सुखावहा खलु ॥६२॥

शिवेन तीव्रं विषमद्भुतं दृढं
सुखेन पीतं जगतीत्रये गतम्।
अतः समस्ताः सुरदानवादिकाः
स्वपन्तु सम्यक् सुतरां निराधिकाः ॥६३॥

नायकेनाऽऽवृतैराश्विनेयान्तकैः
पञ्चसङ्ख्यान्वितैर्लोकपालैर्भृशम्।
विश्वरक्षाकृते योगदाने दृढो
देवदेवाधिपः सर्वथा नम्यते ॥६४॥

शत्रुभूतेन तीव्रेण वैषेण नः
हानयः प्राक्कृता नैव दूरे गताः।
सन्ततं सर्वथा एष एव ध्रुवः
स्मर्यमाणः शिवः सर्वदा रक्षतात् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वराष्ट्रे जनः कुत्रचिद् दुःखितो
जायतां यत्र कुत्रापि नित्यं सुखी ।
दृश्यतां मत्पुरः सर्वथा धार्मिको
भक्तिमन्तं जनं चेहतेऽसौ शिवः ॥६६॥

अत्र मन्थे समुद्रस्य जातं विष-
मद्भुतेनैव कार्येण तत्पानतः ।
विश्वलोकास्तदाऽऽश्चर्यतश्चालितास्-
तं विशिष्टं महादेवदेवं स्तुमः ॥६७॥

श्रीचन्द्रोत्तरपूर्णनामककवेर्देवाधिदेवास्पदे
काव्ये लब्धनवीनजीवनमिति प्रोद्भिन्नमोदावहः ।
सर्गोऽयं विषनाशपालितजगत्स्तुत्यात्मको विंशकः
पूर्णश्चेन्दुकरं बुधाः प्रपठनात् स्युर्मोदमानाः शिवात् ॥६८॥

॥ इति विंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकविंशः सर्गः

(विश्वनाशकविषतप्ताप्सरःकृतशिवस्तववर्णनात्मकः)

सौन्दर्ये दत्तचेतस्का लोकरञ्जनप्रवीणाः
स्वर्गीयाणां मनोहारिण्यः सर्वदा समर्था द्राक्।
मङ्गलार्थं तु सृष्टा वाराङ्गना मेनकाद्याः
शूलिन् द्राक् वैषमृत्योर्नाशिन् नमामो वयं त्वाम् ॥१॥

जीवाः सर्वे कर्तव्यश्रिता नित्यं
यावच्छक्यं मनोयोगेनैव सम्पादयन्ति।
एवं रीत्या सनिष्ठं सम्पाद्यमानेषु तेषु
श्रान्ताः क्षीणा अपि स्त्रियो वाराङ्गनाः ॥२॥

आकृष्यानां सुराणां दैत्यास्तिकानां नराणां
शान्तेः स्रोतसो मनोरञ्जे प्रेरितास्ताः स्वतो द्राक्।
एतादृक्षु स्थितिव्रातेषु श्रमेणैव युक्ता वयं
जीवस्तोमा मनोरञ्जनार्थं विलग्ना भवामः ॥३॥

प्रदर्शकाः सम्प्रति शङ्कया नता
उपग्रहैः सार्धमहो बलिष्ठाः।
नमः प्रकाशाय सदैव तत्परा
वयं ग्रहास्तारकसारिकावृताः ॥४॥

समस्तजीवा अपि नः प्रकाशतः
प्रकाशयुक्ताः सततं भवन्ति ते।
समस्तविश्वे निखिला जना भृशं
परस्परं सम्मिलनेन संस्थिताः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवस्य रौद्रस्य विषस्य पानतः
सुरक्षिताः प्राप्तपुनर्नवं वयः ।
समस्तनैजपरिवारसंयुता
नताः स्म आनन्दभरं शिवं प्रति ॥६॥

अस्माकं कार्यमेतच्चात्राऽस्ति सुसिद्धं त्रिलोक्यां
यत्प्रोच्चैस्तापसानामास्था तदा विघ्नहेतोः ।
नित्यं प्रेर्या भ्रमामस्तादृश्यैरित्थं वयं भो-
र्नात्रोच्यन्तेऽधिकानीति त्र्यम्बकं सन्नताः स्मः ॥७॥

त्यक्तपुत्रपौत्रादिकाः साधवो
मुक्तिकामाः सदा ब्रह्मलीना वयम् ।
विद्यया किञ्चिदानन्दलाभतो वै
ब्रह्मचिन्ता परा मोक्षप्राप्तौ सुलग्नाः ॥८॥

पवित्राः पालिता दृष्टिपातेन यै-
स्तैर्हि निष्ठात आनम्यतेऽसौ शिवः ।
जन्मसार्थक्यं कुर्वता सम्मोदिता
आद्यदेवं कृपा-सागरं सन्नुमः ॥९॥

योगयात्रा सदा दुर्गमा विद्यते
तत्र निष्ठापराः स्मो वयं सर्वथा ।
अत्र योगे सदा सर्वयोगिस्तुतं
शङ्करं शङ्करं सन्नुमः सन्नुमः ॥१०॥

विश्वदाही विषाख्योऽनलो हारितो
हारितो येन साश्चर्यकः सर्वथा ।
तत्र देवे कृपासागरे शङ्करे
सूच्चनिष्ठां प्रकुर्मो वयं सम्प्रति ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगकाष्ठामतीतोऽत्र मृत्युञ्जयः
सर्वजीवेषु तुल्यानुरागः सदा ।
देवदैत्येषु नित्यं प्रभुः संस्थितो
ह्यकस्मात् सुपीतं प्रचण्डं दाहकम् ॥१२॥

विश्वरक्षा कृता देवदेवेन द्राक्
निलीनं घोरघोरं हलाहालकम् ।
रक्षिताः प्राणिनः सर्वलोकस्थिताः
सर्वलोकस्थिताः प्राणिनो रक्षिताः ॥१३॥

कूष्माण्डा डाकिन्यो वयं भैरवीयाः
सेनान्यः शाकिन्यः सदा सर्वक्षेत्रे ।
वेताला हाकिन्यस्तथाऽन्या च दक्षाः
सञ्चाऱ्याग्राः स्मोऽद्य जानन्तु लोकाः ॥१४॥

एतर्हि त्रैलोक्ये सुभीति–प्रदात्री
ह्याश्चर्यान्विता दुःखदात्री विपत्तिः ।
एतस्य द्रोहस्य प्रहर्ताऽस्ति शूली
सोऽस्त्येव त्रैलोक्ये विभुः सर्वकर्ता ॥१५॥

तेनैवोग्रस्य द्वेषिणो गरस्य नाशः
प्रारब्धो विश्वत्राणहेतोः समन्तात् ।
तस्माद् भीतेर्नास्ति भ्रमः कीदृशोऽपि
अस्त्येवाऽमर्त्येशो महादेव उग्रः ॥१६॥

त्वमेको जगत्सर्जको विश्वपाता
जगन्नाशको विश्वकल्याणकारी ।
जगत्याः स्थितिस्त्वत्कतन्त्राऽस्ति नित्यं
त्वमेवास्य सृष्ट्यादिकर्ता प्रसिद्धः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नताः स्मो वयं ज्येष्ठदेवे सदैव
स्मरामः सदा लोकसृष्ट्यादिकारिन्।
नमामोऽनिशं सर्वथा त्वत्ककृत्यं।
वसामः परीवारयुक्ताः सदैव ॥१८॥

विषात् त्राणकर्ता त्वमेको जगत्यां
कृपासागरः सर्वकल्याणकर्ता।
सदा सर्वथा विश्वलोकाः समन्तात्
समीक्षन्त ओंकारवाच्यं महेशम् ॥१९॥

अकस्माद् विषस्योदयं वीक्ष्य लोका-
स्तथा तस्य विस्तारभावं सवात्यम्।
सुभीता जनाः शूलिनं तं स्मरन्तो
विषग्रस्तलोकस्य रक्षार्थलग्नाः ॥२०॥

स्तुवन्तः शिवं तं समाकारयन्तो
विनम्रा समुद्दीप्तशत्रोर्विषाद्धि।
प्रतीकारकर्तुं कृता प्रार्थना तैः
सपद्येव तत्रैव लब्धो विषघ्नः ॥२१॥

त्वदीयं शरीरं विचित्रं विलोक्य
सकौतुक्यनम्राः समस्ता अभूवन्।
स तत्रैव मूर्च्छाप्तलोकान् पुरस्तात्
विलोक्याऽद्भुतं पीतवानुग्रकूटम् ॥२२॥

समुद्रस्य मन्थेऽत्र कोलाहलोऽभूत्
कियन्तो विषौष्ण्येन मूर्च्छायता द्राक्।
न दृष्टश्च यैर्दुःस्थितेर्भङ्गकर्ता
तदैवाऽत्र वात्या हतो व्यापृतश्च ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तुवन्तः शिवं ते समीपे स्थिता ये
तकस्यैव रूपं समीक्षन्त आसन्।
अकस्मात्तदुग्रस्य कूटस्य पानात्
कृता सर्वथा जीवलोकस्य रक्षा ॥२४॥

विषोग्रस्य तापस्य चण्डाद् विघातान्-
महादेवकृत्येन चित्रेण मुक्ताः।
अनन्ता असूनां धरास्ते तु जीवाः
स्तुवन्त्यत्र देवाधिदेवं महेशम् ॥२५॥

चतुरसीतिकलक्षकसङ्ख्यया
वयमहो सहिता विविधजीवकाः।
असुहरेण विषेण बहुतर्जिताः
स्वत इहैव शिवेन सुरक्षिताः ॥२६॥

स्वकजनैः सहिता-सकला वयं
विषमशत्रुविषेण विकम्पिताः।
अनिशजीवदयाकरशम्भुना
विनिहतं प्रखरं प्रसरं विषम् ॥२७॥

असुधरान्नवनौ दिवि रन्ध्रके
क्षितिमतः सकलान् प्रमथाधिपः।
अवितवान् विषपायितया तदा
यत इहैव समे प्रणताः शिवे ॥२८॥

सकलविश्वगजीवकदम्बके
सपदि विस्तृतवैषरिपुप्लुते।
गरलभीतिभयं सकलं हतं
गिरिशशम्भुकृतेन समन्ततः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतितरां विषशत्रुकृता मृतिः
प्रतिहता विबुधेन कृपालुना।
विमलचित्तचयैः सुविचारणा-
दहह ! शङ्करशौर्यमिदं नुमः ॥३०॥

अबलजीवगणैर्न कदापि सः
स्मृतिपथाद्धि बहिर्न कथञ्चन।
क्रियत आनतभक्तजनैर्दृढै-
रतिरहस्यमिदं कथितं स्थिरम् ॥३१॥

मनुजवृन्दकृतां शिवसंस्तुतिं
पशुपतिः सततं शृणुयात् सदा।
अनिशमानतमस्तकवृन्दका
इह वयं प्रभवेम सदा दृढाः ॥३२॥

गृहिणो वयमत्र निवासयुता
निजकर्मकरा सुतशिक्षणदाः।
व्रतबन्धविवाहकराकुलतोऽ-
निशमत्र विषस्य भयाद् द्रुताः ॥३३॥

विविधे वसने वसितान् सकला-
नसुधारिचयान् विविधान् सरलान्।
सततं गुरवोऽतिसुशिक्षणदा
नितरां कठिनां शरणीं सुवते ॥३४॥

इतरेऽसुधरा गृहिणो धनिनः
सहयोगकराः प्रभवन्ति सदा।
नियमोऽस्ति समाजकृतः सरलः
स्थितिरत्र गता गिरिशेऽग्रकृता ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुतरां प्रणताः सहपुत्रसुता
गुरुदेव ! हरे विषहारि विभो !
त्वमिहैव विभुः सकलस्य कृते
कुशलं कुरुतादिति नो विनतिः ॥३६॥

ब्रह्मचर्यव्रते संस्थिताः स्मो वयं
सर्वविद्याकलातीर्थलीना भृशम् ।
सम्प्रति व्याप्तशत्रोर्विषात् पीडिता
विश्वरक्षापरेणैव संरक्षिताः ॥३७॥

शास्त्रवृन्देषु गाम्भीर्ययुक्तानि वै
यानि शास्त्राणि मुख्यानि सन्ति यत् ।
तानि लब्धुं सयत्नाः स्म इत्थं स्थिताः
सम्प्रति त्रासिता वैरितः क्ष्वेडतः ॥३८॥

विश्वस्य ध्वंसकृत्ये गभीरे सृतः
श्रीशिवः सर्वरक्षाव्रती पूजितः ।
देवदैत्यैमर्नुष्यैस्तथा स्थावरैः
सादरं स्मर्यते नम्यते शङ्करः ॥३९॥

आश्रमेऽत्र स्थिताः स्मो वयं पण्डिताः
सर्वविद्याकलासागरं तं नताः ।
तेन विश्वं सदा रक्षितं वर्तते
तादृशे विप्लवे नास्ति कोऽपीदृशः ॥४०॥

सुपाता समस्तस्य लोकस्य बन्धुः
निरीक्षन् स्वयं विश्वमेतद् विपन्नम् ।
अहो सम्प्रति श्रद्धया सम्परीता-
स्त्रिलोकस्य जीवा नमन्तीशदेवम् ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वानप्रस्थास्त्यक्तगेहादिकाः स्मो
नित्यं वन्यौकोरता ज्ञानशीलाः।
शीतोष्णैर्वात्यादिभिश्चाऽऽहताश्च
विद्यातीर्थं तं वयं सन्नमामः ॥४२॥

आचार्याणामाश्रमादौ तदानीं
संस्थायैवं सङ्गृहीता विचाराः।
सर्वे त्यक्ताः सम्प्रति श्रोत्रियैस्तै-
र्दत्ता मन्त्रा जप्यमाना इदानीम् ॥४३॥

स्वाध्यायः सम्पाठनं पण्डितत्वं
काण्डप्राथम्ये स्थितिं चाऽपि हित्वा।
एवं रीत्या संस्थितानां न उच्चा
गार्हस्थ्ये प्रागुज्झते शीलमुच्चम् ॥४४॥

त्यक्तस्वीयस्वाहेति सदा सर्वदा
त्वञ्चैकः पाता वै प्रभुर्दुःखहर्ता।
नित्यं सम्बोभूयन्ते भृशं सर्वद-
स्तस्माच्छान्तिप्राप्ताविच्छुकाः स्मो वयम् ॥४५॥

मठाधीशाः सर्वे विविधधनधान्यादिनिधिपाः
स्वमर्यादाः सर्वाः प्रतिदिनमहो पालकजनाः।
गुरूणामादेशाः सुकृतनिधयो भूरि सुसृता
वयं जातश्रद्धाः सुरगुरुवरं याम इह तम् ॥४६॥

सदा मोक्षानन्दप्रचुरसुखलाभाय घटका
भृशं भूस्त्यक्तं वै विभवगृहदारादिरहिताः।
भ्रमित्वा भिक्षाभिः सततकृतनिर्वाहकगणाः
परित्यज्यैवैतन्व्यसनकृतकार्येण सहिताः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयन्ते चत्वारः प्रथिततमगा भिक्षुककुले
सदाऽऽतङ्कैर्युक्ताः स्वकपरतरैश्चैव रहिताः ।
अहं ब्रह्माऽहं भोः कथनपरकास्त्यक्तसकलाः
प्रभो शम्भो सत्यं भवदनुश्रितास्त्वां प्रणतिकाः ॥४८॥

नवानां चक्राणां प्रतिदिनमनुष्ठाननिरता
अमुन्याधाराणि प्रकठिनतराकाशपरकम् ।
समभ्यस्यैवाऽत्र प्रबलमतिकाः कामरहिताः
परे ब्रह्मण्येवं गतहृदयकाः स्मः पशुपतेः ॥४९॥

सदा पद्मे वज्रेऽनुसृतसकलाऽभ्यासपरका
वयं योगाभ्यासे कृतसुयतनाः संस्कृतिरताः ।
समाजानां दर्शा अकृतकृतकार्यस्य फलगा
नमामस्त्वां शूलिन् ! विषमविषतो रक्षिततमाः ॥५०॥

सर्वे गोपाला वयं गोरक्षका
नित्यं गोसेवाव्यापृता गोष्ठमध्ये ।
गावः सर्वा मातरः सर्वजाते-
स्तासां सेवा सर्वथा मूल्यभूता ॥५१॥

शत्रोः क्ष्वेडस्य ध्वंसान्मुख्यकार्याद्
गावः सर्वास्ताः सहैवाऽविताः प्राक् ।
अन्ये सर्वे प्राणिनस्त्वत्कृपाप्ता
अस्माद्धेतोस्त्वां नमामोऽस्तु सौख्यम् ॥५२॥

गोपालने सततमत्र दृढा वयं भो
गावः सदैव सकला धनधान्यभूमिः ।
याभिश्च गोचरगता गृहगोष्ठसंस्था
संरक्षिता सकलगोघ्नरिपुभ्य आरात् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ते सर्वथा परमधार्मिकवृन्दपूज्याः
कर्तव्यकर्म सततं समनुष्ठितं तैः ।
तैरेव सर्वविधभावनया समेताः
सर्वे जना अतिशयेन दृढा उदाराः ॥५४॥

कालोऽस्त्ययं विकटरूपधरः करालः
संरक्षितास्त्रिभुवनस्थितजीवजाताः ।
श्रीशङ्करेण करुणाकरविश्वभर्त्रा
सञ्जीविताश्च विषमाद् विषदुर्विपाकात् ॥५५॥

गोमातृकाः सततमीश्वरतुल्यमान्याः
सन्तानबन्धुजनसाधुसमाजवन्द्याः ।
सर्वस्य सर्वविधसौख्यदकल्पवृक्षाः
गावो न कस्य कुलजस्य जनस्य सम्पत् ॥५६॥

अतिशयं बहुधनार्जने रता
निखिलराष्ट्रजना सौख्यतत्पराः ।
सततमुन्नतिपरा हितैषिणो
वयमिहापणभवक्रियाश्रिताः ॥५७॥

क्वचन विक्रमपरता विकासधा
पशुपतेऽत्र भवताऽऽवलोकिता ।
सकलविश्वनशनाय तत्परं
विषमतीव विकटं ग्रसितं तत् ॥५८॥

सुकठिनां शिवकृतां विषान्ततां
समवगत्य जनताऽतिहर्षिताः ।
वयमपीदृशदृश्यनिरीक्षणा-
दतिशयं विकटरूपगराच्च रक्षिताः ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सपदि विक्रयकर्मकरास्तथा
क्रयणकर्मणि लग्नतया दृढाः ।
प्रखरशत्रुविषाद् विमोचिताः
पणनकर्मरताः सुखिनश्च नु ॥६०॥

वयं धीवराः सर्वताराय सस्ता
दयादानयोग्यान् परं प्रापयामः ।
जनानां सुसेवां विधायैव लोके
प्रशस्तं यशो लब्धमस्मामिरुच्चम् ॥६१॥

नदीसागरेषु स्थिता नित्यमप्सु
जलं जीवनं नो जलं पत्तनं च ।
तथाऽप्यत्र शत्रोर्विषात् पीडिताः प्राक्
महादेवदेवेन संरक्षिताः स्मः ॥६२॥

समुत्तारिता देवदेवेन नून–
मजस्रं वयं स्वस्य सेवां पवित्राम् ।
सदा मन्यमानाः प्रवृत्ता भवामो
न हि त्यक्तमस्माभिराद्यं सुवृत्तम् ॥६३॥

इयं राष्ट्रसेवा विशिष्टास्ति शम्भोः
सदैवात्र कार्ये प्रवृत्तेः सुसिद्धिः ।
त्वया रक्षिता कालकूटाच्च सर्वे
सदा नम्यतेऽस्माभिरीशस्त्वमत्र ॥६४॥

आचार्याग्रगपूर्णचन्द्ररचिते विद्वन्मनोमोहके
शैवीदिव्यकथायुतेऽद्भुतमहालीलाचरित्रात्मके ।
काव्ये पूर्ण इहाप्सरःस्तुतिपरः सर्गैकविंशः पुनर्
द्वाविंशञ्च विलोक्य काव्यरसिका आनन्दिताः स्युः शिवात् ॥६५॥

॥ एकविंशतितमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वाविंशः सर्गः

(सामुद्रतीव्रविषतप्तव्यापारिवर्गादिकृतशिवस्तुतिवर्णनात्मकः)

ऐश्वर्यार्थं समस्ता व्यापारिणः प्रायशस्तेऽ-
स्माकं रम्यभूपसङ्कासत्वेन स्वाद्या भवन्ति।
ये देवानां सुदेवं मृत्युञ्जयं सन्नमन्ति
भौमाः प्राणिप्रधाना जायन्ते धन्याः समन्तात् ॥१॥

धर्मप्राणा इदानीमस्माकमत्र शिवप्रणामं
कुर्वन्तो देवदेवस्यैव नित्यं शरण्याः।
सन्दृश्यन्ते सदा सम्पन्नाः सुगार्हस्थ्ययुक्ताः
पुत्रापत्या अनुगाः कोटिप्रजा मञ्जुलाश्च ॥२॥

विश्वेदेवाः समस्तास्तथा ते श्राद्धदेवा
आदित्याद्या दशैते प्राकाश्ययुक्ताः समन्तात्।
अन्ये गर्वेणानारतं स्वाम्येन पूज्याश्चरैश्च
श्राद्धे यागे समस्तैर्नित्यं समाराधनीयाः ॥३॥

एते गणदेवा गण्या नमनीया
अस्मान् प्रति नित्यं शिवेन सुदत्ता।
आशीस्तदनुप्रभुरेकोऽस्ति शिवोऽसौ
सर्वत्र समस्ता देवा वयमीशाः ॥४॥

एतर्हि प्रचण्डाद् वैषादविता द्राक्
तापाच्छिवशक्त्यैवाऽत्र प्रथिताः स्मः।
वैषान्निजस्यैश्वर्यस्य व्ययकार्यात्
सर्वे वयमित्यमुना रक्षिततमाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृशा इत्थं भूता वयमत्र
भूतेशकृपाप्राप्तचराचरास्तथा।
नित्यं सुखिनः स्मो रुद्रस्य दृष्टे-
रेष त्रिदिवेशो नम्योऽस्ति समेषाम् ॥६॥

आदित्यादिविविधसाध्यन्ता
विख्याता नवसमुदायस्थाः।
शूलिन् वयममरा ख्याता
नित्यं त्वां प्रति नतमूर्धानः ॥७॥

प्रभो शूलधारिन् समस्तस्य पाता
तवैवाऽऽज्ञयाऽहं जगत्सृष्टिकर्ता।
स्वकीये सुकार्ये सदैवाऽस्मि लग्नः
कदापि त्वदीया समाज्ञा न हाता ॥८॥

भवेत्सर्वथाऽवश्यपाल्यैव कीर्ति-
रिदानीमकस्मात् प्रजाताच्च तीव्रात्।
विषात् पीडिता दुःखिता रक्षितास्ते
ततस्ते समे सर्वथा त्वां नता द्राक् ॥९॥

अनेनैव कारुण्यपूर्णेन नित्यं
सदा सर्वदा रक्षितव्याः समस्ताः।
अविच्छिन्नवात्सल्यभावेन सर्वे
सुयुक्ता भवेयुः सदाऽद्यैव भूमन् ॥१०॥

विश्वस्य रक्षाकरणाय सर्वथा
पूर्वं नियुक्तो भवता सदा दृढः।
तत्रैव निष्ठासहितश्च तत्पर
एतर्हि पीडादविषेण कम्पितः ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदेशपालाय रतोऽनिशं स्वतो
विष्णुः स मायी ह्यवतारकारकः ।
नानाऽरिसम्यादयने प्रवृत्तिमा-
नातङ्कभीतिप्रदजीवनाशने ॥१२॥

जागर्ति नित्यं प्रणतश्च तावकः
श्रीमन्निदेशः सततं सुपाल्यते ।
वैषस्य दोषस्य निवर्तको भवान्
रात्रिन्दिवं त्वां प्रणमन्ति देहिनः ॥१३॥

स्वर्गस्य राजाऽस्मि भवत्पुरस्थितो
मदीयकार्येषु रतः सदा प्रभो !
श्रीमत्सु सेव्येषु निरन्तरं नतो
देवैश्च सर्वैः सततं पुरस्कृतः ॥१४॥

सामुद्रवैषेण हि सर्वथा हता
एतर्हि संरक्षितजीवसंहतिः ।
त्रैलोक्यसंख्याः सकलाश्च जीविता
जीवैः समस्तैर्वत नैव विस्मृतः ॥१५॥

जीवितैः सदा स्मर्यत आनतैर्भृशं
तथ्यं विभो धीरचया विजानते ।
आनन्दलीनाः सहजङ्गमाः स्थिता-
स्त्वामीडनं सन्ततमानता नताः ॥१६॥

त्रयस्त्रिंशत्कोटिश्रितदिविषदोऽमर्त्यसकला
वयं प्रायः श्रान्ता अतिशयरयेण प्रमथनात् ।
अकस्मात् सञ्जाताद्विषमविषतः स्मः प्रतिहता
भवन्तं देवाद्यं विषहरविभुं सम्प्रति नताः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुमूर्च्छं सम्प्राप्तास्तदशनविकर्त्राऽत्रभवता
स्वलं सम्यक् त्राता, अरिभविषतापादतितराम्।
सुपुत्राः पौत्राकाः सततसुखिनः प्राणिनिवहा
पुनः पूर्वस्थित्याः प्रलभनसुमोदेन सहिताः ॥१८॥

वयं दानवाः पूर्वदेवा इदानीं
समुद्रस्य मन्थे वृताः सद्विचारात्।
प्रमन्थस्य कार्येऽत्र शम्भो विचित्रे
ह्यकस्माद्विषं जायमानं विलोक्य ॥१९॥

वयं कां दिशं याम इत्येव चिन्तां
प्रकुर्वन्त इत्थं स्थिताः कञ्च कालम्।
विषं पीतमत्रैव सञ्जीविताः स्म-
स्त्वया श्रीमता विश्वपात्राऽधुना द्राक् ॥२०॥

वयं त्वां नमामो वयं त्वां स्मरामः
सुनीता वयं सर्वथा सर्वसौख्ये।
सदा सर्वदा त्वां भजामो भजामो
यतः सर्वतोषेण युक्ता भवामः ॥२१॥

शम्भो हाहाहुहुकाद्या अनेके
गन्धर्वा जाता सम्प्रवीणाः।
स्वैरं गीतैरत्र लीनाश्च सर्वे
देवान् सर्वान् सर्वदा रञ्जयामः ॥२२॥

देवा दैत्या मानवाः प्राणिनोऽत्र
नित्यं युक्ताः स्वीयकार्ये सदैव।
देवादीनां रञ्जने सम्प्रवृत्ते
सर्वे सुज्ञा मानिता द्राग् भवामः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं किन्नराः श्रीशदूता अनेके
धनाध्यक्षयक्षस्य कार्ये सुलग्नाः।
वसामोऽलकायां भृशं रम्यपुर्यां
सदा सौख्ययुक्तास्तथोत्कर्षलब्धाः ॥२४॥

श्रुतं सम्प्रति श्रुत्यपास्यं विचित्रं
वचो वैषशत्रुस्थितं भीतिदातृ।
तदस्याद्य नाशाय शम्भोः प्रवृत्ति-
स्तदाऽत्रैव हृष्टाऽतिभव्या सुशक्तिः ॥२५॥

विषं भक्षयित्वा कृता विश्वरक्षा
ततः सर्वजीवा विनष्टापदस्ते।
विषेणाऽभिभूतस्य विश्वस्य हेतो-
र्गिरीशेन लोकातिगं कार्यमाप्तम् ॥२६॥

प्रणामं सदा कुर्म एतं विशिष्टं
सुराणामपि त्रायकं देवदेवम्।
अनेनैव सर्वे त्रिलोकस्थजीवा
सदा रक्षितास्त्वां नताः स्मो वयं ते ॥२७॥

नायकेनावृतैराश्विनेयान्तकैः
पञ्चसंख्याश्रितैर्लोकपालैर्भृशम्।
विश्वरक्षाकृते योगदाने दृढै-
र्देवदेवाधिपः सर्वथा नम्यते ॥२८॥

शत्रुभूतेन तीव्रेण वैषेण नो
ह्यनर्थः प्राक्कृतो नैव दूरे गताः ॥
सन्ततं सर्वथा एष एव ध्रुवः
स्मर्यमाणः शिवः सर्वदा रक्षतात् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वराष्ट्रे न कश्चिज्जनो दुःखितो
जायतां यत्र कुत्रापि नित्यं सुखी।
दृश्यतां मत्पुरः सर्वदा धार्मिके
मूल्ययुक्ते दृशं चेहतेऽसौ शिवः ॥३०॥

अत्र मन्थे समुद्रस्य जातं विष-
मद्भुतेनैव कार्येण तत्पानतः।
विश्वलोकास्तदाऽऽश्चर्यतश्चालिता-
स्तं विशिष्टं महादेवदेवं स्तुमः ॥३१॥

सौन्दर्ये दत्तचेतस्का लोकरञ्जनप्रवीणाः
स्वर्गीयाणां मनोहारिण्यः सर्वदा सर्वथा द्राक्।
मङ्गलार्थं तु सृष्टा वाराङ्गना मेनकाद्याः
शूलिन् वैषमृत्योर्नाशिन् नमामो वयं त्वाम् ॥३२॥

जीवाः सर्वे सदा कर्तव्ये प्रश्रिता द्राक्
यावच्छक्यं मनोयोगेनैव सम्पादयन्ति।
एवं रीत्या सनिष्ठं सम्पाद्यमानेषु तत्र
श्रान्ताः क्षीणा मनोरञ्जनार्थं प्रवृत्ता भवन्ति ॥३३॥

प्रक्षीणानां सुराणां दैत्यादिकानां समन्ता-
च्छान्तः स्रोतो मनोरञ्जे प्रेरितास्ते स्वतो द्राक्।
एतादृक्षु स्थितिक्रान्तेषु श्रमेणैव युक्ता
जीवस्तोमा मनोरञ्जनार्थं विलग्ना भवन्ति ॥३४॥

अस्माकं कार्यमेतच्चात्राऽस्ति सुसिद्धं त्रिलोक्यां
यत्रोच्चैस्तापसानामास्था तदा विघ्नहेतोः।
नित्यं प्रेर्या भवामस्तादृश्य इत्थं वयं भो
नात्रोच्यन्तेऽधिकानीति त्र्यम्बकं सन्नताः स्मः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यक्तपुत्रपौत्रादिकाः साधवो
मुक्तिकामाः सदा ब्रह्मलीना वयम् ।
विद्यया किञ्चिदानन्दलाभतो भो
ब्रह्मचिन्तापरा मोक्षप्राप्तौ श्रिताः ॥३६॥

पाविता रक्षिता दृष्टिपातेन ये
तेन निष्ठात आनम्यतेऽसौ शिवः ।
जन्मसार्थक्यलब्धेश्च सम्मोदिता
आद्यदेवं कृपासागरं सन्नुमः ॥३७॥

योगयात्रा सदा दुर्गमा विद्यते
तत्र निष्ठापराः स्मो वयं सर्वथा ।
अत्र भोगे सदा सर्वभोगिस्तुतं
शङ्करं शङ्करं सन्नुमः सन्नुमः ॥३८॥

विश्वदाही विषाख्योऽनलोऽसह्यको
हारितो येन साश्चर्यकः सर्वथा ।
तत्र देवे कृपासागरे शङ्करे
सूच्चनिष्ठां प्रकुर्मो वयं सम्प्रति ॥३९॥

योगकाष्ठामतीतोऽसि मृत्युञ्जय !
सर्वजीवेषु तुल्यानुरागः सदा ।
देवदैत्येषु नित्यं सम्प्रपूजितः
एतर्हि पीतं प्रचण्डं तद्दाहकम् ॥४०॥

विश्वरक्षा कृता देवदेवेन वै
पीतवान् घोरघोरं प्रचण्डं विषम् ।
रक्षिताः प्राणिनः सर्वलोकस्थिता-
स्तेन विश्वं सुरक्षं नित्यमेव भोः ॥४१॥

कुष्माण्डा डाकिन्यो वयं भैरवीयाः
सेनान्यः शाकिन्यः सदा सर्वक्षेत्रे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेताला हाकिन्यस्तथा, तथाऽन्ये च दक्षाः
सञ्चारकाग्राः स्मोऽद्य जानन्तु लोकाः ॥४२॥

एतर्हि त्रैलोक्ये सुभीतिप्रदात्री
ह्याश्चर्याऽऽदात्री दुःखदात्री विपत्तिः ।
एतस्य दोषस्य प्रहर्ताऽस्ति शूली
सोऽस्त्येव त्रैलोक्यविभुः सर्वकर्ता ॥४३॥

तेनैवोग्रस्य द्वेषिणो गरस्य नाशः
प्रारब्धो विश्वत्राणहेतोः समन्तात् ।
तस्माद् भीतेर्नास्ति भ्रमः कीदृशोऽपि
अस्त्येवाऽमर्त्येशो महादेव उग्रः ॥४४॥

त्वमेको जगत्सर्जको विश्वपाता
जगच्छासको विश्वकल्याणकारी ।
जगत्याः स्थितिस्त्वत्कयाताऽस्ति नित्यं
त्वमेवास्य सृष्ट्यादिकर्ता प्रसिद्धः ॥४५॥

नताः स्मो वयं श्रेष्ठदेवे सदैव
स्मरामः सदा लोकरक्षादिकारिन् !
नमामोऽनिशं सर्वथा त्वत्कपाता
वसामः सुखं परीवारयुक्ताः सदैव ॥४६॥

विषत्राणकर्ता त्वमेको जगत्यां
कृपासागरः सर्वकल्याणकर्ता ।
सदा सर्वदा विश्वलोकाः समन्तात्
समीक्षन्त ओङ्कारवाच्यं महेशम् ॥४७॥

आचार्यप्रभपूर्णचन्द्ररचिते साहित्यिकानन्ददे
काव्ये शम्भुगलस्य नीलविभवप्राप्तेश्च विज्ञापके ।
द्वाविंशः खलु सर्ग इत्थमगमत् प्राप्तं त्रयोविंशकं
सर्गं वीक्ष्य बुधा भवन्तु सुखिनः श्रीशङ्करात् सर्वदा ॥४८॥

॥ इति द्वाविंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयोविंशः सर्गः

(सामुद्रतीव्रविषसन्तप्तवास्तुदेवादिकृतशिवस्तुतिवर्णनात्मकः)

वयं वास्तोर्देवा गृहगतसमग्रोन्नतिकराः
सुपूज्याः स्मो नित्यं स्थिरशुभविधाने हि जनिताः।
इदानीं विश्वेऽस्मिन्नहितकरशीलस्य हि रिपो-
र्विषस्योत्पत्तिः सा सकलजनतात्रासकरिणी ॥१॥

समीक्ष्यैवाऽत्र स्मः समुपरि विनेत्रा अतितरां
समे प्राणिव्राताः खिलशुभविधानाय कुशलाः।
महादेवो नित्यं प्रयतनरतो विश्वकुशलेऽ-
निशं रक्षादोऽयं विषहरविभुर्नम्यत इह ॥२॥

गृहस्योच्चै रक्षाकरणनिपुणा वास्तुकुशला
वयं सर्वत्रैवाऽवगतनिधिसंरक्षणपराः।
जगत्यां ये जीवाः प्रकृतिवशगाः कर्मगुणतो
विषात्तस्मात्तीव्रात् पशुपतिविभो रक्षिततमाः ॥३॥

सदा सर्वा जातिः सततवसुपुत्रादिधनिका
भवन्तु प्रख्याताः प्रतिदिनधनाढ्याश्च नितराम्।
वयं सर्वे नित्यं गृहपुरसुराणां निलयनं
सुपातु सर्वं तत् प्रयतनपराः सर्वत इह ॥४॥

अहं देवो वास्तुः प्रमुख इह मे मण्डलमिदं
महापत्तेर्दूरीकरणनिपुणं तत्प्रतिदिनम्।
अतः सर्वैर्देवैर्दितिजमनुजैश्चाऽपि सुनुतं
यदा ये मे श्रद्धां विदधति भृशं ते सुखितमाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदाऽस्माकं स्नेहं सततसमवाप्यैव सुरराण्-
नृपो जातः स्वर्गेऽप्रतिहतमनाः स्वर्गसुखभुक्।
सुपूजामस्माकं प्रतिदिनमसौ सम्प्रकुरुते
वयं ते संयुक्ता रिपुगरलपं तं प्रति नताः ॥६॥

अकस्माद्विषस्योदयं वीक्ष्य लोका-
स्तथा तस्य विस्तारमाद्यं सुघोरम्।
सुभीता भृशं शूलिनं तं स्मरन्तो
विषग्रस्तलोकस्य रक्षार्थलग्नाः ॥७॥

स्तुवन्तः शिवं तं समाकारयन्तो
विनम्राः समुद्दीप्तशत्रोर्विषस्य।
प्रतीकारकर्तुं कृता प्रार्थना च
सपद्येव तत्रैव लब्धो विषघ्नः ॥८॥

तदीयं शरीरं विचित्रं विलोक्य
सकौतुक्यमाश्चर्ययुक्ता अभूवन्।
स तत्रैव मूर्च्छावृतान् तान् विलोक्य
प्रचण्डं विषं पीतवान् दर्शकाग्रे ॥९॥

समुद्रस्य मन्थेऽत्र कोलाहलोऽभूत्
कियन्तो विषौष्ण्येन मूर्च्छान्विता द्राक्।
न दृष्ट्या च यैर्दुःस्थितिर्मङ्क्षु खिन्ना-
स्तदैवाऽत्र वात्या विचित्राऽपि जाता ॥१०॥

स्तुवन्तः शिवं ये समीपे स्थितास्ते
तकस्यैव रूपं समीक्षन्त आसन्।
अकस्मात्तदुग्रस्य पातेन तेन
कृता सर्वथा जीवलोकस्य पीडा ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषोग्रस्य तापस्य चण्डाद्विघातान्-
महादेवकृत्येन चित्रेण मुक्ताः ।
अनन्ता असूनां धरा जीवदेवाः
स्तुवन्त्यत्र देवाधिदेवं महेशम् ॥१२॥

अगणिताधिकसंख्यया युता
वयमहो सुखिनो विविधा नराः ।
असुहरेण विषेण वितर्जिताः
स्वत इहैव शिवेन सुरक्षिताः ॥१३॥

स्वकजनैः सहिताः सकला वयं
विषमशत्रुविषेण विकम्पिताः ।
अनिशजीवदयाकरशम्भुना
विनिहतं प्रखरं रिपुभं विषम् ॥१४॥

असुधरानवनौ दिवि रन्ध्रके
स्थितिमतः सकलान् प्रमथाधिपः ।
अवितवान् विषपायितया सदा
अत इहैव समे प्रणताः शिवे ॥१५॥

सकलविश्वगजीवकदम्बके
सपदि हर्षयुता नितरां प्रभो !
गरलभीतिरियं सकला हता
गिरिशशम्भुवरेण समन्ततः ॥१६॥

अतितरां विषशत्रुकृता मृतिः
प्रतिहता विबुधेन सुशक्तितः ।
विमलचित्तचयैः सुविचारणा-
दहह शङ्करशौर्यमिहाद्भुतम् ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अबलजीवगणैर्न कदापि सः
स्मृतिपथाद्धि बहिर्न कदाचन।
क्रियत आनतभक्तजनैर्दृढै-
रिति रहस्यमिदं कथितं स्थिरम् ॥१८॥

मनुजवृन्दकृतां शिवसंस्तुतिं
पशुपतिर्मनसा शृणुयात् सदा।
प्रतिदिनं नतमस्तकवृन्दका
इह वयं प्रभवेम सदा दृढाः ॥१९॥

गृहिणो वयमत्र नितरां विभुं
निजसुकर्मपराः सुतशिक्षणदाः।
व्रतबन्धविवाहकराः कुलतोऽ-
निशमत्र विषस्य रिपुं प्रणताः ॥२०॥

सकले प्रतले वसिताः सकला
असुधारिचया विविधाँस्तनयान्।
सततं जनयन्ति सुशिक्षणदा
नितरां कठिनां सुकृतिं सुवते ॥२१॥

इतरेऽसुधरा गृहिणो धनिनः
सहयोगकराः प्रभवन्ति सदा।
नियमोऽस्ति समाजकृतः स्थिरः
स्थितिरत्र गता गिरिशेऽग्रकृता ॥२२॥

सुतरां प्रणता सहपुत्रसुता
गुरुदेवहरे विषहारिविभौ।
अनिशं स विभुः सकलस्य कृते
कुशलं कुरुतादिति नो विनतिः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मचर्यव्रते संस्थिताः स्मो वयं
सर्वविद्याकलातीर्थलीना भृशम्।
सम्प्रति व्याप्तशत्रोर्विषात्पीडिता
विश्वरक्षापरेणैव संरक्षिताः ॥२४॥

शास्त्रवृन्देषु गाभ्भीर्ययुक्तानि वै
यानि शास्त्राणि सन्ति प्रधानानि यत्।
तानि लब्धुं सयत्नाः स्म इत्थं स्थिताः
सम्प्रति त्रासिता वैरितः क्ष्वेडतः ॥२५॥

जगद्विध्वंसकृत्ये गभीरे सृतः
श्रीशिवः सर्वरक्षाव्रती पूजितः।
देवदेत्यैर्मनुष्यैस्तथा स्थावरैः
सादरं स्मर्यते नम्यते शङ्करः ॥२६॥

आश्रमेऽत्र स्थिताः स्मो वयं पण्डिताः
सर्वविद्याकलासागरं तं नताः।
तेन विश्वं सदा रक्षितं विद्यते
तादृशे विप्लवे नास्ति कोऽपीदृशः ॥२७॥

सुपाता समस्तस्य लोकस्य बन्धुः
स एकोऽस्ति विश्वस्य घोरस्थितेश्च ॥
अहो सम्प्रति श्रद्धया सम्परीता-
स्त्रिलोकस्य जीवा नमन्तीशदेवम् ॥२८॥

वानप्रस्थास्त्यक्तगेहादिकाः स्मो
नित्यं वन्यौकोरता ज्ञानलीनाः ॥
शीतौष्ण्यैर्वात्यादिभिश्चाहतास्ते
विद्यातीर्थं तं वयं सन्नमामः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आचार्याणामाश्रमादौ तदानीं
संस्थायैवं सङ्गृहीता विचाराः ।
सर्वे त्यक्ता सम्प्रति श्रोत्रियैस्ते
तन्त्रा मन्त्रा जप्यमाना इदानीम् ॥३०॥

स्वाध्यायः सम्पाठनं पण्डितत्वं
काण्डप्राथम्ये स्थितिश्चाऽपि हित्वा ।
एवं रीत्या संस्थितानां न उच्चा
गार्हस्थ्ये प्राक् विकृतं शीलमुभ्यम् ॥३१॥

त्यक्तस्वीयस्वास्ते सदा सर्वदा
त्वं चैकः पाता वै प्रभुर्दुःखहर्ता ।
नित्यं सम्बोभूयतां भृशं सर्वद-
स्तस्माच्छान्तिप्राप्तिकामा वयं स्मः ॥३२॥

मठाधीशाः सर्वे विविधधनधान्यादिनिधिपाः
स्वमर्यादाः सर्वाः प्रतिदिनमहो पालकजनाः ।
गुरूणामादेशाः सुकृतनिधयो भूरिसुकृता
वयं जातश्रद्धाः सुरगुरुवरं याम इह तम् ॥३३॥

सदा भिक्षामोक्षाचरणसुखलक्षाय घटका
भृशं भूस्त्यक्तं तैः स्वविभवगृहादेश्च विरताः ।
गदित्वा भिक्षित्वाऽऽश्रमपरवशा ये तु यतयः
परित्याज्यैवं वै विविधकुलजेषु प्रतिदिनम् ॥३४॥

वयं ते चत्वारः प्रथिततमगा भिक्षुकचयाः
सदाऽष्टैकग्रासग्रहणपरका भिक्षुगणपाः ।
अहं ब्रह्माऽहं ब्रह्मकथनरताः शौर्यशरणाः
प्रभो शम्भो सत्यं भवदनुसृतास्त्वां प्रणतिकाः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवानां चक्राणां प्रतिदिनमनुष्ठाननिरताः
समेषामाधारं सुकठिनतराकाशपरकम्।
समभ्यस्यैवाऽत्र प्रबलमतिकाः कामरहिताः
परे ब्रह्मण्येवं गतहृदयकाः स्मः पशुपते ! ॥३६॥

सदा पद्मे वज्रेऽनुसृतसकला आसनगता
वयं योगाभ्यासे च कृतयतनाः संस्कृतिरताः।
समाजानां दर्शा अकृतकृतकार्यस्य फलगा
नमामस्त्वां शूलिन् ! विषमविषतो रक्षिततमाः ॥३७॥

सर्वे गोपाला वयं गोरसज्ञा
नित्यं गोसेवाव्यापृता गोष्ठमध्ये।
गावः सर्वा मातरः सर्वजाते-
स्तासां सेवा सर्वदाऽमूल्यभूता ॥३८॥

क्ष्वेडस्य ध्वंसात्मकान्मुख्यकार्याद्
गावः सर्वास्ताः सहैवाऽविताः प्राक्।
अन्ये सर्वे प्राणिनस्त्वत्कृपाप्ता
ह्यस्माद्धेतोस्त्वां नमामोऽस्तु सौख्यम् ॥३९॥

गोपालने सततमत्र दृढा वयं भो
गावः सदैव सकला धनधान्यधाम्न्यः।
याभिश्च गोचरगता गृहगोष्ठसंस्थाः
संरक्षिताः सकलगोघ्नजनेभ्य आरात् ॥४०॥

ते सर्वथा परमधार्मिकवृन्दपूज्याः
कर्तव्यकर्म सततं समनुष्ठितं यैः।
तैरेव सर्वविधभावनया समेताः
सर्वे जना अतिशयेन कृता उदाराः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालोऽस्त्ययं विकटरूपधरः करालः
संरक्षितास्त्रिभुवनाश्रयदानकर्त्रा ।
श्रीशङ्करेण करुणाकरविश्वभर्त्रा
सञ्जीविताश्च विषमाद्विषदुर्विपाकात् ॥४२॥

गोमातृकाः सततमीश्वरतुल्यमान्याः
सन्तानबन्धुजनसाधुसमाजवन्द्याः ।
सर्वस्य सर्वविधसौरभकल्पवृक्षा
गावो न कस्य कुलजस्य जनस्य सम्पत् ॥४३॥

अतिशयं बहुधनार्जने रता
निखिलराष्ट्रजनसौख्यतत्पराः ।
सततमुन्नतिपरा हितैषिणो
वयमिहापणभवक्रियाश्रिताः ॥४४॥

क्वचन विक्रयरता विकासधाः
पशुपतेऽत्र भवताऽवलोकिताः ।
सकलविश्वनशनाय तत्परं
विषमतीव विकटं विनाशितम् ॥४५॥

शिवकृतं कठिनं विषपानकं
समवगत्य जनताऽतिहर्षिताः ।
वयमपीदृशदृश्यनिरीक्षणा-
दतिशयं खरगरात् सुरक्षिताः ॥४६॥

सपदि विक्रयकर्मकरास्तथा
क्रयणकृत्यसुरताः समे दृढाः ।
प्रखरशत्रुगरलाद् विमुक्तिगाः
पणनकर्मसहिता भवाम ओम् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं धीवरा सर्वताराय शस्ता
परादानयोग्यान् परं प्रापयामः ।
जनानां सुसेवां विधायैव लोके
प्रशस्तं यशो लब्धमस्माभिरित्थम् ॥४८॥

नदीसागरेषु स्थिता नित्यमप्सु
जलं जीवनं नो जलं पत्तनं च ।
तथाऽप्यत्र शत्रोर्विषात्ताडिताः स्मः
समुद्धारिता देवदेवेन चाऽ त्र ॥४९॥

अजस्रं वयं स्वस्य सेवां पवित्रां
सदा मन्यमानाः प्रवृत्ता भवामः ।
इयं राष्ट्रसेवा विशिष्याऽस्ति शम्भो
सदैवाऽत्र कार्ये प्रदद्यात् सुसिद्धिम् ॥५०॥

आचार्यप्रभपूर्णचन्द्ररचिते श्रीशाम्भवे मोदके
वैषाग्नेः शमनेन लोकहितकृत्कृत्यप्रपूर्णे शुभे ।
काव्ये वास्तुसुरादिवन्दनविधौ सर्गस्त्रयोविंशकः
पूर्णे वेदकराक्तकाव्यपठनात् तुष्य भवेयुर्भवात् ॥४८॥

॥ त्रयोविंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्विंशः सर्गः

(सामुद्रतीव्रविषपीडितदेवमनुष्यादिकृतशिवस्तववर्णनात्मकः)

गीर्वाणा मनुष्या यत्राऽसन् संहता–
स्तत्रैव सुरज्येष्ठ आगतः समीपम् ।
उक्तं च तदा यज्ञो वै युवयोर्द्राक्
सन्तानसदृक् कल्पवृक्षो जायते ॥१॥

देवासुरयक्षान् मर्त्यान् मनुजाँस्तान्
संसृष्टवता मया सर्वकजीवाः ।
उक्ता यजने श्रद्धावन्तः प्रभवन्तु
तेनैव हि जीवाः सर्वे सुखिनः स्युः ॥२॥

एवं सततं चाऽविच्छिन्नतयाऽत्र
नित्यं प्रसृता भूयांसोऽयुतयज्ञाः ।
एवं वयमत्रैवोच्चैः खलु मार्गे
वृताः श्रुतिनिर्दिष्टायां सुसरण्याम् ॥३॥

ते यज्ञजदिव्यश्रद्धायुतविप्रा
लीना वयमेतर्हि श्रौतनयपाः ।
दक्षाः श्रुतिमन्त्रैर्देवाह्वानकृत्ये
देवेशगिरीशेनैवेह सुमुक्ताः ॥४॥

हालाहलसंयुक्तस्पर्शनघृष्टा
मुक्ताश्च पिनाकिन्नीशान ! तवाऽस्त्रात् ।
इत्थं तव पानाद् विषाच्चोग्राच्च सर्वे
जाता गतभीत्याधिक्याः परिशान्ताः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यज्ञा मुदिराणामुत्पादनशीला-
स्ते वारिदसन्धाता अन्नसुदायाः ।
अन्नैर्विविधैर्जीवानामधिवृद्धि-
स्त्रैलोक्यचरास्तस्मात्ते सुखिनः स्युः ॥६॥

कर्मशीला जना यान्ति मुक्तेः पदं
नाऽत्र शङ्काऽस्ति कुत्राऽपि तथ्यं वचः ।
कर्मजिज्ञासुभिर्जैमिनीत्यादिभि-
र्निश्चितं कर्मकाण्डं विशिष्टं महत् ॥७॥

ईदृशे नित्यचिन्त्ये रहस्ये स्थिते
यज्ञशीला वयं श्रीमता रक्षिताः ।
वामदेव ! त्वयोग्राद्विषाद्रक्षिता-
स्ते वयं सादरं नमामः स्थापकाः ॥८॥

वयं लिङ्गतोभद्रदेवाः स्म ईश !
विशिष्टे सुयागे प्रपूजन्ति भक्ताः ।
महादेवमुख्या बुधाश्चाऽत्र वेद्यां
सदा विद्यमाना भवामः सुखार्थम् ॥९॥

इदानीं प्रचण्डे विषे जायमाने
समस्तान्निराशायुतान् शोकतप्तान् ।
कथं जीवनं रक्षितं स्यादितोऽग्रे
भृशं पीडितान्नः स रक्षाकरोऽभूत् ॥१०॥

इदानीं श्रीमता देवदेवेन घोराद्
गरान्मृत्युरूपाद्विमुक्ताः समस्ताः ।
क्रतूनां समेषां विशिष्टाः सुराः स्मो
नमामोऽनिशं त्वां जगद्वन्द्यदेवम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधिककुशलिनो लिङ्गतोभद्रका
अमरकुललग्ना यज्ञसम्पादकाः ।
परिजनसकलानामनन्तादिका
अवनसुनिरता अश्वतारादिकाः ॥१२॥

उपकरणपरास्तेऽसिताङ्गादिका
बृंहत इह गरसंहारभैरवाः ।
समसमवनकर्त्रा वयं क्ष्वेडतः
पदपशुपतिना रक्षितास्तं नुमः ॥१३॥

वयं सर्वतोभद्रदेवाः प्रसिद्धाः
समे सर्वयागेषु पूज्याः समन्तात् ।
विधात्रादिका विश्वदेवा अनेके
जगद्रक्षकाः सौख्यदाः सर्वदैव ॥१४॥

प्रयागादितीर्थेषु यागा पुरा ये-
ऽभवन् सर्वदा तेन ते यागनाम्ना ।
रहस्यं हि यज्ञीयमेतत् प्रसिद्धं
प्रपूर्वा अभूवन्निदं वेत्तु विद्वान् ॥१५॥

इदं भीषणं स्थावरं जङ्गमञ्च
विनाश्यैव शान्तो भवेन्निश्चितं तत् ।
समस्या विजाता जनानां तदानीं
विषाद्रक्षणं केन कार्येण कार्यम् ॥१६॥

तदानीं भवान् सर्वशक्तेः सुमूल-
मुपास्यः शिवो जायतां शङ्करोऽसौ ।
ततो दुःखितानामवस्थां विलोक्य
विनाश्यैव शत्रुं विषं रक्षिताः स्मः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रणामञ्च साष्टाङ्गपूर्णं भवत्सु
विधायैव सर्वे वयं लब्धलाभाः ।
श्रितास्त्वामभूम प्रभो दुःखनष्टाः
कलत्रादिभिः संयुता बन्धुवर्यैः ॥१८॥

वयं क्षेत्रपाला जनैर्मानिताः स्मः
सदा क्षेत्ररक्षाव्रता आदिकालात् ।
स्वयं तत्पराः क्षेत्रकार्ये जनानां
बलेः प्राप्तिभोग्या विशिष्टाः प्रयागे ॥१९॥

बलेर्दायका ये विशिष्टा गृहस्थाः
सदा ते सृताऽस्माभिरालोक्यमानाः ।
इदानीं च तेनैव दुःखाब्धिजातं
समूलं समानाशितं स्वीयशक्त्या ॥२०॥

न तेषां कदाचिच्च दुःखादिवृद्धि-
रहोरात्रमेतेषु पुत्रादिसम्पत् ।
दिवौको गुरुः शङ्करः सर्वसाक्षी
समस्तेषु विघ्नेषु नित्यं प्रहर्ता ॥२१॥

इदानीं वयं घोरकालाद्विमुक्ता
विषात् सर्वथा सर्वदा शत्रुभूतात् ।
समस्तं जगद्भक्षिकं चात्र लब्धो
विनष्टो महेशस्य शक्त्या समूलः ॥२२॥

गणेशेन युक्ता वयं मातृकास्ताः
सदा सर्वदा षोडशाङ्काङ्कसंख्याः ।
युताः स्मो बुधा ज्ञायतां तत्त्वमेतत्
प्रकृष्टेषु यागेषु सर्वत्र पूज्याः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सगणपतिजनन्यः सर्वथा लोकरक्षाः
सकलजनमनोमोदाय गौर्यादिकाः स्मः ।
अनवरतकृतं माङ्गल्यकार्यं सदैव
ह्यतिशयसुखदाः सर्वत्रमान्या समेषाम् ॥२४॥

सदसि सदसि वन्द्याः शाक्तयोगेनयुक्ताः
सुखवितरणकार्ये मातृतुल्याः स्म इत्थम् ।
इह विषजनिते कोलाहले शान्तिदात्र्यो
गरलशमनकर्त्रे शम्भवे ते नमस्ते ॥२५॥

वयं मातृकाः सप्तसंख्याः प्रसिद्धाः
सदा सौख्यदानाय लग्ना जनानाम् ।
विशिष्टेषु यज्ञेषु सर्वत्र पूज्याः
समाराध्यमाना जनैर्यागशीलैः ॥२६॥

सुकीर्त्यादिकाः शारदान्ताः समस्ता
अजस्रं विवृद्धिप्रदायैव शान्ताः ।
तथा मङ्गलादीनि दातुं प्रवीणा
नतास्तं शिवं प्राणदं जीवदात्रे ॥२७॥

यदा यत्र जायेत राष्ट्रस्य रोधो
न दृश्यो न वा श्रव्य एवं विचित्रः ।
तदा शङ्करो देवदेवाधिपोऽसौ
प्रजागर्त्यवस्थासु घोरासु गोप्ता ॥२८॥

महाविप्लवो जीवविध्वंसकारी
अनर्थो गरः सर्वसंसारनाशी ।
महायोगिना देवदेवेन शीघ्रं
प्रपीत्वैव विध्वंसितो रक्षिताः स्मः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातृपक्षास्तथा पितृपक्षाः समे
दिव्यपित्रादिकास्ते वयं संहताः ।
पूर्वकालात् सविश्वैर्हि सम्मानितं
तं नमामो गिरीशं विषध्वंसकम् ॥३०॥

श्रद्धया कार्यकार्येषु सर्वैर्भृशं
सर्वलोकेषु नित्यं सुरम्येषु च ।
पूजिताः स्मो वयं श्राद्धकाले सदा
आशिषं दध्म आत्मीयकेभ्यो भृशम् ॥३१॥

निष्ठया संस्कृतानां च तेषां सदा
वाक्यशुद्ध्यादिकं सर्वथा संश्रितम् ।
जायते सर्वथैज्येषु विज्ञेष्वपि
एवमेवं सदा कुर्वतां नो भृशम् ॥३२॥

शत्रुभूतो गरः सम्मुखं वेगतः
सङ्गतस्तत्र कोलाहलोऽजायत ।
मूर्च्छिताः स्मो वयं तर्षिताश्चेति स
देववृन्दैर्नुतेनाऽद्य संरक्षिताः ॥३३॥

नमामो वयं तं देवदेवं सदा
येन विश्वस्य शत्रुर्विषं नाशितम् ।
ईदृशः सर्वभस्मीकरो विप्लवो
नैव पश्चात् कदाऽप्यत्र दृष्टो भवेत् ॥३४॥

साम्प्रतं दिव्यलोको ह्ययं पैतृकः
सर्वलोकैः सहाऽत्यन्ततो रक्षितः ।
भाग्यवन्तो वयं सर्वथा रक्षिताः
यैश्च पश्चाद्धि लब्धा पवित्रा सृतिः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेन विश्वस्य रक्षावृतेनेदृशं
कार्यजातं कृतं सर्वथा दुर्गमम् ।
सर्वजीवैरजस्रं समाराध्यत
ईश्वरः स्मर्यते सर्वदोऽसौ शिवः ॥३६॥

सततवहनशीलसंयुतास्तेऽ-
सुधरकजीवकदम्बपाललीनाः ।
उपकरणपराः सदैव चाऽत्र
विविधनदीनदकोटिका अजस्रम् ॥३७॥

प्रतिविषयवहेन सिञ्चितास्ते-
ऽवनिनिवहाः सततं सुधान्यफुल्लाः ।
अतिशयजलदानकार्ययुक्ताः
सकलसुखाय सदन्नदानयत्नाः ॥३८॥

प्रकृतिजनितवृक्षगुल्मवल्यः
सततमिमा जललाभशोभना द्राक् ।
बहुजललभनेन सर्वजीवा
निरतिशयं सुखिनः सुशोभमानाः ॥३९॥

असुधरसकलस्य सर्वमूलं
मृदुसलिलं समवाप्य धन्यभूताः ।
अचरसचरजीवकाः प्रफुल्ला
अथ फलिता सततं मनोज्ञजाताः ॥४०॥

बहुजलयुतराष्ट्रजसुकीर्ति-
रतिशयिता भवतीति नाऽत्र शङ्का ।
जलबहुधरदेशजा मनुष्या
अधिवसुधमजस्रसज्जितास्ते ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुविधनगराणि वारिपूर्णे
धनिविषयेषु नदीसमुद्रतीरे।
नगरवसतयो जनैः क्रियन्तेऽ-
त इह धरा समभागगा समस्ता ॥४२॥

सपदि जनितशत्रुरूपभूतं
विषमधिकं सकलस्य दुःखदातृ।
सुखदसमयजायमानचित्रं
पशुपतिवितीर्णमिवात्र जातम् ॥४३॥

वयमिह वहमानवारिवाहा
विमलनदीनदनिर्झराश्च वाप्यः।
विषपगिरिशदेवरक्षिताः स्मोऽ-
त इह समागतमीश्वरं नमामः ॥४४॥

विषमविषचयेन चालिताः प्राङ् -
निरतिशयं नदवापिकाश्च कूपाः।
सकलविकटशोषकाः सनद्यः
पशुपतिरेव सुरक्षको विषात् सः ॥४५॥

इति सकलगणा अचिन्तयँस्ते
सपदि भवान् भगवान् विषस्य शत्रुः।
प्रकटित इह सर्वलोकपाता
वयमधुना नतमस्तका नतास्त्वाम् ॥४६॥

अचरसचरजीवनं समस्तं
जलशरणं सकलं जगद्धि सत्यम्।
भवदुपकृतिमूल्यसागरं ते
न समजलानि कदापि विस्मरामः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलबहुलधराविवृद्धवृक्षा
रुचिरलता विविधा महीरुहस्थाः ।
अगणिततरुगुल्मजालनद्धा
अतिशयमीदृशभूमिजाः सुशोभाः ॥४८॥

वनशतविभवाः सपुष्पफल्या
अकुसुमफल्यकुटाः पतत्रिवासाः ।
शुभतरव इह ते मनो हरन्ति
हरिगजमृगजन्तुवासभूताः ॥४९॥

गवयकरिगणैः सखड्गियूथै-
र्वनमतिभीतिकरं च कुत्र कुत्र ।
विविधखिलजीवजन्तुयुक्तं
परित इहाऽवरदा समस्तजातिः ॥५०॥

त्रिजगति सृतसर्वजीवसंघाऽ-
थ च जडपदार्थनाश उग्रम् ।
सपदि जनितशत्रुविषं विनाश्याऽ-
खिलजगदवितमीश्वरेण शीघ्रम् ॥५१॥

वयमिह शिवकृत्यमूल्यदातु-
मयुतशतैरपि जन्मभिर्न शक्ताः ।
सकलभुवनरक्षणाय लग्नः
सरलतया विदधाति सर्वकार्यम् ॥५२॥

जननमरणहारकर्मशीले
नहि कठिनानि भवन्ति सर्वशक्तौ ।
पशुपतिरखिलस्य कारकोऽस्ति
समपतिनाऽरिविषात् सुरक्षिताः स्मः ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयुतशिरस उच्चवंशजाता
उरगवरिष्ठतमाश्च तद्गुणानाम्।
स्तवनगणनकर्मणि नात्र शक्ता-
न्यत इह सर्ववनानि तं नतानि ॥५४॥

अगणितवनसङ्घशोभमानाः
सततवहैर्झरसिन्धुसरित्समेताः।
अयुतशतनदीमनोज्ञजाताः
सततमहो इह पर्वता वयं स्मः ॥५५॥

जनकथनमिदं प्रसिद्धमास्ते
यदचलका हि सुदूरगास्तु रम्याः।
सततमिह समीपगाश्च रम्या
अचलसुरोहणशक्तवाक्यमेतत् ॥५७॥

नहि धरणिधरा हि पर्वता वै
सततधरोपरि वर्तमानसंस्थाः।
इह विदिततमाः सदैव लोकै-
रवनिरसोद्धरणाच्च भूधरास्ते ॥५८॥

अचलजनितरत्नहेमखन्यः
प्रचुरजले बहुमूल्ययुक्तमुक्ताः।
विविधझरनदैः सुनीतरत्नैः
प्रकथित उत्तमवेत्तृभिः सरत्नः ॥५९॥

अगणितमणिरत्नहेमभूम्यः
प्रवहति रत्ननिधिः समुद्रमुख्यः।
बलवति सुनदे गतैः स रत्नैः
प्रथिततमो भवतीति नाऽत्र शङ्का ॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरित इह नदा नदी च गण्या
जलततिकाः प्रचुराः शिलोच्चयाप्ताः ।
सरिदिह न कदापि भवेद् वरेण्या
न भवति यदि रत्नवहे सुदक्षा ॥६१॥

अगणितबहुमूल्यसरत्नरुक्मा
बहुविधमानवलभ्यभूतनित्याः ।
प्रकथितविविधैर्धनैः सुयुक्ता
वयमतिमात्रपदार्थधन्यभूताः ॥६२॥

अचरसचरकाः समस्तजीवा
वयमधिका असुधारिणो जडाश्च ।
यमनिभविषशत्रुतो विभीता
इह भवदाश्रिता सुतरां नमामः ॥६३॥

आचार्यव्रतपूर्णचन्द्ररचिते श्रीनीलकण्ठाश्रिते
पानात्तीव्रगरस्य शान्तिशुभयुग्विश्वस्य सन्दर्शके ।
काव्ये देवनरादिभिः कृतनुतौ सर्गश्चतुर्विंशकः
पूर्णो बाणकरं पठन्तु रसिकाः शम्भोः कृपालालसाः ॥६४॥

॥ इति चतुर्विंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चविंशः सर्गः

(सामुद्रतीव्रविषसन्तप्तकलायुतदेवादिकृतशिवस्तुतिवर्णनात्मकः)

विविधकलायुतशक्तयो वयं
सकलजगत्स्थितपीठसङ्गताः।
असुरपीडितजीवसुरक्षकाः
सततदिवौकसरक्षणे दृढाः ॥१॥

अहह ! कियद्दिनमाकुलं ह्यदः
प्रखरविषं जनचेतसां हरम्।
उदितमिहावगतं सकलैर्हि यत्
सपदि शिवेन विषं सुपीतमोम् ॥२॥

सकलजगत्तु विषस्य तापजात्
प्रखरतराद् व्यसनाद्धि मोचितम्।
अतिशयिताऽनितरैरशक्यताऽ-
युतसुकृपा विहिता ह्यपूर्विका ॥३॥

सकलचराचरमातृका वयं
सकलकृताऽकृतकर्मवेदिकाः।
पशुपतिकार्यमिदं विचित्रक-
मितरजनैर्न कदापि शक्यकम् ॥४॥

निरतिशयस्य शिवस्य कर्मणः
स्तुतिविनती न कृते यकैर्यदा।
अजडजडैर्न कृतं च पूर्यतेऽत
इह समे प्रभवन्तु निर्मलाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मरहर उच्चतरेऽत्र चाद्भुते
विषमविषाख्यसुवैरिणो हरे।
असुधरसर्वहितस्थकम्पितो
विकटबलप्रभुतावशात्सृताः ॥६॥

सूर्यानन्तप्रभश्चन्द्रानन्तशीतोऽस्ति शर्वः
दावानन्तश्च तेजस्वी भीम आनन्त्यरुद्रः।
आकाशानन्तविस्तीर्णोऽनन्तकालश्च रौद्रः
कौबेरानन्त–ऋद्धेर्भूर्विष्ण्वनन्तप्रमादी ॥७॥

सिन्ध्वानन्त्यप्रविष्टारो वाय्वनन्तप्रवीर्यः
हेरम्बानन्तलावण्यो सौर्यसीमास्ति तच्छिवे।
आनन्त्यौजोमयो ध्रष्टाऽपि प्रभुरीश्वरोऽस्ति
नम्योऽस्ति प्राणिसर्वैर्हि प्रत्ययो जायतां द्राक् ॥८॥

अभूच्छिवो निरतिशयं हि तृप्तिमान्
ततश्च सोऽभवदनिशं न सङ्ग्रही।
सदाऽन्यके सकलसुराः सुसङ्ग्रहाः
विपत्स्थितौ निखिलका आगतास्तम् ॥९॥

किमत्र भोरधनतया सुपीडिताः
प्रसाधनभवितुमलं विजायते।
सुमन्थने तदुभयपक्षसङ्गते
तदत्र ते सुमथनतः सुसम्पदाम् ॥१०॥

प्रलब्धुकामदिविसदः सुसङ्गताः
समुद्यतैरुभयजनैर्भयङ्करम्।
तदादभुतं मथनविषं प्रचण्डकं
सुघोरकञ्च सकलध्वंसकं बृहत् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदृश्य सकलमथाः सुदुःखिता-
स्ततश्च विबुधा दितेः सुता दृढाः ।
प्रवृत्तिके स्वकृतमथेऽव्यवस्थया
विरोधनं कथमपि नैव भूयताम् ॥१२॥

इत्याकुला मथनरता निरन्तरं
परञ्च ते प्रसृतविषस्य भीषणाद् ।
सद्रोहकात् प्रखररयाद् भृशं हताः
अनिच्छया स्वकृतमथेऽपि विसर्जिताः ॥१३॥

अदो विषं सकलजगन्नशे क्षमं
सुतीव्रका तदप्रियस्य विनाशकाः ।
कदाऽवकः सकलचराचरस्य कः ?
वयञ्च तां भयदशत्रुशुचा व्यथां गताः ॥१४॥

सदोदयो निखिलजनापदां हरो
हरः प्रभुः सपदि कृपायुतोऽवकः ।
महेश्वरः सदैव सुरक्षको दृढः
स्वयञ्च सोऽतिशयहतानतैः स्तुतः ॥१५॥

सदैव वृतो विषनाशने दृढः
जलं यथा पिबति सदा सतर्षकः ।
तथैव सोऽपिबदिति कष्टदं विषं
प्रदर्शकाः सकलजगत्स्थिताः समे ॥१६॥

विपत्तितोऽसुधरसमे नियन्त्रिता
अहो जनाः पशुपतौ हि सुनिर्भराः ।
जगत्सकलं गिरिशः शिवः सुरक्षती-
ति निश्चिता अतिशयसौख्यसंयुताः ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विपत्तितो निखिलजना विघट्टिताः
समे जनाः पशुपतिदेवरक्षिताः ।
भविष्यन्तीति सुविचारकाः समे
सुशेरते प्रतिदिनमात्मभक्तितः ॥१८॥

स्तुतश्च सोऽतिशयमनोज्ञवाक्शतै-
र्विद्याप्रदैर्गुरुवरपण्डितैर्दृढम् ।
अतीव ते विशदसुवासजनैर्नुतः
सदाशिवोऽति विजयते जगत्त्रिके ॥१९॥

सकला विषभीतिदुःखिताः
शिवसंरक्षितबन्धुसंयुताः ।
विविदन्तुतमां विशेषत-
स्त्रिजगत्-स्थित-जीवसञ्चयाः ॥२०॥

अतिघोरविषोदयो महान्
धनलुब्धाधिकजीवहानये ।
धनलब्धिनिमित्तसंयुता
धनहीना असुरा सुराश्च ते ॥२१॥

जलसम्प्लवभूस्खलद्धता
अतिदीना अतिनिस्वकाः सदा ।
ऋषिकश्यपपुत्रकोविदा
अरिभूताश्च धनाय मीलिताः ॥२२॥

अति शीघ्रतया प्रमन्थने
समपेक्षान् सकलान् पदार्थकान् ।
विनिगृह्य शुभे क्रमे दृढाः
कटिबद्धा अभवन् हि काश्यपाः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुमूल्य मणीन् सहस्रशो
रुचिना स्वात्ममनोहरान् हि तान्।
शुभरत्नसुकोटिकानि च
समचिन्तन् हि सदाऽत्र काश्यपाः ॥२४॥

अधुनोग्रविषेण मन्थन-
मवरुद्धं विहतं धनार्थिनाम्।
वत देवसुरारिभं दृढं बलं
रिपुघोरेण विषेण नाशितम् ॥२५॥

मथदूरगताः सकला इमे
विषभीताश्च पलयिताः पृथक्।
बुधकश्यपजोभये तदा
गरनाशस्य विचारका भृशम् ॥२६॥

सहसैव मथे तदद्भुतं
विषमुग्रं त्रिजगद्विनाशकम्।
प्रकटं सुविलोक्य दुःखिता
विषकोलाहलतश्च कम्पिताः ॥२७॥

इदमित्थ महो भविष्यति
श्रुतदृष्ट्याश्च समाकुलीकृताः।
निखिलेषु जगत्सु वासिनः
प्रभविष्यन्ति सुभस्मसात् खलु ॥२८॥

इदमीदृशचिन्तयाऽऽवृता
विषनाशस्य क्षणं प्रतीक्षकाः।
विषपीडनदुःखिता इमे
सततं शङ्करलग्नमानसाः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भगवान् गिरिशो भयंकरो
विषनाशाय समुद्यतो भृशम्।
सुकृतिस्तुतिवृन्दमाददत्
सहसा प्राप्तविषस्य नाशने ॥३०॥

दृढभूमियुतां सुयोगजां
स्थितिमास्थाय दृढं महाबलम्।
ज्वलरूपविषं भयङ्करं
क्रमशः पातुमिदं जिघत्सु च ॥३१॥

उदधिं परितः स्थिता जना
विषमूर्च्छामृततुल्यतां गताः।
इतरे च पलायिता भृशं
तत आश्चर्ययुताः कियन्त ओम् ॥३२॥

विततं शिवपीतमद्भुतं
गरलं दुःखकरं सुतीव्रकम्।
अवलोकनताः समे जनाः
शिवशौर्यं सुसमीक्ष्य सन्नताः ॥३३॥

अयमीदृशघोरकर्मवान्
विषभक्षी दिविषत् सुशक्तिमान्।
अत एव स देवदेवको
नितरां श्रेष्ठसुरासुरैर्नुतः ॥३४॥

वत दर्शकवृन्द सम्मुखे
सकलं पीतवते च शम्भवे।
नतमस्तकयुक्तदेहिनो
बहुवारं कृतवन्त आनतिम् ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवशिष्टविषं प्रसिञ्चक-
मुरगा वृश्चिकजातयोऽपिबन् ।
अनया विधयाऽभवद् दृढं
सकलं विश्वमिदं निरामयम् ॥३६॥

अतिघोरतरेऽत्र तत्क्षणे
नशनं सर्वसमाजवीक्षितम् ।
शिवपानजहर्षतः समे
नितरां सम्मुदमापुरीक्षकाः ॥३७॥

तत आत्मजनैः समित्रकैः
सकलाः पूर्ववदेव मन्थने ।
कटिबद्धतया स्वकर्मणि
नितरां प्रपुरभीष्टलब्धये ॥३८॥

विषमस्य विषस्य तत्क्षणे
नशनं सर्वसमाजचिन्तितम् ।
शिवपानजहृष्टजनाः समे
सुतरां सम्मुदमापुरीक्षकाः ॥३९॥

ऋषिमुख्यसुरादिपैतृकाः
निधिलब्ध्यै प्रथमं पुरा यथा ।
गतशङ्कतयाऽऽगमँस्तदा
पुनरारब्धमिदं प्रमन्थनम् ॥४०॥

इत आद्य दिनात् सुरासुरै-
र्जनसम्पर्ककृता प्रयत्नतः ।
भयपूर्वयुताः समाजगाः
समभूवन् सकला अशङ्किताः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषविप्लवनाशतोऽधुना
विबुधा सम्प्रति शेरते भृशम् ।
नितारामिह लग्नकैर्जनै-
रिह भूयेत फलग्रहैर्ध्रुवम् ॥४२॥

सुरदैत्यकृतं सुमन्थनं
प्रतिबन्धेन निरोधितम् ।
अधुना यतनेन संस्थितैः
सकलैः सुष्ठुतया सुचालितम् ॥४३॥

विधिपूर्वकमन्थनात् खलु
सुमिलिष्यन्ति सुरत्नकोटयः ।
अवसानदिने परस्परं
प्रभवेद्रत्नविवण्टने विरुट् ॥४४॥

अमृतस्य कृते महान् कलः
प्रभवेत् विश्वकुतूहलाकरः ।
उदधेः परिलब्धसम्पदा
दृढदैवासुरयुद्धजं भयम् ॥४५॥

अधुना वयमत्र भाविनां
घटनानां परिसूचने द्रढाः ।
कतमे समये च किं भवे-
दखिलं वर्णितुमीशिता च कः ॥४६॥

सम्पूर्णायां विश्वशक्तौ स्थितोऽसा-
वुत्कर्षोऽयं चन्द्रमौलौ स्थितोऽस्ति ।
तेनैवास्याः सर्वशक्तेः समस्तं
स्रोतोविज्ञैः शङ्करे कीर्तितं तत् ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वातन्त्र्याऽनन्त्यद्विके च शक्ती
तत्रैवोग्रे स्तः सदा विद्यमाने।
आख्यानाशक्ये सहस्रानननैस्तै-
स्तस्यैवेशस्याङ्गभूता वयं ते ॥४८॥

शर्वोऽसौ वै नित्यदा विश्वकर्ता
विश्वं सर्वं रक्षको हारकश्च।
सर्वाञ्जीवान् स्वस्वकार्ये नियुङ्क्ते
तेनैवाद्यैकात्म्यभूताः समस्ताः ॥४९॥

आदेः कालात् सर्वथाऽसौ महेशोऽ-
स्माभिर्नित्यं वन्द्यते नन्द्यते च।
सोऽस्माकं स्याद्रक्षकः पोषकश्च
विश्वत्राता सर्वगो विश्वरूपः ॥५०॥

अनन्तसूर्यप्रतिमप्रकाश-
स्तथा ह्यनन्तेन्दुमरीचिमाली।
एवं ह्यनन्ताम्बरतुल्यविस्तृत-
स्तथैव विष्ण्वन्तरशत्रुमर्दनः ॥५१॥

आनन्त्याब्धेः सन्निभोऽसौ गभीर-
स्तद्वत् कालस्यापि विध्वंसकारी।
गम्यो न शोच्यः सकलैः सदैव
शक्तो भवेत्तस्य कृतौ कथं कः ॥५२॥

नमामो वयं तं नमामो वयं तं
स्मरामो वयं तं स्मरामो वयं तम्।
कृतं तेन सर्वं कृतं तेन सर्वं
कृतं तेन सर्वं कृतं तेन सर्वम् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनाः प्राणिताः प्राणितास्तेन सर्वे
जना जीविता जीवितास्तेन सर्वे।
प्रचण्डं विषं तेन पीतं समस्तं
गलस्तस्य जातः सुकृष्णः सुकृष्णः ॥५४॥

अहो भाग्यवन्तो वयं भाग्यवन्तो
महादेवदेववेन रक्षाकृताः स्मः।
अनेकाश्च जाता दिवं सङ्गतास्ते
न केषां शरीराणि पुष्टानि नाऽसन् ॥५५॥

शान्ता आराधका पूजाकारिण्योऽस्माकं नित्य-
मैच्छन् यैरायुषा पृथ्वीगामिरसितश्रिप्तास्ते ।
दत्तैरस्माभिरत्यन्तं द्रव्यजातैः सुपूर्णाः
पूर्णकाङ्क्षाः सर्वथा सन्तानैश्च युक्ता भवन्ति ॥५६॥

आचार्यव्रतपूर्णचन्द्ररचिते विद्वज्जनानन्ददे
साहित्यात्मभवै रसादिविविधैर्युक्ते मनोमोददे।
काव्येऽस्मिन् भवशक्तिवर्णनमये बाणाक्षिसर्गो गतो
षड्विंशञ्च बुधा विलोक्य सुखिनः स्युर्देवदेवाधिपात् ॥५७॥

॥ इति पञ्चविंशतितमः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षड्विंशः सर्गः

(मातापितृगुरूणां त्रिदेवैः सह समतावर्णनात्मकः)

माता पिता गुरुवराः पृथिवी च लोके
पूज्या भवन्ति मनुजस्य यथैव नित्यम्।
आध्यात्मिके जगति पूज्यतमास्त्रिदेवा
ब्रह्मा हरिः शिव इति प्रथिताश्च विश्वे ॥१॥

माता यथा जगति भौतिकवस्तुजातौ
ह्याध्यात्मिके शृणु तथैव स सृष्टिकर्ता।
यत्स्थानमत्र जननी सततं विभर्ति
तत्स्थानमेव तु स तत्र पितामहोऽसौ ॥२॥

यादृक् पिता जगति रक्षक आत्मजाना-
विष्णुस्तथैव वत रक्षक ईशजानाम्।
यत्स्थानमस्ति हि पितुर्नितरां जगत्यां
तत्स्थानमेव हि हरेर्नितरां परत्र ॥३॥

यादृग्गुरुर्भवति सौम्यसुबोधदोऽत्र
तादृक् च तत्र जगतीज्यशिवः सदैव।
यत्स्थानमत्रजगतीष्टगुरोः पवित्रं
तत्स्थानमेव निखिलस्य गुरोः शिवस्य ॥४॥

पृथ्वी यथाऽवति शिवादृतभौतिकेऽत्र
ह्याध्यात्मिके जगति रुद्रकृता विचित्रा।
मायाऽथवा प्रकृतिरेकविधा न साऽस्ति
तेनैव तत्र निहिता बहुशक्तिपूजाः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वी यथैव सकलस्य सदा नतस्य
भौमप्रपञ्चनिवहस्य हि पृष्ठभूमिः ।
मायाऽथवा प्रकृतिरस्ति सदैव यस्य
चाध्यात्मिकस्य तदमुष्य च पृष्ठभूमिः ॥६॥

भौमप्रपञ्चसकलव्यवहारमूले
माता पिता गुरुवराः शुभसूत्रधाराः ।
सत्यं तथैव चतुराननविष्णुरुद्रा
मायावृतप्रकृतिजन्यक्रियाश्रयास्ते ॥७॥

अध्यात्मभौतसकलव्यवहारसूत्र-
धारा इमे प्रथमतः कथिताः समे ते ।
नैवास्ति काचिदपि कुत्रचिदेव शङ्का
सिद्धान्त एष इतरैरपि मानितोऽस्ति ॥८॥

एकोऽहमत्र नितरां बहुसंख्यकः स्या-
मित्येव हीशमनसा बहुचिन्तितं प्राक् ।
तद्भावनानुसरणेन तदा स ईशो
ब्रह्मा बभूव सचराचरविश्वकर्ता ॥९॥

ब्रह्मप्रसूतिजचराचरवस्तुसंख्यां
पातुं सदैव स हरिर्नितरां प्रवृत्तः ।
तत्पौरुषात् कृतविचित्रविधावतारै-
र्ब्रह्मप्रसूतसचराचरजान् पिपर्ति ॥१०॥

लोकेशसृष्टसचराचरविश्वसंस्थान्
सर्वान् पदार्थनिवहानवितुं स ईशः ।
विष्णुर्बभूव सुतरां प्रखरोऽत्र गोप्ता
रक्षां विना विधिसुवां न हि किञ्च मूल्यम् ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं विचित्रबहुशः स्ववतारभेदै-
र्जागर्तिरक्षणविधौ जगदीश एषः।
यर्हि स्वयं हरिरयं विविधावतारै-
रङ्गीकृतैरपि पदार्थसुरक्षको न ॥१२॥

स्वल्पा यदा सुजनता बहुपापिनः स्युः
सत्कर्महीननरसङ्कुलकैर्वृताश्च।
पृथ्वी च भारसहना न भवेद् यदैव
तर्ह्येव रुद्रवपुषा स शिवोऽत्र भूयात् ॥१३॥

एष क्षणो वत हरेः सकलावतारैः
क्षीणत्वशक्तिरहितत्वयुतो विचित्रः।
अस्यां स्थितौ निखिलशक्तियुतस्त्रिलोकी
लोकान् दिधक्षुरिव सुस्थितिमातनोति ॥१४॥

इत्थं यदा कृषकसङ्घकृते प्रकृष्टे
भूमण्डले त्रिचतुरा यदि येऽङ्कुराः स्युः।
ते स्वस्थरूपरमणीयतमा अपि स्युः
सङ्कृष्य तत्र पुनरन्यविधानि चोप्यात् ॥१५॥

चण्डीश एवमजजातकलेवराणां
रक्षां न वीक्ष्य सरुषं सुविमृष्य तत्त्वम्।
सर्गस्य रक्षणविधेश्च निरर्थकत्वं
मत्वैव भीषणवपुर्निखिलं दहेत् तत् ॥१६॥

एवं हि विश्वजनिरक्षणनाशकृत्यं
प्रोक्तं विधिस्वभुभवैर्विहितं मुनीन्द्रैः।
शास्त्राणि वेदसहितानि तथैव प्रोचु-
र्विश्वस्य वीक्षणविधाश्च न संशयोऽत्र ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदैवैका मूर्तिर्विधिहरिहरा विश्वगुरव-
स्त्रयोऽप्येवं वैते कथमपि न भिन्नाः सुखकराः ।
तथापीत्थं ज्ञेयं सुरवरसमेषां व्यवहृतौ
महान् भेदोऽस्त्येषस्त्विह च कथनीयोऽस्ति स खलु ॥१८॥

सदादर्शः श्रेष्ठः सुगृहपतिरोजोगुणयुतः
कदाचित्कन्यानामुपयमविधौ प्रातरनिशम् ।
प्रवृत्तो मध्याह्ने भवति गृहरक्षापरवशः
स एवैकोऽज्ञानाद्विषनिरशने रात्रिमिलितः ॥१९॥

विनाशो रुद्रेण प्रखरबलवत्वेन सहसा
निहीनानां पाप्मनां क्रियत अनिशं दोषशतशः ।
अतः संहर्ताऽसौ निगदित इदं सत्यकथनं
ततश्चाऽनेकेऽमुं निरतिशयवीर्येशमविदन् ॥२०॥

सदा ज्ञानेनैव प्रभुरमरमुख्यः सुरसभे
तथा योगेनैव प्रतिदिनमहान् योगिसदसि ।
अचिन्त्यैः शक्तीनां प्रमुखपरिणामैश्च शिवजं
सदेवैर्योगीन्द्रैरपि शिरसि व्यूढं शिवमतम् ॥२१॥

इदानीमुक्तेषु प्रमुखनिजकार्येषु ग्रहपो
विशिष्टेषु ज्ञानेष्वनवरतलीनः स तु महान् ।
सदा सर्वत्रैव प्रमुखनिगमैः शास्त्रनिवहैः
समेषां जीवानामतिशयधनं ज्ञानमुदितम् ॥२२॥

इमे स्रष्टा पाता हरणपररुद्रश्च क्रमशो
यथोर्ध्वं सार्थक्यं सततमुपगृह्णन्ति नियमात् ।
न कोऽप्यादत्तेऽसावितरसुरपाणां निजबलं
तथैवेतेषां सा प्रकृतिरमलाऽवश्यसुखदा ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतश्चैकेकेषां प्रकृतिकृतकार्येषु नितरां
विमर्शं कृत्वैव क्रमश इह दत्तैः सुखकरैः।
विधेरुत्पन्नैस्तैररिबलमथो विश्वमखिलं
पदार्थैश्चाकृष्टं प्रतिदिनमदो स्तौमि तदिदम् ॥२४॥

ब्रह्मा सर्गकृते भवेन कथितो पूर्वं तपस्यास्थित-
स्तच्छीघ्रं विनिवर्त्य वर्षबहुलं तीव्रं श्रमञ्चाश्रितः।
पूर्वं वृक्षलताप्रगुल्मनियुतान् सृष्ट्वा सभूमिं विभु-
र्दृष्ट्वा सर्वत आत्मजं हरितिमं तत्कालमानन्दितः ॥२५॥

ऋष्यादींस्त्रिदशान् सदैत्यमनुजान् गृध्रानुलूकान् खगान्।
सिंहान् गोवृषमत्स्यसर्पमशकानोतूनजान् शृङ्गिणः।
शैलान् निर्झरकुञ्जकुञ्जरनदीर्वन्यौषधीर्धान्यकं
खाद्यं पेयजलं सुचोष्यममलं लेह्यं तदैवाऽसृजत् ॥२६॥

देवेषूत्तमदेवराजमनसां सम्यङ्मनोरञ्जने
सृष्ट्वा तास्तत उर्वशीप्रभृतिकान् गन्धर्वविद्याधरान्।
सृष्टैर्यैः सततं सुरेन्द्र उचितं सम्यङ्मनोरञ्जनं
प्राप्नोत्येवसुखंसदैवविफलोनैवाऽभवज्जातुचित्॥२७॥

पूर्वं सृष्टिकृते स यत्ननिरतः स्वीयान् बहून् मानसान्
पुत्रान् वीक्ष्य तुतोष नैव भगवान् कृत्वा शरीरं द्विधा।
सृष्टिं द्राक् समचारयत् सुखकरैः स्वीयैः सदा तत्परैः
केचित्ते सनकादयस्तु विधिना शप्ता अनाज्ञाग्रहाः ॥२८॥

लोकेशस्य मनोजपुत्रदशके शप्तोऽप्यसौ नारदो
विष्णोर्भक्तियुतो विरक्तविधुरो नोद्वोढवान् काममपि।
विश्वस्यैव सुरक्षणे प्रयतितः श्रीविष्णुदेवस्य हि
युक्तेदृग् वसतां सतां नयवतां श्रीवैष्णवानां मतिः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रीँल्लोकाँश्च समासतो विरचयँल्लोकाननेकान् धिया
सृष्ट्वा तान् विपुलाँश्चतुर्दशविधिः किञ्चित्सुखं प्राप्तवान्।
तत्तल्लोकनिवासिनामसुमतां जीवीयरक्षाकृते
भक्ष्यादीन् विविधान् पदार्थनिकरानाश्चर्यदानसृजत् ॥३०॥

सृष्ट्वाऽतर्पयदात्मजान् मतिमतां श्रेष्ठोऽग्रणीरात्मभू-
र्वेदादीँश्च समस्तशास्त्रबलदानन्यान् प्रकारान् बहून्।
सन्तोषेण सहैव सोऽतिशयितः प्राप्नोत् सुतुष्टिं परां
तत्तच्छाश्त्रपम्पराप्रचरणाद् वेदप्रचारादपि ॥३१॥

वस्तूनां विविधान् स्वरूपविभवान् प्रत्यक्षदर्शी स्वयं
ब्रह्मा स्वस्य हृदि प्रफुल्लित इतः प्राबोधि तद्गौरवम्।
येनात्रैव न हि प्रभूतनिखिले विश्वेऽपि कीतिर्दृढा
तत्कीर्त्या मम नाम सम्प्रति कृतं लोकेश सर्वैपि ॥३२॥

देवा दैत्यवरा मनुष्यनिखिला सर्वाणि सत्त्वानि च
मां सर्वेशमिति प्रचिन्त्य सुतरां शुद्धेन चित्तेन तम्।
प्रावोचन् हि पितामहञ्च सततं सत्यं पितृणां पिताऽ-
हंत्वस्म्येवनकिञ्चिदस्तिविमतंयाथार्थ्यमारोहितम्॥३३॥

लोकेशेन कृतान् चतुर्दशविधान् लोकान् तथा प्राणिनो-
वस्तूनि प्रकृतिप्रकर्षबलतो जातानि चित्राणि च।
लाभं लाभमहो जनाः समनुजा देवा अनेके सदा
मोमुह्यन्त इदं ससर्पपतगैर्भुक्तं न कैः किं फलम् ॥३४॥

रम्यास्ताः प्रकृतेर्विशिष्टसुषमाः पान्थप्रसार्थैर्दृढं
मार्गे मार्ग उत प्रकृष्टविपिने वापीतटे विस्तृताः।
दर्शं दर्शमलं विमोहितजनाः स्रष्टुर्विधेर्वैभवं
केचित् प्राप्तफला अपि प्रभुविधेर्गत्वा पुरः प्रोचतुः ॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे ब्रह्मन् ! सुपितामहोऽस्ति च भवान् त्वां प्रार्थयामो वयं
त्वां कर्तारमपि प्रभुं समदृशां वीक्ष्याऽग्रतस्त्वद्ध्रुवम्।
नो ब्रूयास्म यदा कथं नु सहसा शङ्कां क उन्मूलये-
त्तेनेत्थं भवतः पुरः प्रविनतिं सश्रद्धमाकुर्महे ॥३६॥

कर्ता त्वं सकलस्य विश्वजगतो धर्ता च निश्चप्रचं
सृष्ट्या केवलया न नः फलमलं भूयात् कथञ्चित् क्वचित्।
संसारे सततं सुजीवनकृते ज्ञाने धने वीर्यजे
शारीरे च बले समस्य जगतो लिप्साऽस्ति तत्कारणात् ॥३७॥

पृच्छामोऽत इदं ह्यजं प्रथमतः प्रश्नानुसारं वचः
शीघ्रं प्रोच्य यथा कुतूहलमितः स्वस्थान् कुरु त्वं सदा।
नो चेत्त्वां तु वयं यथागतसमा नैवेदृशं मन्महे
उत्पाद्या उत केवलं भगवता पाल्या बलाद्यैर्वयम् ॥३८॥

कायस्याऽथ धनस्य बोधनविधौ नित्यं बलेभ्यो वयं
हीनाः स्मो निरतां कथं वद विभो सम्यक् विचार्यैव च।
शारीरेण बलेन केचन जनाः सन्त्येव सञ्जीविता
ऐश्वर्येण बलेन चाऽपर इमे हीनाः स्थिताः किं प्रभो ! ॥३९॥

एते केचन बोधशक्तिरहिता बुध्या न कर्तुं क्षमाः
कश्चित्तूत्तमसाधनैस्त्रिभिरयं दोदूयते वर्जितः।
ते चैते द्विबलप्रयोगरहिता ऐश्वर्यतन्त्वाऽऽस्थिता
अन्ये केचन देहबोधबलयो राहित्यसम्पीडिताः ॥४०॥

अन्योऽन्ये द्विबलेन बोधधनयोर्नित्यं प्रहीणा जनाः
कस्माद्देवविशेषतः सत इमे स्वाभीष्टसिद्धौ स्वयम्।
गच्छन्तूत्तमदेवसम्मुखमसौ को देव इत्युच्यतां
तं देवं गुरुवद् भजाम भण भोः कस्कोऽस्ति, शीघ्रं कुरु ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्थं मनुष्यैः सबलैरपूर्व-
प्रश्नैः सुसञ्चालित आत्मभूः सः ।
निःश्वस्य दीर्घं बहुकालमग्रे
प्रवोचदेवं सुमहद्रहस्यम् ॥४२॥

यस्मिन् क्षणेऽसौ गदितुं प्रवृत्त-
श्चित्रः सुघोरो ध्वनिरुज्जहास ।
श्रुत्वा ध्वनिं तं मनुजाः सहैव
सन्त्रासमेवं जगदुर्विचित्रम् ॥४३॥

पूर्वं प्रशस्तैः बहुबोध्यजातैः
साकं भवन्तं वत लब्धवन्तः ।
नैवं विधः कोऽपि कदाऽपि शब्द-
स्त्रासस्य दाता श्रुतिगोचरोऽभूत् ॥४४॥

एतर्हि तच्छब्दविधातिभीता
आश्चर्ययुक्ता अभवाम सत्यम् ।
तत्कथ्यतां देववर प्रजाभ्यो
वैचित्र्यपूर्णं किमिदं कृतं भोः ॥४५॥

श्रुत्वा जनानां वचनं स्वयम्भूः
प्रक्रान्तवान् भूरिबलेन विज्ञः ।
तथापि तस्यैव मुखात् पुनः स
प्रादुर्बभूव ध्वनिरेकदैव ॥४६॥

एतादृशः कोऽपि न जातपूर्वः
प्रश्नः कृतोऽपूर्व इति प्रसन्नः ।
जातोऽस्म्यहं सम्प्रति हर्षरोषौ
प्रकाशयाम्येव विचित्रघोषैः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साकं समुत्पन्नसहर्षरोष-
भावैरिमां शोच्यदशां प्रयातः ।
परस्परं भिन्नमनोभवाभ्या-
माभ्यामहं घोरविकारमाप्तः ॥४८॥

तानेव गुप्तस्थितिबोधतुष्टान्
जगाद लोकेश इदं रहस्यम् ।
नाहं न विष्णुस्त्रिबलप्रदाता-
ऽऽवां केवलं सृष्ट्यवनं प्रकुर्वः ॥४९॥

विश्वस्य सृष्टिर्मम कार्यमस्ति
यत्राऽस्ति साश्चर्यकरं रहस्यम् ।
देहास्तदीयाः खलु खाद्यपेया-
श्चोष्याश्च लेह्या विविधाः पदार्थाः ॥५०॥

मृत्युञ्जयस्त्र्यम्बक उग्र उक्तः
सर्वज्ञ आनन्दकरस्त्रिलोकी ।
हर्ताऽस्ति सर्वस्य ततः स हर्ता
प्रोक्तस्तदद्यैव विचार्यतां भोः ॥५१॥

कालः समस्तोऽपि ममाऽस्ति यो हि
विष्णोरयं वासररात्रिभूतः ।
विष्णोः समस्तः समयो भवस्य
नूनं क्षणोऽजायत तद्रहस्यम् ॥५२॥

इत्थं तु वस्तुस्थितिरस्ति विप्रा
जानीत सत्यं कथनं ममेदम् ।
केचिज्जना भक्तिरसे विहीना
उल्लङ्घयन्त्येव सतां मतानि ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दत्त्वैव हर्तृत्वमहो शिवस्य
सुशोभते विज्ञजना विदन्तु।
दानं विना संहृतिकृद् विभुश्चे-
ल्लोकैः समुच्येत हि लुण्ठकोऽसौ ॥५४॥

मत्सृष्टरक्षां भगवान् स विष्णुः
कर्तव्यबुध्या नितरां करोति।
सृष्टेर्विधाता द्रुहिणोऽहमेव
तद्रक्षको विष्णुरहर्निशं सः ॥५५॥

तस्मादिमां वस्तुगतिं विचार्य
निश्चेयमस्त्येव न संशयोऽस्ति।
मत्सृष्टवस्तूनि सुरक्ष्य सोऽपि
सार्थक्यमात्मप्रभवं विविक्ते ॥५६॥

इदं रहस्यं परमं मयोक्तं
कस्मै कदाचिन्न समुक्तपूर्वम्।
यच्चाऽऽग्रहेणैव भवत्सु व्यक्त-
प्रश्नस्य सम्यक् फलमुक्तमेतत् ॥५७॥

नारायणं माधवकृष्णविष्णु-
वैकुण्ठविज्ञादिपदैर्गृहीतम्।
नानासमस्याभिरनेकवारं
ग्रस्ता जनाः प्राञ्जलयोऽवतस्थुः ॥५८॥

विष्णो भवान् ब्रह्मकृतानि तानि
वस्तूनि पाता विविधावतारैः।
अस्तीति नूनं सचराचरास्ते
जानन्ति जीवा न हि संशयोऽस्ति ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकेन रूपेण हि विष्णुनाऽत्र
कस्यापि रक्षा न कृता त्वयाऽत्र।
किन्तु प्रभो दुःखशतैः सुतप्ते
लोकेऽवतीर्णो भवसीति चित्रम् ॥६०॥

तत्राऽपि किं कुत्र भवे स्वरूपं
योग्यं समर्थं च विचार्य सर्वम्।
रूपं विधत्से समयाऽनुरूपं
कौर्मं क्वचित्कुत्रचिदौग्रजीवम् ॥६१॥

कोलो नृसिंहश्च यथायथं त्वं
जातोऽसि कल्याणकृते जगत्याः।
कुत्राऽवतारे भवताऽत्र किं किं
व्यधायि रूपं सकलं प्रविद्मः ॥६२॥

विश्वस्य रक्षा सरलाऽस्ति नैव
तत्र श्रमोऽतीव भवेत्सदैव।
तस्यैव श्रामस्य च पूरणार्थं
क्षीराब्धिमध्ये वत सास्वपीसि ॥६३॥

नारायणोऽतः कथितस्तदैव
आपो हि नाराः कथिताश्च शास्त्रे।
ता वासकर्ता कथितः स एव
ज्ञातं भवेत्तेन हि तस्य रूपम् ॥६४॥

दूरस्थसृष्टिश्रितमग्रणीशं
हित्वाऽनिशं स्वार्थपरायणास्ते।
सर्वस्य रक्षाकरणाद् भवन्तं
सर्वो जनो मानयतीव नित्यम् ॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आस्वादकः कोऽपि गुणस्य सत्यं
स्तौति स्वयं नित्यमहो गुडं तम्।
उत्पादकाँस्ताँस्तु न हीक्षुदण्डा-
नेतादृशी देव ! परम्पराऽस्ति ॥६६॥

देवासुराणां मनुजादिजीव-
सङ्घस्य चाऽऽवाय कृतं स्वरूपम्।
यद्यत्कृतं तत्सकलं विदाम-
स्तेनैव सर्वस्य सुरक्षकस्त्वम् ॥६७॥

सांसारिके भौतिकतत्त्वजन्ये
तत्क्ष्मातले यज्जनकेऽस्ति निष्ठा।
आध्यात्मिके हे जगदीश ! नित्यं
स्थानं पितुस्तेऽपि सदा प्रतिष्ठम् ॥६८॥

मातुस्तु कर्म द्रुहिणो विधत्ते-
सृष्टिर्हि तस्याऽस्ति न जातु शङ्का।
द्वाभ्यां भवद्भ्यां द्वितयं गृहीतं
ते सृष्टिरक्षे जगति प्रवृत्ते ॥६९॥

आध्यात्मिके क्षेत्र इदं नितान्तं
ज्ञेयं भवत्येव भवद्विकेऽस्मिन्।
माता स्वयम्भूर्जनकस्तु विष्णु-
र्द्वाभ्यां मिलित्वैव कृतः प्रपञ्चः ॥७०॥

आध्यात्मिके पुण्यतमे भवन्तौ
क्षेत्रेऽत्र मातापितृरूपजातौ।
सञ्चाल्यमाने विधिवद् भवद्भ्यां
स्वस्थाः सुखं शेरत ईशभक्ताः ॥७१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सृष्टेस्तु पश्चात् सकलस्य रक्षाऽ-
प्येते क्रिये सर्वजगत्सु नित्यम्।
सदैव मातापितृवज्जगत्यां
निःशङ्कभावेन सुसज्जितौ तौ ॥७२॥

एते वयं सम्प्रति तादृशाः स्मो
युष्मन्मुखान्मूल्यसहं विचारम्।
शुश्रूषवः शीघ्रतयैव वाच्या
ब्रह्मास्यतः प्राप्तपूर्वाः कृतार्थाः ॥७३॥

वस्तुस्थितिं देवगुरोऽस्तु बोद्धुं
पृष्ठः स विष्णुर्नितरां शुशोच।
गोप्यस्य तस्य प्रकटेऽपि लग्नः
स्वाकारवैचित्र्ययुतस्तदानीम् ॥७४॥

देवाधिदेवो भगवान् महेशो
योगेश्वरः कालकलः करालः।
चातुर्दशं जागतकं सुधाता
तर्हि क्षणं तेन कृतः स्वचित्ते ॥७५॥

ध्याने स्वचित्ते स्थित एव सर्वे
तत्त्वेषु विज्ञानयुतः स विष्णुः।
विश्लेषितं तच्छिवतत्त्वसारं
प्रचक्रमे स स्ववृतिं पुरस्तात् ॥७६॥

विद्वांस एतन्ममवृत्तियुक्तं
वृत्तान्तमुख्यं वत संश्रुणुध्वम्।
जातादिरक्षाजनितश्रमस्य
दूराय सत्यं जलधौ शयेऽहम् ॥७७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तां योगनिद्रां कथयन्ति भक्ता
मत्तस्तु यत्किञ्च भवेत्कथञ्चित्।
भक्तास्तु मां तर्हि विशेषयन्ति
नाऽहं प्रशंसामि कदापि ताँस्तान् ॥७८॥

पूर्वं प्रगाढे शयनेऽहमासं
मत्कर्णयोः पिञ्जुषजन्यदैत्यौ।
मन्नाभिपद्मस्थितलोकस्रष्टु-
र्जिघांसया यत्र समं प्रवृत्तौ ॥७९॥

तदैव तन्नाशविधानहेतो-
स्तत्कालरात्र्या स्वविशेषशक्त्या।
प्रोत्स्थापितोऽहं सुशयालुरास-
मिदं रहस्यं विबुधा विदन्ति ॥।८०॥

सत्यं हि ते मत्स्थितिशक्तिविज्ञाः
विद्वांस एतन्मम वृत्तियुक्तम्।
वृत्तान्तलेशं वत संश्रुणुध्वं
यूयं क्षणेनैव भवन्तु विज्ञाः ॥८१॥

यत्राऽवतारान् यदहं वृणोमि
तदैव सर्वत्र मया त्रिनेत्रः।
प्रायः समाराधित आत्मशक्त्या
तद्देवदेवस्य कृपा मयि स्यात् ॥८२॥

रामावतारे खलु सेतुबन्धे
कृष्णावतारे यदुवंशवृद्ध्यै।
गोपेश्वरः श्रद्दधता मयैव
वृन्दावने स्थापित ईश्वरोऽयम् ॥८३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यच्च विद्वांस इदं विदन्तु
यस्याऽस्ति लब्धिः सत ईश्वराद्धि।
यत्साधनेनैव सदैव शक्तिं
प्राप्नोम्यहं तन्मम चक्रमस्ति ॥८४॥

ज्योतिःस्वरूपे किल लिङ्गरूपे
सोऽहं परास्तः कृपया गृहीतः।
तत्कालतोऽहं नितरां गिरीशे
भक्तिं स्थिरां सम्प्रकरोमि नित्यम् ॥८५॥

अन्याँश्च तास्ताः प्रबलाः समस्या
बह्व्यो यदीयासु सदा भवेन।
रक्षा सदैव प्रकृताः कृतज्ञः
सोऽहं प्रभुं तं हि न विस्मरामि ॥८६॥

आहो समैः प्रश्नकरैर्भवद्भिः
सुष्ठुप्रकारेण परीक्षितोऽस्मि।
ईशेऽधिकां भक्तियुताः प्रतीता-
स्तेनाऽधुना शङ्करसार उक्तः ॥८७॥

कैलाशस्थः सकलकलया नित्यसंयुक्तदेहो-
ऽस्माकं सर्वं प्रतिदिनमसौ साधयत्येव कार्यम्।
नाम्नस्तस्य प्रखरमहिमा केन न ज्ञायतेऽद्धा
सर्वं कर्तुं प्रभवति गुरुः सःसुरेशो महेशः ॥८८॥

स्वीये कार्येऽधिकतरबले दीप्यमाने पुरस्तात्
लोकस्यैवं समवनकरो वर्धनायैव लग्नः।
तेनैवाऽत्र प्रभुवर इति बुध्यते देवमर्त्यै-
स्तस्मादत्र स्थितगगनगं लिङ्गशीर्षं विचित्रम् ॥८९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्मिन् काले विधिहरियमौ स्वस्य वैशिष्ट्यलब्ध्या-
यावां नित्यं कलहवशतो नैव कार्ये प्रवृत्तौ ।
तस्मिन् काले स्वमहिमबलाज्ज्योतिषो लिङ्गमेकं
कृत्वा मूलप्रवरशिरसोर्ज्ञानहेतोस्तदुक्तम् ॥९०॥

विष्णो रक्षाकरणकृतिमाँल्लोकपालोऽसि मुख्य-
स्तेनेयं सा तव बुधजनैर्दिव्यकीर्तिस्तुताऽस्ति ।
ज्योतिर्लिङ्गं तव निकटगं वीक्ष्य मूलं प्रविद्धि
नो चेद्युस्मच्चिरकलहजो नैव नश्येद्विरोधः ॥९१॥

भो ब्रह्मँस्त्वं निखिलभुवने देवलोकेऽपि मुख्यः
कश्मिँश्चिच्च प्रबलविषये कर्म कर्तुं समर्थः ।
त्वत्सर्गस्थाः प्रकृतिसरलाः प्राणिनस्त्वां स्तुवन्ति
तस्माद्धेतोर्मम वच इदं सम्यगाचक्ष्व नूनम् ॥९२॥

स्वप्राबल्यप्रजनितरुषौ ब्रह्मविष्णू विरुद्धौ
तस्मिन् देशे वत भयकरस्तीव्र विद्वेष आसीत् ।
तत्रैव द्राक् सुरगुरुरसौ योगशक्त्याऽवतीर्णो
ज्योतिर्लिङ्गं परमसुमहत्तच्च सृष्टं यथोच्चैः ॥९३॥

एवं देवेष्वधिकबलवान् रुद्र आवेगवेगा-
दादिश्योभौ पुनरनुगतौ तीव्रताधानहेतोः ।
देवेशौ तौ विधिमधुरिपू भर्गनिर्दिष्टकृत्यं
शक्त्या लग्नौ प्रबलविजयं लब्धुकामौ प्रजेशौ ॥९४॥

ऊर्ध्वं गच्छन् सुरवरविधिर्लक्ष्यलीनोच्चदृष्टिः
पातं पातं कथमपि पुनः शङ्कमानः स्वशक्तौ ।
अग्रे यानादुपरत इतः सर्वथा क्षीणशक्ति-
र्लज्जायुक्तः कमपि कपटं चिन्तयन् तत्र दृष्टः ॥९५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आकाशस्थो विषमपदगो नम्रशुष्काननोऽयं
दृष्ट्वा तत्राऽगतसुरगवीं सम्मुखं तत्र देशे।
इत्थंकारं वत पितरहं किं विलोक्यैव मेऽत्र
तच्छीघ्रं मां कथयतु भवान् किं विधेयं मयाऽद्य ॥९६॥

पुत्रि त्वं मेऽतिशयसुखदा दुग्धदानेन नित्य-
मद्याऽपि त्वत्सहसुवसतिं नैव विस्मर्तुमिष्ट्या।
जानासि त्वं सुरवरशिलामस्तकं कुत्र चाऽस्ति
दृष्टं द्वाभ्यां सुरभिकुसुमं द्राग्विधिस्तज्जहार ॥९७॥

एतत्पुष्पं सुरवरगुरुं शङ्करं दर्शयित्वा
साक्षीकृत्याऽमरवरगवीं लक्ष्यलब्धिं प्रदर्श्य।
तद् वैशिष्ट्यं तदनितरजं गर्वयुक्तं निगद्याऽ-
वश्यं विष्णोरतिशयबलं त्वां सदा मानयिष्ये ॥९८॥

अस्मिन् काले सुदृढतरया दुःखदात्र्या कुमत्या
ग्रस्तोऽस्मि त्वत् किमपि सुखदं श्रेष्ठसाहाय्यमत्र।
इच्छाम्येवं मदनुशरणान्मन्मतं मानय त्वं
साक्षीभूयाः शिवनिकटगा मत्सुखायैव पुत्रि ! ॥९९॥

सर्वा पूजा सकलशुभदा नित्यमूर्ध्वं विधत्ते
साक्षित्वे त्वं दुहित अधुना स्वर्गतिं प्राप्स्यसि द्राक्।
पूर्वं कैश्चित् त्रिदशसमगैर्नैव देवैरिदं तु
स्वप्नेऽपीदृक् कथमपि कृतं नैव मन्ये कदाचित् ॥१००॥

निश्चित्यैवं स विधिरमरैर्नित्यमान्योऽपि तत्र
मान्यत्वस्य प्रतननविधौ दुर्नयेनेह लग्नः।
लज्जाशून्यो गिरिशनिकटं पुष्पगोभ्यां तदैव
प्राप्तो नीचैर्नयनयुगलः प्राप्तुमाधिक्यवीर्यम् ॥१०१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्याद्दूरे स्थितमभिमतं दुर्नयेनैव सत्यं
कर्तुं यत्नः कृत इति त्वया वञ्चकस्त्वं विचित्रः।
यन्मत्पार्श्वेऽवितथकथनात् किं कृतं गर्ह्यकर्म
एतस्मात्त्वं सकलभुवने लप्स्यसे नैव पूजाम् ॥१०२॥

गोस्ते वक्त्रं भवतु नितरां दुष्टगन्धेन युक्तं
पूजाकाले मम भवसि भो केतकि त्वं न योग्या।
कूटे साक्ष्ये सुरभिकुसुमे देवदेवेन शप्ते
मिथ्यावक्तुः परिणतिरियं दुःखदात्री सदैव ॥१०३॥

लिङ्गाधोऽपि स्वनियतिवशान्माधवः सम्प्रवृत्तो
नीचैर्गच्छन् स तु निजबलान्नैव साध्यं प्रमेने।
रुद्धश्वासो मृतिभयवशान्नैव यातोऽग्रदेशं
सद्यः सोऽयं प्रबलमतिमानत्र शीघ्रं निवृत्तः ॥१०४॥

नीचैर्यातोऽवनविधिपटुर्विष्णुरायात एव
चित्रं दृश्यं शिवमुभयतोऽपश्यदेकं तदैव।
धेनुं साक्षात् सुरभिमभितस्तां प्रकृत्याग्रदेशं
ब्रह्मा लिङ्गोपरिगतशिरःप्राप्तिवार्तां समाख्यत् ॥१०५॥

आचार्याग्रगपूर्णचन्द्ररचिते शास्त्रान्विते मञ्जुले
पाण्डित्येन युते विचित्रकवितास्वाद्ये मनोमोहिनि।
कृत्येऽस्मिन्नधुना ह्ययं त्रिगुरुकः सर्गश्च षड्विंशकः
पूर्णोऽब्ध्यक्षिमितं च वीक्ष्य रसिकास्तुष्यन्तु शम्भोर्गुरोः ॥१०६॥

॥ इति षड्विंशः सर्गः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तविंशः सर्गः

(सर्वोच्चज्योतिर्लिङ्गोत्पादनद्वारा ब्रह्मविष्णुनिर्देशन–नेपालवर्णनात्मकः)

गोब्रह्माणौ विकृतवदनौ शापनैयून्यमाप्तुं
देवस्याग्रे चरणपतितावूचतुर्दीनवाक्यम्।
आवां क्षम्यौ निखिलजगतां हारकेणाऽत्र शापे
न स्यादित्थं कथमपि पुनर्नैव सन्दृश्यतेऽदः ॥१॥

सर्वज्ञोऽसौ सुरगुरुशिवः संस्मरन् ब्रह्मकर्म
गोश्चाऽसत्यं कथनमशिवं मन्तुमुग्रं विचार्य।
दत्तः शापः समुचित अयं शुद्धता नात्र कृत्ये
मात्रास्वल्पीकरणविषये नैव बुद्धिं चकार ॥२॥

अस्मात्कालात् परतरदिनेऽमुष्य कुत्रापि किञ्चित्
शीर्षस्थाने कथमपि न मे प्राप्यसि त्वं कदापि।
गन्धो नष्टो भवति नितरां सर्वदा गन्धहीना
जाता स्याः त्वं सततमिति वाक् केतकी जातखेदा ॥३॥

भूयो भूयः शिवचरणयोर्वन्दनं नम्रमूर्त्या
कृत्वाऽपीयं कथमपि तदा स्वत्वयुक्ता न जाता।
गोब्रह्माणौ स्वकृतकपटौ शम्भुना धर्षितौ तौ
कौटिल्याद् वै कथमपि न तौ शक्नुवन्तौ सुधर्तुम् ॥४॥

ब्रह्मन् गच्छाऽसनसुमहिमा ज्ञाप्यते सर्वलौकैः
सत्येनैव त्वमिह सततं प्राप्स्यसे कीर्तिमिष्टाम्।
याथार्थ्येन प्रकथकबुधो नैव लोके विगर्ह्यो
नो चेच्छीघ्रं फलमिह भवेद्दुःखदं कीर्तिनाशम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्चित् पश्चाच्छिवकृतममुं तीव्रशापं गृहीत्वा
वासस्थानं स्वकमभयदं प्राप्तवन्तौ क्षणेन ।
विष्णुस्तत्र प्रयतनशतात्तादृशान्नैव लब्धं
साफल्यं तच्छिवमभिमुखं नम्रकायो न्यवेदीत् ॥६॥

श्रुत्वा देवोऽखिलसुरगुरुर्विष्णुवाक्यं यथार्थं
प्रीतो भूत्वाऽतिशयमसकृद् दत्तवानाशिराशीः ।
त्रैलोक्येऽहं सकलजनतापूजितः सर्वमान्य-
स्त्वं चैवं स्या मम हृदयगो भक्तमुख्यश्च भूयाः ॥७॥

ईशानस्य प्रमुदितवचः श्रीपतेरस्य तद्धि
श्रुत्वा शीघ्रं तदुपरि करं न्यस्य तत्स्नेहयुक्तः ।
अद्धाऽवादीः कथय कमलानाथ किं याचसे त्व-
मेवं पृष्टो मधुरिपुरयं त्र्यक्षभक्तिं ययाचे ॥८॥

आस्माकीनाः सकलसकला भक्तसङ्घा नवीना-
स्तज्ज्ञायन्तां निरतिशयकं किं न किं तत्त्वमस्ति ।
तेनैवेयं सकलभुवने ख्यातिराप्ता ह्यनन्या
स्वात्मीयं द्विप्रमुखत इदं भिन्नमैश्वर्यमस्ति ॥९॥

दिव्यैतादृक्शिववदनजाद्धर्षराशेः परीतः
शर्वं नत्वा स्वममलगृहं प्राविशत्तं विकुण्ठम् ।
तत्र प्राप्तैः कतिपयजनैः सादरं प्रार्थितोऽसौ
वाढं प्रीतोऽमरसभगुरुर्नीलकण्ठो नुतश्च ॥१०॥

एतस्मान्न त्रितयरहितत्वात्त एवाद्य शङ्कां
दूरं कुर्यास्म विबुधगणे तथ्यमभ्युद्यमूह्यम् ।
याथातथ्यं कथमपि वयं श्रीमुखाच्छ्रोतुकामा
अत्राऽयातास्तदिदममलं ब्रूहि देव प्रसीद ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किं भोः प्रज्ञाबलधनबलैः कायसंस्थैर्बलैश्च
सर्वान् युक्तान् विधिवदधिकान् कर्तुमीष्टे स शूली।
तथ्यञ्चेदं सुरपतिगुरौ पार्वतीशेऽस्ति नित्यं
दत्वाऽऽहर्ता भवितुमसकौ शक्ष्यतीत्थं सदैव ॥१२॥

रक्षाधीशं त्रिदशसुखदं सादरं पृष्टवन्तो
देवात्तस्मादतिहसमुखाच्छुद्धसिद्धान्ततत्त्वम्।
सम्यक् प्रोक्तं क्रमश उदिताः पृच्छकाः प्रत्यगृह्णन्
सत्यं चैतत्सकलमुदितं प्रश्नकाले भवद्भिः ॥१३॥

ब्रह्माण्डार्थं श्रुतिनियतिबलैः संयुतान् तान् परीक्ष्य
नो नैकैकैरधिकबलकैः संयुताँस्तान् विलोक्य।
कः किं दत्त्वा कति च शरदः सुष्ठु योगं करोति ?
किं वा प्राप्या दुरुपकरणे तत्प्रवृत्तिस्तु नास्ति ॥१४॥

दानं त्यक्त्वा यदि सुरगुरुः केवलं हारकः स्या-
त्तर्ह्युग्रोऽयं तु खलु नितरां केवलं लुण्ठकः स्यात्।
तस्मिन्देवे कथमनुचितं धर्ममेवं प्रतीम-
स्तन्निश्चित्य ह्यनुसरणतः सोऽत्र दाता त्रयणाम्॥१५॥

पितामहः सृष्टिरतः सुरक्षको जनार्दनो हारकधूर्जटिर्हरः।
बलार्थबोधायुषदायकः शिवः सुदायको हारकनामसंयुतः ॥१६॥

भो विद्वांसः सकलजगतां स्रष्टुरेकस्य धातु-
स्तच्चारित्र्यं विधिनिजभवं तत्र वैचित्र्यमस्ति।
मत्तः श्रेष्ठः सततमभवद् वेधसस्तस्य चेष्टं
सिद्धं स्यात्किन्तु सकलगुरोरर्गलात्तन्निरुद्धम् ॥१७॥

पूर्वं वार्ताऽवसर उभयोरग्रतः पुष्पमेकं
दृष्टं द्रागेव सुरभिसुमं हस्तलीनं चकार।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सृष्टेः कर्तुः सुरवरविधेरीदृशं चिन्त्यकर्म
स्मारं स्मारं सततमिह मे मानसं खिन्नमस्ति ॥१८॥

लक्ष्मीकान्ते भवति सुतरां भावनम्रास्त्वदीयाः
सर्वे रुद्रं प्रति रतिभरं धारयन्तो नितान्तम्।
प्राप्ताः स्मो भक्तजनहृदयास्त्वत्त एव प्रश्रित्य
तृप्ता भूयास्म निरतिशयं नः कुरुष्व प्रकृष्टान् ॥१९॥

संख्यावन्तः प्रतिदिनमहो ज्ञाननिर्धूतपापा
यूयं मत्तः कथितविषयैः प्रायशः प्रीतिमाप्ताः।
अन्यच्चेदं पशुपतिविभौ मन्मुखादेवमग्रे
शृण्वन्त्वत्र प्रभुपदरसे सुष्ठु संस्मारितोऽस्मि ॥२०॥

नानाशास्त्रैः स्वमतविमतान् सर्वसिद्धान्तसारां
स्तुत्वा क्षिप्त्वा क्रमश उदयो दुर्गतिः प्राप्यतेऽत्र।
तेषामेतौ प्रथमत इमौ पूर्वतो भिन्नपक्षौ
दर्शं दर्शं स्वमततनने प्रायशस्तानि सन्ति ॥२१॥

वाचालैस्तैः स्वमतगरिमाऽवश्यमेव प्रकाश्यो-
भूयस्तैश्चाऽरुचिरविमतं प्राप्स्यते तर्कजालैः।
एवं सर्वैः क्रमश इतरो जीयते शास्त्रचर्चे
निर्जित्यैव प्रखरवचनैः स्थीयते व्यर्थमेव ॥२२॥

संसारेऽस्मिन् सुकृतिपदवी सर्वमान्याऽस्ति नित्यं
स्वादर्शास्तेऽन्यजननिवहे मार्गनिर्देशकाश्च।
मान्याः सर्वे यदनुगमनं प्रादधन् स्वीयवंशे
तस्यैवास्मिन् समनुसरणं सर्ववश्यस्य कार्यम् ॥२३॥

तत्तच्छास्त्रव्यसनजसुरुक् वादिवृन्दं भिनत्ति
पौनःपुन्यैरनुदिनमदस्तं पुनर्जेतुमिच्छेत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्माद्यूयं सततमपरान् नैव जेतुं यतध्वं
सिद्धान्तोऽयं कथमपि रिपोः सम्मुखे नैव वाच्यः ॥२४॥

अस्मिञ्छास्त्रे स्वगुणगरिमा कुत्रचित्सञ्चकास्ति
किं ते नान्यः कुशल उदिता तत्स्थलं नैव गच्छेत्।
स्थित्यामस्यां रुचिधरबुधाः शास्त्रपूगान् समन्तान्
चैकीकृत्य प्रतिदिनममी श्रद्धया सन्नमन्तु ॥२५॥

विद्यातीर्थः शिव इह समैः शुद्धबोधाय नित्यं
सम्यक् सेव्योऽमृतघनरसः सर्वथा ज्ञाननिष्ठैः।
तीव्रे योगेऽप्रतिहतबलो ज्ञानिनामग्रगण्य-
स्त्यागिप्राज्ञैः प्रतिदिनवृतो पारमार्थस्य दाता ॥२६॥

ब्रह्मानन्दप्रदसुरवरो देवदेवोऽद्वितीयो
देवाधीशः सकलजगतां मत्प्रधानाः सुरेशाः।
नित्यं तस्मिन् स्वविनतियुता बोधहेतोरविघ्न-
मिच्छापूर्तौ प्रयतनपरो राजते देवलोके ॥२७॥

तस्यैवाऽऽराधनमिह सदा भूस्थिताः प्राणिसङ्घाः
कारं कारं कृतसुकरणाः स्वात्मनः सार्थयन्ति।
यूयं मन्येऽहमुदयपराः पूर्णकामं महेशं
नामं नामं दिनमिदमलं कुर्वते नित्यमेव ॥२८॥

श्रीकण्ठस्य प्रबलकरुणा देवदेवस्य मह्यं
सैवेदानीं भवदभिमुखं वर्णयामि प्रगुप्ताम्।
प्रायः सर्वाऽवतरणदिने तीव्रनिष्ठायुतेन
दीर्घं कालं कृतनियमया पूजयाऽऽराधितः सः ॥२९॥

आस्माकीनाः प्रबलरिपवो ह्यन्धकाद्याः समासन्
सर्वैस्तैश्च प्रतिदिवसकं पीडितं किं वदानि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तर्हि त्र्यक्षीयमिदमुदितं नैव प्राप्स्यदबलं चे-
न्नूनं सैव प्रकृतिकृतकं विश्वमेतत् स्वनङ्क्षत् ॥३०॥

ईदृग्वृत्तं द्वितयमतिकं घर्षणैः किं कथञ्चि-
दस्त्वेतद्वै प्रकथनमतो पीडयत्यन्तरङ्गम् ।
घोरः सोऽपि प्रकृतिपुरुषस्तारकः सम्प्रयातः
सोऽप्यन्यो हि त्रिपुररिपुरुद्घोषणो भीषणोऽसौ ॥३१॥

तेषां कीर्तिं बहुसमयतो रक्षितुं दृष्टिमिष्ट्या
दत्त्वाऽस्माभिः समधिकसखा ज्योतिषां ज्योतिराख्यः ।
ज्योतिर्लिङ्गैरधिकपृथिवी शोभिता कामपूरै-
स्तन्मध्ये स्वैः किरणशतकैः भूरिशस्थापिताऽपि ॥३२॥

मत्स्थानं यज्जगति सुतरां वर्तते निर्विकल्पं
रक्षाकार्ये सकलविधिजिन्नास्ति कुत्रापि कश्चित् ।
एतत्सर्वं गुरुवरशिवात् प्राप्तवान् पूर्वतोऽहं
तस्मादेतत् सकलघटितं सम्यगुक्तं मयाऽत्र ॥३३॥

मद्भक्तास्ते कतिपयबुधाः काथिकाः स्वेष्टदेव-
मुच्चैर्मत्वा मम जनिभवात्स्थानतश्चोर्ध्वयन्ति ।
एतत्कार्यं मम हृदयधुक् तेऽवगच्छन्तु नित्यं
मर्यादा यस्य च यदसकौ सा तथैवाऽस्तु नित्यम् ॥३४॥

वेदार्थानां खलु विवरणं कर्तुकामैः सुधीभि-
रन्योन्यानि प्रगुणविभवैः संयुतत्वाद् गुरूणि ।
शास्त्राणीति क्रमश उदयाल्लब्धरक्षाणि नित्यं
तान्येव प्रश्रयविरहतः शून्यमूलानि वित्त ॥३५॥

लोकाध्यात्मप्रभवघटनैः पूरितानीव सत्यं
शास्त्राणीमानि निगमबलात् प्राप्तवीर्याणि नित्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदोक्ताया इतरविगतौ निश्चितात्मा त एव
तस्माद्वेदीयविविधपथान् नैव केषां प्रपातः ॥३६॥

तस्माद्वेदाः सततमितरैस्तैर्भवद्भिः सुरक्षा
यैरत्रैव प्रकृतिसरलैर्दीर्घतोऽहं प्रपृष्टः ।
युष्माभिः प्राक् कृतबहुविधाः सौख्यदाः प्रश्नसङ्घा-
स्तेषामत्राऽप्रतिमविधया सूत्तराणि प्रपद्ये ॥३७॥

सुरवर ! शितिकण्ठ ! प्राणिनां जन्मरक्षा-
हरणकरमहेश ! त्वामिह प्राप्तभक्ताः ।
वयममररहस्यं श्रीमतः श्रोतुकामाः
सपदि निगमपारं तद्धि तत्त्वं प्रचक्ष्व ॥३८॥

विधिहरिसदसीमं प्रश्नमग्रेऽपि देव !
स्ववसरमभिगम्य श्रद्धया द्रागकार्ष्म ।
अभिमतविषयीयं तद्व्याख्यातवस्तु
कथमपि च तदस्मान् स्वल्पतुष्यानकार्षीत् ॥३९॥

अतिशयमसुलभ्यं ज्ञातुकामा भवन्तः
कथमपि सुरवर्यैः पूर्वकाले न लब्धम् ।
तदिह ससुखमेत्तच्छ्रद्धया संलभन्तां
सुरदनुजनरैस्तज्ज्ञानवृद्ध्यै न दृष्टम् ॥४०॥

अहममरसभायां सर्वदा सर्वमान्यः
समय असमये वा तैः कृताः सर्वप्रश्नाः ।
असदृशमभिमत्त्वा ते मया शीघ्रमुक्ता
अथ च सकलविद्यातीर्थ उक्तोऽस्मि तैर्हि ॥४१॥

अभिमतविषयाणां यूयमेकैककश्च
प्रकुरुत समभीष्टान् प्रश्नपूगान् यथेच्छम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुदिनमिह कोऽपि बोधलब्ध्यै सयत्नः
स तु भवति सदैवं ज्ञानतुष्टः प्रकामम् ॥४२॥

शृणुत जगति केचित् सज्जना धर्मशीला
अपर इह सदैव प्रार्थयन्ते धनानि ।
तदितर इह केचित् केवलं कामकामाः
कथितजनसुभिन्नाः सर्वथा मोक्षकामाः ॥४३॥

कतिपय इतरे ते द्वित्रिभिर्नित्ययुक्ताः
प्रतिदिवसममी मे दृष्टिलेशं लसन्ति ।
अपि सुगतिसमाप्तेर्मूल्यमाकाङ्क्षयन्तोऽ-
परिमितसुविचारा मत्कृपामर्थयन्ते ॥४४॥

मम नियमसुपाता कोऽपि स्यात्साधकोऽसा-
वहरहरभिवृद्धिस्तद्भवेदेकदेव ।
निरतिशयविवृद्धौ नित्यलीना नरास्ते
मम मननजशुद्धं वस्तुहृद्यं लभन्ते ॥४५॥

सकलसुजनतादौ वीर्यबोधौ सशक्ती
सततसुलभयोगाः शान्तिसन्तोषधर्माः ।
इति सकलगुणानामाकरश्चास्ति कश्चित् ।
स खलु पुर इदानीं वर्तते नास्ति शङ्का ॥४६॥

प्रथितगुणगणास्ते मामकाः सर्वधर्मा
अखिलजनगुरोर्मन्मुख्यभूमेर्विसृष्टाः ।
प्रतिनिजजनमध्ये स्कन्दहेरम्बगौरी-
वृषभतनुषु पूर्वं विस्तृताः सत्यमेतत् ॥४७॥

मम शुभपरिवारे तेन सर्वेऽपि पूर्णा
विविधबलसमेता वीर्यलाभाय सेव्याः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इह जगति न किञ्चित्तादृशो ह्यालयोऽस्ति
तदपि बहुविधान्धा वस्तुसारं लुनन्ति ॥४८॥

इदमपि सुविचार्यं शुद्धविज्ञानविद्भि-
र्ममगृहजनमेकं कञ्च सेव्यात्सदैव ।
स सकलभुवनेऽस्मिन् नैव दुःखानि भुङ्क्ते
मम तु स सुमतोऽसौ मामको वेविदीति ॥४९॥

जगति विविधलोका मत्स्वरूपं विचार्य
वच इह विलपन्ते शङ्करो भिक्षुकोऽसौ ।
यदि विविधविभूतेः सङ्ग्रहो मेऽपि भूया-
त्तदहमपि तावत् सङ्ग्रही कोऽस्ति भेदः ॥५०॥

किमिह बहु गदानि प्रायशो ज्ञानहीना
अधिकतमविभूतिः सर्वलभ्यस्य मूलम् ।
त इम अतिरहस्यं भुक्तिमुक्त्योः स्वरूपं
कथमपि धनधान्यैर्नैव मोक्षो लभेत ॥५१॥

धनजनविमनानां नैव सौख्यं दिशन्ति
सततकुमतिदानान्मोक्षमार्गस्य तङ्काः ।
अत इतरपथास्ते त्यागवैराग्यजन्मा
अनुदिनपरिशील्या नैव मार्गोऽस्ति ह्यन्यः ॥५२॥

विषयरुचिकरा सा भूतिनाम्नी विभूति-
ररुचिवशविजाता तद्धि भस्म प्रियं मे ।
यदि च मम समक्षं कोऽपि पृच्छेद्विवेकी
तदहमिह निवच्मि स्वर्णभस्मैक्यमस्ति ॥५३॥

स्वगृहधवलसौधे भूतिमाप्ता विभूति-
रित इतरमनुष्या नैव जानन्ति सौक्ष्म्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इयमनुदिनमस्मान् नैवमाक्रष्टुमीशा
अत इह मम राज्ये केवलं ज्ञानमूल्यम् ॥५४॥

मम तु स जन इष्टोऽत्यन्तहार्दस्य पात्रं
य इह मम मतस्य श्रद्धया वृद्धिमिच्छेत्।
अमुत इतरथा चेन्नैव मे सम्मतः स्या-
न्मम सदसि कथं ते प्राप्नुयुर्वित्तलुब्धाः ॥५५॥

अपरिमितबलानां शक्तिनामान्तराणां
प्रबलजननभूमिर्नैव मत्तोऽन्यदेवः।
तदहमनिशमत्र प्राणिनां जीवनायाऽ-
वगमधनतनूनां तानि नित्यं ददामि ॥५७॥

स्वभुजवितरितानां तद्बलानां विवेकात्
सति च सदुपयोगे स्नेहपात्राणि ते हि।
यदि च दुरुपयोगे प्राक्प्रदत्तानि तानि
सपदि युगपदेवाऽरातिरित्थं समेषाम् ॥५८॥

इदमतिशयगुप्तं कैरपि प्राङ् न लब्ध-
मचलमिह गिरीशे नम्रभावं विदित्वा।
वितरितमधुना तत्सत्यवस्तुस्थितेर्हि
निखिलजगति शीघ्रं जायतात् सुप्रचारः ॥५९॥

गजवदनगणेशो ज्ञानतत्त्वस्य देवः
सुररिपुमहिषारिः शक्तिदेव्यस्ति दुर्गा।
असुरसुरनरेषु स्कन्दवीर्येशदेवो
ह्यमरवरवृषोऽसौ शान्तिसन्तोषधर्माः ॥६०॥

स्वकथितपरिवारे यस्य कस्याऽपि पूजा
सतत सुसफला सा नैव काप्यत्र शङ्का।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकलजगतिमध्ये भारते नेमुनिषे-
शृणुत युगलपृथ्व्यौ रम्य दुर्गाप्रतिष्ठौ ॥६१॥

प्रमुखगणपतिः सोऽतिप्रसन्नो यदाऽसौ
शृणुत सुकृतमेतत्तेन मे राष्ट्रभूमेः ।
यदिह सकलमाता कालिका बङ्गदेशेऽ-
तिशयमतिबलौघान् संविधत्ते तदीयान् ॥६२॥

क्वचन यदि गुहोऽसौ पूजितो यत्र भूभौ
सकलविभवयुक्ताः सन्ति ते तत्प्रभावात् ।
निखिलभुवनमान्यो धर्ममूर्तिः पवित्रोऽ-
तिशयमतिवरेण्यः प्राज्ञनन्दीश्वरोऽसौ ॥६३॥

मम परिजनवर्ती कोऽपि मान्यो भवेच्चे-
दरिहननसुपूर्णो निश्चितं जायतेऽत्र ।
स्वपरिजनचतुष्के मान्यते नैव कोऽपि
तदहमपि सुरुष्टः स्यां न सन्देह आहो ॥६४॥

क्वचन मम तु पूजा जायतां नैव वा स्या-
त्तदपि मम सदैव प्रीतिरस्त्येव तेषु ।
विबुधजननमस्या यूयमत्रैव मन्ये
सकलकथितमित्थं प्राप्य तुष्टा अवश्यम् ॥६५॥

सुविचक्षणोऽसि भगवन् भक्तगणा
अधिकांशतोऽत्र भवतः कृपापराः ।
इयमेव नः सततमस्तु संस्तुति-
र्मकया भवान् संस्मृत आव्रजेत्सदा ॥६६॥

न वयं कदाऽपि विबुधान्तरं पुनः
कदापि याम आत्मना मितोऽस्ति स मदः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवतैव यत् सुखकरं वचोऽमृतं तत्
कथितं प्राक् समहृदया समे सतः ॥६८॥

श्रवणेन सम्मुदकरेण हर्षिताः
सुतरां प्रभो सुखशतेन कर्षिताः ।
हृदयस्य तच्छमिदं कान् प्रकाशये
वत ये प्रयान्ति भवतः कथामृतात् ॥६९॥

न तथोत्तरितमितरैः सुरेश्वरै-
र्भवतः पवित्रमुखत ऐश्वरो रसः ।
सततं प्रभो दद इहैव मङ्गलः
समभूदतो वयमहो सदैव ते ॥७०॥

भवतः पवित्रकृपया प्रभो वयं
नितरां सदोषहृदयाश्च सम्प्रति
सुतरां प्रबुद्धमनोबलाः कृता
अधुना पुनश्च तदेव याचकाः ॥७१॥

भगवन् सदा तव कृपा सुरक्षिका
भवतीदं को न मनुते विचारकः ।
इतरे समे विबुधगणा भवत्कृपा-
वशगा न ते स्वत इदं प्रभाविनः ॥७२॥

त्रिपुरेषु या खलु विशेषताऽस्ति सा
सकलाऽपि कोविदवरेण सूचिता ।
भवता तथापि कथितेन मनांसि नः
श्रुतिशीलतोऽखिलनतेरनुरुध्महे ॥७३॥

भगवान् भवानिति न के विजानते
प्रसभं सुयोगधनवाँश्च जानते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवतस्तपो हि सकलस्य विस्मयं
तनुते प्रभो प्रकथनीयमत्र नः ॥७४॥

सततं प्रभो सकललोकरक्षको
भगवान् भवान् प्रतिदिनं दयापरः ।
इह नास्ति कोऽपि विबुधो भवादृशो
सकलैरपीत्थमिदं कथ्यते सदा ॥७५॥

कवयः श्रुतिस्थितरहस्यबोधिनः
सुदृढार्षवंशपरिपालकाश्च ते ।
कथयन्ति तेऽनिशमहो भवत्कथा-
मतुलां समृद्धिसहितां प्रकर्तुमीहते ॥७६॥

सकलस्य त्वं समुदयं सदेच्छसि
तनुषे यशोऽपि हि सुजीवनं प्रभो ।
न तथापि भो तव दयां स्मरन्ति ते
कृपणाः कुबोधसुरतानताबलाः ॥७७॥

भुवनभीतिभञ्जको निखिलविश्वरक्षकः
स इह देवपत्तने पशुपरूपमाश्रितः ।
सततमस्ति पालकश्चलति लेखनी स्वयं
तदित ईशवासभूगरिमगीतिगायने ॥ ७८॥

राष्ट्रदेवः पशूनां पतिर्यः
संराजते राजधान्यां सदैव ।
तस्य देवस्यैव तीव्रप्रभावान्
नेपालराष्ट्रं सदा संरक्षितम् ॥७९॥

इह मदीयपुण्यभूमिजा
विगतकालिका अनेकशः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुचिरशासनक्रियापरा
नृपगणाः प्रगीतगौरवाः ॥८०॥

अथ गवां सुपालका नृपाः प्रथितकीर्तिका सुशीलिनः ।
तदनु राजवंशजा नृपा महिषपालकाः प्रजाप्रियाः ॥८१॥

बुधकिरातवंशजो नृपः प्रखरवीर्यवान् स आबभौ ।
प्रथितकीर्तिको यलम्बरः शृणुत राजत्रिकाद् वर्णितात् ॥८२॥

परतराश्च लिच्छवीनृपास्तदनु मल्लवंशजाः खलु ।
नृपतायोऽत्र नयपालके समभन् विदन्तु कोविदाः ॥८३॥

कथितराजवंशपञ्चकात् परत आगता विचित्रता ।
समयजातसहैव कूर्दनात् प्रथमभावतः समेऽपि ते नृपाः ॥८४॥

समभवन् सुकीर्तिकाः समे जनसुरञ्जनप्रपवीणकाः ।
बुधवरा विचारयन्तु भोस्तदनु राष्ट्रवृद्धिरीक्ष्यताम् ॥८५॥

ततो जातानि राज्यानि बहूनि च
द्वाविंशति-चतुर्विंशतिकानि वै ।
विध्वंस्यैतानि राज्यानि ह्येकीकृतं
श्रीपृथ्वीनारायणशाहेन तद्धि ॥८६॥

श्रीपृथ्वीनारायणशाहेन नेपालराष्ट्रविस्तरे
कृतानि कार्यभूयांसि न कैश्चिदपि कर्हिचित् ॥८७॥

न विस्मर्यमिदं तथ्यं जानन्त्वत्र समे जनाः
तस्यैव राजवंशस्य वंशश्चाऽत्राचलद् बहु ॥८८॥

करामलकवद् विश्वद्रष्टुर्योगिवरस्य वै
श्रीश्रीगोरक्षनाथस्य शिवांशकस्य तस्य च ॥८९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाशीर्वादप्राप्तत्वाच्छाहवंशोऽचलद् बहु
विशालेऽस्मिन् हि नेपाले विश्वदृष्टिरजायत ॥९०॥

तदन्वयकार्यकाले नेपालशान्तिक्षेत्रकं
जातमासीत्तदा सत्यं सर्वत्र सौख्यवर्षकम् ॥९१॥

उच्चश्रेष्ठशैलराजे ह्येभरेष्टे निरन्तरं
समारोढुं सयत्नैस्तैरधिकं ख्यापितं यशः ॥९२॥

अखिलविश्वराष्ट्रसंहतौ स्थितमानवाः
प्रखरशैलमेभरेष्टकं सततमिच्छुका रोहितुम् ।
विश्वभेषु गिरिवरेषु यो जातोऽस्त्युच्चकः
इहत्यपर्वतचये गगनमस्तनामकः ॥९३॥

क्षितिरियं समस्तभूमिषु ह्यतितरां समुच्चरूपिणी ।
अत इहत्यमानवाः सुराः प्रकथिता न संशयः किल ॥९४॥

विश्वशान्तेरग्रणीर्बुद्धदेवो ह्यत्र जातो येन राष्ट्रं पवित्रितम् ।
तस्य देवस्य भक्ताः सन्त्यनेके नैकराष्ट्रेषु स्थितः श्रीबुद्धधर्मः ॥९५॥

विश्वशान्तेरग्रतो ह्यसो धर्मराजो मान्यते पूज्यते च ।
त्यक्तसर्वस्वमादर्शरूपो येन राष्ट्रगौरवं सम्यक् प्रवर्धितम् ॥९६॥

विश्वजेतार आङ्ला उच्चका अत्र युद्धेषु त्रित्रिवारं परास्ताः ।
उतर्हि काव्यक्रियायां समेता वयं सन्नमामो राष्ट्रदेवम् ॥९७॥

राष्ट्रमाता श्रीगह्यकेश्वरी स्वशक्त्या संयुता सदैव ।
सा संनम्यतेऽस्माभिराद्या वयं रक्षिताः सर्वदा तयैव ॥९८॥

नेपालस्थो वृद्धनीलकण्ठः समाराध्यते वैदिकैर्बुद्धकैस्तैः ।
निष्ठयास्माभिश्च सम्मान्यतेऽत्र मित्रराष्ट्रेभ्य आगताश्च नमन्ति ॥९९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वमाता जानकी यत्र जाता यया भारतं स्वीयमित्रं कृतम् ।
मिथिला प्रसिद्धास्ति या धरा भूषणं विद्यते नेपालमातुः ॥१००॥

विश्वप्रसिद्धा मिथिलास्ति भूमिर्यत्र प्रजाताः कविशास्त्रिणो बुधाः ।
गङ्गेशवाचस्पतिविद्यापत्यादिका जाताः सुख्याता गौरवैर्गण्यमान्याः ॥१०१॥

नेपालदेशस्य पवित्रभूमयस्तीर्थान्यनेकानि विराजितानि ।
आगत्य भक्ताः इह भारतादेः कुर्वन्ति नित्यं विविधां प्रपूजाम् ॥१०२॥

आदर्शराजा जनकः पुराऽभवत् तच्छासने शास्त्रविधा विकासिताः ।
राज्ञोऽस्य विद्वत्सभजातवैभवं श्रुत्वानिशं नैकटभारताच्च भोः ॥१०३॥

आगत्य शास्त्रार्थविचारकर्मणि जाता अनेके कृताकौतुका बुधाः ।
विद्वत्समाजेऽनिशमत्र सर्वथा श्रीब्रह्मविद्याधरणिः प्रसिद्धा ॥१०४॥

अस्यां विश्वख्यातायां पवित्रभूमौ
जातो गुरुर्याज्ञवल्क्यो मुनीन्द्रः ।
यदीययोगस्य सुतीव्रशक्त्या
प्रलब्धोऽभवत् कर्मकाण्डीयवेदः ॥१०५॥

यदीययोगस्य बलेन संस्तुतो विश्वचक्षुः श्रीसूर्यदेवः खलु ।
वाजिरूपधारिदेवदेवारुणात् समस्तशुक्लयजुर्वेदो हि लब्धः ॥१०६॥

कर्मकाण्डस्य समे मन्त्रकाः खलु
शुक्लयजुर्वेदे सुलभ्या बुधैः ।
भारते सर्वत्र भूमौ नेपालदेशे
तस्यैव वेदमन्त्रा अवश्यं प्रग्राह्याः ॥१०७॥

पाथीभरा विश्वमाता प्रसिद्धा तथा गलेश्वरो देवदेवो विभुः ॥
मुक्तिनाथो भृशं दर्शनीयस्तथान्यानि तीर्थानि दिव्यानि सन्ति ॥१०८॥

प्यूठानमण्डले ख्यातः स्वर्गद्वारी प्रतीर्थो
यत्र भारताच्च प्रतिवर्षं सुभक्ताः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आगत्य ह्यागत्य यथेष्टं प्रदर्श्य
प्रपूजितो जायते सुभक्तैश्च तैः ॥१०९॥

स्वर्गद्वारी सुशैलः सर्वथा रम्यमाणो
जनैस्तत्र प्राप्यतेऽपूर्वः प्रमोदः ।
महाकाव्यकर्त्रा पूरा तत्र गत्वा
सुखं यापिता घस्रत्रिंशत् समोदम् ॥११०॥

राष्ट्रपूर्वभागे प्रसिद्धा हलेसी देवाधिदेवस्य हरस्य पीठम् ।
जना भारतान्नेपालाच्च तत्र रमन्तेतरां मोदमानाः सदैव ॥१११॥

नेपालराष्ट्रस्थानां विविधराज्याना-
मेकीकरणविकटकार्ये सफलः सुतराम् ।
शाहवंशीयो मूर्धाभिषिक्तोऽग्रणीः
पृथ्वीनारायणो वीरवर्यो हि मुख्यः ॥११२॥

अनेन यथार्थः कथितो दिव्योपदेशो
राष्ट्रभक्तैः समैरवश्यं विलोकनीयः ।
तदेव सुष्ठुतया ज्ञायते विशालकृत्य-
मत्यन्तपरिश्रमजं स्तुत्यकृत्यम् ॥११३॥

देशोऽयं सर्वदेशेषु सूच्चोऽस्ति हि न संशयः ।
अन्यदेशजना अत्र समागत्य समोदकाः ॥११४॥

मातुः प्रकृतिदेव्या हि भूरियं क्रीडनस्थली ।
जानन्तु विश्वराष्ट्रस्था मानवाः सुविचक्षणाः ॥११५॥

जननी जन्मभूमिर्द्वे स्वर्गादपि विशिष्टके ।
तयोरग्रे विशिष्टाख्यं स्थलं किञ्चिन्न विद्यते ॥११६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतश्चेह जन्मभूम्या वर्णनं सादरं कृतम् ।
जानन्तु काव्यरसिका विद्वांसश्च गवेषका: ॥११७॥

नेपालराष्ट्रं सर्वराष्ट्रैः सह मैत्रीं विधाय
नित्यं संवर्धते सर्वक्षेत्रेषु सत्यम् ।
सनातनाख्यधर्मोऽस्ति वैदिकः पूर्वजैः कृतः
सम्प्रत्यपि धर्मप्राणा इच्छन्ति तद्वैदिकम् ॥११८॥

विषं पारावारात् सुरदनुजमन्थेन जनितं
सहेलं पीत्वेदं भुवनसकलं रक्षितवतः ।
महेशस्य ख्यातिप्रचुरविषयं वर्णितमिह
पुराणेषु व्याप्तं शिवचरितमत्यद्भुततमम् ॥११९॥

आचार्याग्रिमपूर्णचन्द्ररचिते नेपालवृत्तान्विते
साहित्याब्धिविलोडनेन रसिकानन्दप्रदे शाम्भवे ।
काव्येऽस्मिन् शिवशक्तिवर्णनपरे सर्गोऽद्रिनेत्राङ्कितः
पूर्णो नित्यमिमं प्रपठ्य रसिका आनन्दिताः स्युः शिवात् ॥१२०॥

॥ इति सप्तविंशः सर्गः ॥

॥ इतिश्रीदेवाधिदेवश्रीनीलकण्ठमहाकाव्यं सम्पूर्णम् ॥

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिशिष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकाव्यस्य मङ्गलात्मक प्रथमध्याय सप्तमश्लोकस्य अगस्त्य महर्षिविवरणम्

नारद उवाच

भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।
तपः सत्यं च सप्तैते देवलोकाः प्रकीर्तिताः ॥१॥
पर्यायेण तु सर्वेषामाधिपत्यं कथं भवेत् ।
इह लोके शुभ रूपमायुः सौभाग्यमेव च ।
लक्ष्मीश्च विपुला नाथ कथं स्यात् पुरसूदन ॥२॥

महेश्वर उवाच

पुरा हुताशनः सार्धं मारुतेन महीतले ।
आदिष्टः पुरुहूतेन विनाशाय सुरद्विषाम् ॥३॥
निर्दग्धेषु ततस्तेन दानवेषु सहस्रशः ।
तारकः कमलाक्षश्च कालदंष्ट्रः परावसुः ।
विरोचनश्च संग्रामादपलायंस्तपोधन ॥४॥
अम्भः सामुद्रमाविश्य संनिवेशमकुर्वत ।
अशक्या इति तेऽप्यग्निमारुताभ्यामुपेक्षिताः ॥५॥
ततः प्रभृति ते देवान् मनुष्यान् सभुजङ्गमान् ।
सम्पीड्य च मुनीन् सर्वान् प्रविशन्ति पुनर्जलम् ॥६॥
एवं वर्षसहस्राणि वीराः पञ्च च सप्त च ।
जलदुर्गवलाद् ब्रह्मन् पीडयन्ति जगत्त्रयम् ॥७॥
ततः परमथो वह्निमारुतावमराधिपः ।
आदिदेश चिरादम्बुनिधिरेष विशोष्यताम् ॥८॥
यस्मादस्मद्विषामेष शरणं वरुणालयः ।
तस्माद् भवद्भ्यामद्यैव क्षयमेष प्रणीयताम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ताबूचतुस्ततः शक्रमुभौ शम्बरसूदनम् ।
अधर्म एष देवेन्द्र सागरस्य विनाशनम् ॥ १०॥
यस्माज्जीवनिकायस्य महतः संक्षयो भवेत् ।
तस्मान्न पापमद्यावां करवावः पुरंदर ॥११॥
अस्य योजनमात्रेऽपि जीवकोटिशतानि च ।
निवसन्ति सुरश्रेष्ठ स कथं नाशमर्हीति ॥१२॥
एवमुक्तः सुरेन्द्रस्तु कोपात् संरक्तलोचनः ।
उवाचेद वचो रोषान्निर्दहन्निव पावकम् ॥१३॥
न धर्माधर्मसंयोग प्राप्नुवन्त्यमराः क्वचित् ।
भवतस्तु विशेषेण माहात्म्यं चाधितिष्ठति ॥१४॥
मदाज्ञालङ्घनं यस्मान्मारुतेन समं त्वया ॥
मुनिव्रतमहिंसादि परिगृह्य त्वया कृतम् ।
धर्मार्थशास्त्ररहितं शत्रुं प्रति विभावसो ॥१५॥
तस्मादेकेन वपुषा मुनिरूपेण मानुषे ।
मारुतेन समं लोके तव जन्म भविष्यति ॥१६॥
यदा च मानुषत्वेऽपि त्वयागस्त्येन शोषितः ।
भविष्यत्युदधिर्वह्ने तदा देवत्वमाप्स्यसि ॥१७॥
इतीन्द्रशापात् पतितौ तत्क्षणात् तौ महीतले ।
अवाप्तावेकदेहेन कुम्भाज्जन्म तपोधन ॥१८॥
मित्रावरुणयोर्वीर्याद् वसिष्ठस्यानुजोऽभवत् ।
अगस्त्य इत्युग्रतपाः सम्बभूव पुनर्मुनिः ॥१९॥

नारद उवाच

सम्भूतः स कथं भ्राता वसिष्ठस्याभवन्मुनिः ।
कथं च मित्रावरुणौ पितरावस्य तौ स्मृतौ ।
जन्म कुम्भादगस्त्यस्य कथं स्यात् पुरसूदन ॥२०॥

ईश्वर उवाच

पुरा पुराणपुरुषः कदाचिद् गन्धमादने ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूत्वा धर्मसुतो विष्णुश्चचार विपुल तपः ॥२१॥
तपसा तस्य भीतेन विघ्नार्थं प्रेषितावुभौ ।
शक्रेण माधवानङ्गावप्सरोगणसंयुतौ ॥२२॥
तदा तद्गीतवाद्येन नाङ्गरागादिना हरिः ।
न काममाधवाभ्यां च विषयान् प्रति चुक्षुभे ॥२३॥
तदा काममधुस्त्रीणां विषादमगमद् गणः ।
संक्षोभाय ततस्तेषां स्वोरुदेशान्नराग्रजः ।
नारीमुत्पादयामास त्रैलोक्यजनमोहिनीम् ॥२४॥
संक्षुब्धास्तु तया देवास्तौ तु देवावरावुभौ ।
अप्सरोभिः समक्षं हि देवानामब्रवीद्धरिः ॥ २५॥
अप्सरा इति सामान्या देवानाब्रवीद्धरिः ।
उर्वशीति च नान्मेयं लोके ख्यातिं गमिष्यति ॥ २६॥
ततः कामयमानेन मित्रेणाहूय सोर्वशी ।
उक्ता मां रमयस्वेति बाढमित्यब्रवीत् तु सा ॥२७॥
गच्छन्ती चाम्बरं तद्वत् स्तोकमिन्दीवरेक्षणा ।
वरुणेन धृता पश्चाद् वरुणं नाभ्यनन्दत ॥ २८॥
मित्रेणाहं वृता पूर्वमद्य भार्या न ते विभो ।
उवाच वरुणश्चित्तं मयि संन्यस्य गम्यताम् ॥२९॥
गतायां बाढमित्युक्त्वा मित्रः शापमदात्तदा ।
तस्यै मानुषलोके त्वं गच्छ सोमसुतात्मजम् ॥३०॥
भजस्वेति यतो वेश्याधर्म एष त्वया कृतः ।
जलकुम्भे ततो वीर्यं मित्रेण वरुणेन च ।
प्रक्षिप्तमथ संजातौ द्वावेव मुनिसत्तमौ ॥३१॥
निमिर्नाम सह स्त्रीभिः पुरा दयूतमदीव्यत ।
तत्रान्तरेऽभ्याजगाम वसिष्ठो ब्रह्मसम्भवः ॥ ३२॥
तस्य पूजामकुर्वन्तं शशाप स मुनिर्नृपम् ।
विदेहस्त्वं भवस्वेति ततस्तेनाप्यसौ मुनिः ॥३३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्योन्यशापाच्च तयोर्विगते इव चेतसी ।
जग्मतुः शापनाशाय ब्रह्माणं जगतः पतिम् ॥ ३४॥
अथ ब्रह्मण आदेशाल्लोचनेष्ववसन्निभिः ।
निमेषाः स्युश्च लोकानां तद्विश्रामाय नारद ॥३५॥
वसिष्ठोऽप्यभवत् तस्मिन् जलकुम्भे च पूर्ववत् ।
ततः श्वेतश्चतुर्बाहुः साक्षसूत्रकमण्डलुः ।
अगस्त्य इति शान्तात्मा बभूव ऋषिसत्तमः ॥३६॥
मलयस्यैकदेशे तु वैखानसविधानतः ।
सभार्यः संवृतो विप्रैस्तपश्चक्रे सुदुश्चरम् ॥३७॥
ततः कालेन महता तारकादतिपीडितम् ।
जगद् वीक्ष्य स कोपेन पीतवान् वरुणालयम् ॥३८॥
ततोऽस्य वरदाः सर्वे बभूवुः शङ्करादयः ।
ब्रह्मा विष्णुश्च भगवान् वरदानाय जग्मतुः ।
वर वृणीष्व भद्रं ते यदभीष्टं च वै मुने ॥३९॥

अगस्त्य उवाच

यावद् ब्रह्मसहस्त्राणां पञ्चविंशतिकोटयः ।
वैमानिको भविष्यामि दक्षिणाचलवर्त्मनि ॥४०॥
मद्विमानोदये कुर्याद् यः कश्चित् पूजनं मम ।
स सप्तलोकाधिपतिः पर्यायेण भविष्यति ॥४१॥

ईश्वर उवाच

एवमस्त्विति तेऽप्युक्त्वा जग्मुर्देवा यथागतम् ।
तस्मादर्धः प्रदातव्यो ह्यगस्त्यस्य सदा बुधैः ॥४२॥

नारद उवाच

कथमर्धप्रदानं तु कर्तव्यं तस्य वै विभो ।
विधानं यदगस्त्यस्य पूजने तद् वदस्व मे ॥४३॥

ईश्वर उवाच

प्रत्यूषसमये विद्वान् कुर्यादस्योदये निशि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नानं शुक्लतिलैस्तद्वच्छुक्लमाल्याम्बरो गृही ॥४४॥
स्थापयेदव्रणं कुम्भं माल्यवस्त्रविभूषितम् ।
पञ्चस्तनसमायुक्तं घृतपात्रसमन्वितम् ॥ ४५॥
अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमेवायतबाहुदण्डम् ॥
चतुर्मुखं कुम्भमुखे निधाय धान्यानि सप्ताम्बरसंयुतानि ॥४६॥
सकांस्यपात्राक्षतशुक्तियुक्तं मन्त्रेण दद्याद् द्विजपुङ्गवाय
उत्क्षिप्य लम्बोदरदीर्घबाहुमनन्यचेता यमदिङ्मुखः सन् ॥४७॥
श्वेतां च दद्याद् यदि शक्तिरस्ति रौप्यैः खुरैर्हेममुखीं सवत्साम् ।
धेनुं नरः क्षीरवतीं प्रणम्य स्रग्वस्त्रघण्टाभरणां द्विजाय ॥४८॥
आसप्तरात्रोदयमेतदस्य दातव्यमेतत् सकलं नरेण ।
यावत्समाः सप्त दशाथ वा स्युरथोर्ध्वमप्यत्र वदन्ति केचित् ॥४९॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भवः ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ।
प्रत्यब्दं तु फलत्यागमेव कुर्वन्न सीदति ॥५०॥
होमं कृत्वा ततः पश्चाद् वर्जयेन्मानवः फलम् ।
अनेन विधिना यस्तु पुमानर्घ्यं निवेदयेत् ॥५१।
इम लोकं स चाप्नोति रूपारोग्यसमन्वितः ।
द्वितीयेन भुवर्लोकं स्वर्लोकं च ततः परम् ॥५२॥
सप्तैव लोकानाप्नोति सप्तार्घ्यान् यः प्रयच्छति ।
यावदायुश्च यः कुर्यात् परं ब्रह्माधिगच्छति ॥५३॥
इह पठति शृणोति वा य एतद् युगलमुनिप्रभावार्घ्यसम्प्रदानम् ।
मतिमपि च ददाति सोऽपि विष्णोर्भवनगतः परिपूज्यतेऽमरौघैः ॥५४॥

मत्स्य उवाच

अतः परमगस्त्यस्य वक्ष्ये वंशोद्भवान् द्विजान् ।
अगस्त्यश्चः करम्भश्चः कौसल्याः शकटास्तथा ॥१॥
सुमेधसो मयोभुवस्तथा गान्धारकायणाः ।
पौलस्त्याः पौलहाश्चैव क्रतुवंशभवास्तथा ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्र्यार्षेयाभिमताश्चैषां सर्वेषां प्रवराः शुभाः ।
अगस्त्यश्च महेन्द्रश्च ऋषिश्चैव मयोभुवः ॥३॥
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ।
पौर्णमासाः पारणाश्च त्र्यार्षेयाः परिकीर्तिताः ॥४॥
अगस्त्यः पौर्णमासश्च पारणश्च महातपाः।
परस्परमवैवाह्याः पौर्णमासास्तु पारणैः ॥५॥
एवमुक्तो ऋषीणां तु वंश उत्तमपौरुषः ।
अतः परं प्रवक्ष्यामि किं भवानद्य कथ्यताम् ॥६॥

मनुरुवाच

पुलहस्य पुलस्त्यस्य क्रतोश्चैव महात्मनः ।
अगस्त्यस्य तथा चैव कथं वंशस्तदुच्यताम् ॥७॥

मत्स्य उवाच

क्रतुः खल्वनपत्योऽभूद् राजन् वैवस्वतेऽन्तरे ।
इध्मवाहं स पुत्रत्वे जग्राह ऋषिसत्तमः ॥८॥
अगस्त्यपुत्रं धर्मज्ञमागस्त्याः क्रतवस्ततः ।
पुलहस्य तथा पुत्रास्त्रयश्च पृथिवीपते ॥९॥
तेषां तु जन्म वक्ष्यामि उत्तरत्र यथाविधि ।
पुलहस्तु प्रजां दृष्ट्वा नातिप्रीतमनाः स्वकाम् ॥१०॥
अगस्त्यजं दृढास्यं तु पुत्रत्वे वृतवांस्ततः ।
पौलहाश्च तथा राजन्नागस्त्याः परिकीर्तिताः ॥११॥
पुलस्त्यान्वयसम्भूतान् दृष्ट्वा रक्षःसमुद्भवान् ।
अगस्त्यस्य सुतं श्रीमान् पुत्रत्वे वृतवांस्ततः ॥१२॥
पौलस्त्याश्च तथा राजन्नागस्त्याः परिकीर्तिताः ।
सगोत्रत्वादिमे सर्वे परस्परमनन्वयाः ॥१३॥
एते तवोक्ताः प्रवरा द्विजानां महानुभावा नृप वंशकाराः।
एषां तु नाम्नां परिकीर्तितेन पापं समग्रं पुरुषो जहाति ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Multifarious Fields of Research in Sanskrit Heritage[1]

Aacharya Purnachandra Dhungel
Vice-Chancellor
Mahendra Sanskrit University

Mr. Chairman
Honorable Delegates' from Across the World
Ladies & Gentlemen
Participating in Asia-Pacific Conference on Higher Education Research

It was a great pleasure for me to be cited to the Asia Pacific Conference Higher Education Research

Permit me to give you the introduction of Mahendra Sanskrit University. It was established in 1987 with the specific objectives of preserving, promoting and exploiting the rich heritage of the Sanskrit language. With its central office in Dang district the university has fourteen campuses under it in various parts of Nepal. Some of the courses unique to our institution are Yoga, Ayurveda, Astrology, Ancient astronomy, Sanskrit linguistics, Literature, Mythology and Tantric studies, Vedanta Shankhya, Nyaya, Meemansa (Sanskrit Philosophies) and also Buddhist and Vedic studies. Modern disciplines, designed so as to enable the students to keep pace with time, include Math, Economics, Political science. Nepali literature. English Literature, Rural development, Journalism.

1 *This speech was delivered by the Vice- Chancellor at the Asia Pacific Conference an Higher Education Research hold from 18-21 Aug. 2004 in Manila. Philippines.*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

M.S.U. performs its academic research programs through its Research Center located in Basantapur Kathmandu. While we have felt it dire to share research outputs, hold collaborative researches and exchange views with various concerned academies of the world, Asia-Pacific Conference on Higher Education has surely made an admirable venture.

It is our belief that the old and venerable studies of Sanskrit does have much to come to the modern world of education. It is after all, a treasury of knowledge laboriously and often joyfully compiled over a period of roughly five thousand years. For example, yoga techniques can help our harried students concentrate and keep fit. And our ancient philosophies are a good corrective to the vapid influence of today's maddening materialism. Sanskrit heritage is certainly far ahead in some aspects of knowledge viz philosophy yoga ayurveda etc. The age of science must go through another five thousand years of stoic penance to obtain the treasures of Sanskrit. Likewise, Asian students really do need to learn of their own intellectual history, not just of that of the West. More in line with modern techniques we find that Sanskrit linguistics has a logical, even almost mechanical structure that fits well in computer science.

Everyday we are learning more and more of how the ancient understanding of the natural world has much to contribute to solving modern problems. Environmental studies and pharmacology are two areas that come readily to mind. What is more, nothing in the whole world surpasses Sanskrit so far as Peace, brotherhood and humanity are concerned. It is certainly too late for the world to benifit

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

from it. Ah, how fore sighted-our forefathers were when they recited Vedic mantras **"Om asatoma sad gamaya, tamasoma jyotirgamaya marittyorma amritamgamaya** = Oh Almighty lead us from Evil to Good, from Darkness to Daylight from Destruction to Construction from Death to Immortality." The respect that our forefathers had for all living things, as reflected in their writings, would most certainly be of great use today.

Finally, Sanskrit heritage treasures multifarious fields of research. There is a great need for applying modern methodology of research and technology to it. Hindu marriage system for example has amazing genetic base. none can deny the fact; yet it cannot be evidenced without Genetics.

Thank you

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Speed-Post

प्रो. राममूर्ति शर्मा
डी. लिट्., एफ.आर.ए.एस.
राष्ट्रपति सम्मानित
कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय,
वाराणसी - २२१००२

दूरलेख : श्रुतम्
दूरभाष (०५४२) २०४०८९ कार्यालय
(०५४२) २०४२१३ निवास
(०५४२) २०६६१७
फैक्स (०५४२) २०६८१६

पत्र-संख्या वी०सी०/375/01/2001
दिनाङ्क 3/4/2001

आदरणीय श्री उपाध्याय जी,

मुझे यह निवेदन करने में परम हर्ष है, कि सम्पूर्णानन्द संस्कृत विश्वविद्यालय नें ०१/०४/२००१ एवं ०२/०४/२००१ को सम्पन्न हुई विद्यापरिषद एवं कार्यपरिषद् की बैठक में, सर्वालना आपको विद्यावाचस्पति की मानद उपाधि से सम्मानित करने का निश्चय किया है। यह निश्चय आपके द्वारा की गयी संस्कृत की सांस्कृतिक, साहित्यिक एवं वैज्ञानिक देन को दृष्टि में रख कर किया गया है। हमें पूर्ण आशा है, कि आप हमारें इस सांकेतिक सम्मान को स्वीकार कर समस्त विश्वविद्यालय परिवार को कृतार्थ करेगें। तदनुसार प्रार्थना है, कि आप २०/०४/२००१ को प्रातः १० बजे काशी पधार कर दीक्षान्त समारोह में उक्त मानद उपाधि को ग्रहण कर, हमें अनुगृहीत करें तथा विश्वविद्यालय की श्रीवृद्धि करने की अनुकम्पा करें।

ससम्मान—सधन्यवाद,

भवदीय,

राममूर्ति शर्मा
(राममूर्ति शर्मा)

आदरणीय—
डा० पूर्णचन्द्र उपाध्याय जी
उपकुलपति,
महेन्द्र संस्कृत विश्वविद्यालय
दाङ, काठमाण्डू,
नेपाल ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्तर प्रदेश सरकार

शिक्षा विभाग

वर्ष १९८२ का यह राज्य पुरस्कार

श्री पूर्णचन्द्र उपाध्याय (प्रधानाचार्य)

श्री गोरखनाथ संस्कृत विद्यापीठ, गोरखपुर

को अध्यापन के क्षेत्र में प्रशंसनीय लोक सेवा के लिए सम्मानार्थ प्रदान किया जाता है।

शिक्षा निदेशक
उत्तर प्रदेश

शिक्षा मंत्री
उत्तर प्रदेश

लखनऊ अप्रैल 13, 1987

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी

वाचस्पतिः
[डी. लिट्.]

卐

अनेन विश्वविद्यालयेन २०५८ तमे वैक्रमे संवत्सरे षड्विंशदीक्षान्तमहोत्सवे

श्रीपूर्णचन्द्र-उपाध्यायः

भारतीयविद्यासु लोकोत्तरं वैदुष्यं संस्कृत-संस्कृतिसंवर्द्धने
अनितरसाधारणं योगदानञ्च अभिलक्ष्य

'वाचस्पतिः'

[डी. लिट्.]

इति सम्मानोपाधिना समलङ्कृत इति प्रमाणयति।

राममूर्ति शर्मा
राममूर्तिशर्मा
कुलपतिः

विष्णुकान्तशास्त्री
कुलाधिपतिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी

षड्विंशदीक्षान्तमहोत्सवः

पण्डितश्रीपूर्णचन्द्र-उपाध्यायमहोदयेभ्यः

"वाचस्पतिः"

[डी.लिट्.]

इति सम्मानोपाधिसमर्पणम्

२० अप्रैल, २००१, भृगुवासरः

प्रशस्ति-पाठः

प्रो. राममूर्तिशर्मा

कुलपतिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रशस्तिपाठः

श्रीमन्माननीयाः कुलाधिपतयः,

जम्बूद्वीपमहासरसः कमलायमानस्यास्य भारतमहादेशस्य किञ्जल्कमानायामस्यां वाराणस्यां पुर्याम्, त्रिभुवनगुरोर्देवाधिदेवस्य भगवतः सशक्तिकस्य रिङ्गतुङ्गतरङ्ग-रङ्ग-भङ्ग-व्यासङ्ग-सङ्ग-गङ्गाङ्गनाऽपाङ्ग मङ्गलस्य विश्वनाथस्य कृपापीयूषयूषसंस्नापितेऽमुष्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपवित्रपरिसरेऽद्य पवित्रतमानेहसि पदवाक्यप्रमाण-पारावारावारपारीणधुरीणप्रवीणं संस्कृतपरिष्कृतोपस्कृतजीवनं पण्डितेन्द्रम् आचार्य-**श्रीपूर्णचन्द्रोपाध्यायं** 'वाचस्पतिः' (डी.लिट्.) इति सम्मानोपाधिना सभाजयितुं प्रबल-प्रशस्त-पुरु-पुण्य-प्राप्तमवसरविशेषमधिगत्य पारेगिरां प्रीतिमनुबोभवीतीयं सारस्वती भूमिः।

अयं किल पूर्णचन्द्रोपाध्यायोऽनल्पपुण्यप्रकर्षोदयाद् वैदुष्यभूयिष्ठे सत्कुले मातापित्रोस्सुकृतबलतो जनुर्लब्ध्वा, बाल्य एव तत्तत्संस्काराविष्कृतशेमुषीधनः, शुश्रूषाजिघृक्षादिगुणगणगरिष्ठः चिरकालं यावत् तत्तद्गुरुचरणानां सन्निधाविव सन्निधौ समध्युष्य नव्यन्यायं नव्यव्याकरणं साङ्ख्ययोगौ वेदान्तं पुराणेतिहासौ साहित्यं ज्यौतिषञ्च समधीत्य, सर्वत्र शास्त्रेषु आचार्यचारुपदवी प्राप्तवान्, ततश्चायं न्याय इव द्रव्यगुण-कर्मपटिष्ठो लक्षणान्वितश्च, व्याकरणविधिरिव सन्धिविग्रहसमन्वितः प्रथममध्यमोत्तम-पुरुषप्रत्ययकारकश्च साङ्ख्ययोगीव प्रकृत्यनुरूपो विभूतिमयश्च वेदान्त इव न्यक्कृत-मिथ्याप्रपञ्चो व्यावहारिकसत्तान्वितश्च पुराणेतिहास इव प्रशस्तचरित्रमय आनुवंशिक-गौरवमयश्च साहित्यविधिरिव सहृदयो महनीयदृश्यश्रव्यचरितश्च, ज्यौतिषविषय इव सकलग्रहानुकूलो दैवानुगतश्चेति सर्वशास्त्रमय एष विद्वद्वरेण्योऽधिमहि विराराजीति।

इदन्तु इतोऽपि सौभाग्यास्पदं पदं यदेष सर्वलोकातिशायिमहाप्रतिभाप्रभा-प्रभाववलयितो न केवलं पारम्परीपरीतहृदयसमेधमानधिषणासम्प्राप्तसकलविद्याविला-सोऽपि तु नवीनपरिपाटीपाटीरपटुतामादधानः शोधार्थिनां निर्देदिश्यमार्गाणां छात्राणां शोधकर्मसु क्रियासमभिहारेण शोधं मार्ग विधाय प्राच्यप्रतीच्योभयसरणीषु निर्भयं विचरन् विद्वज्जनान् सुखयति। अस्मिन् क्रमे च परश्शता अनुसन्धायका एभिरुपस्कृता उपकृताश्च ते विद्यार्थिनो विद्याविनयोपपन्नाः सम्पन्नाः सन्तः सन्तः 'विद्यावारिधि' समुत्तीर्य सम्प्रति सम्प्रतिभासन्त इत्यहो एतदीयो महिमहिमालयः।

आ च त्रिसप्तत्युत्तरैकोनविशखीष्टाब्दात् षट्सप्त्युत्तरैकैकोनविंशं खीष्टाब्दं यावत् प्राचार्यत्वेन श्रीभगवान्दाससंस्कृतविद्यापीठं विभूष्य, ततः पञ्चनवत्युत्तरैकैको नविशं खीष्टाब्द यावद् अनन्यया वैदुष्या गोरखपुरस्थ श्रीगोरक्षनाथसंस्कृतविद्यापीठमपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राचार्यत्वेन भवन्तोऽबोभूष्यन्त इति संस्थानयोरनयोरनितरसाधारणं वैशिष्ट्यं जगत्सु विदितमेव ।

'गुणाः पूजास्थानम्' इतिप्रामाणिकाभापाकभणितिपारतन्त्री-तन्त्री-गुण-गणक्वणन-झङ्कारझङ्कृतेन उत्तरप्रदेशशासनेन पञ्चाशीत्यधिकैकोनविंशे ख्रीष्टाब्दे तत्रभवद्भ्यो **'विशेषसम्मानः'** उपहृतः। न केवलमियदेव, देवकृपया च पुनस्तरां 'विश्वहिन्दू- एकतापरिषदा' **'विद्वच्चक्रचूडामणिः'** इत्युपाधिना तत्रभवन्तं विभूष्य आत्मगौरवमर्जितम् ।

'न रत्नमन्विष्यति मृग्यते हि तत्' इति महाकविकालिदासोक्तीरनुसृत्य पञ्चश्रीमहाराजाधिराजनेपालाधिराजशासनेच्छया एकाधिकद्विसहस्रतमख्रैष्टाब्दस्य जनवरीमासस्य प्रथमदिनाङ्के तत्रभवन्तो महेन्द्रसंस्कृतविश्वविद्यालयस्य कुलपतिपदं विभूषितवन्तः सन्तो राजन्तेतमामिति ।

अतोऽत्रभवतामदृष्यं वैदुष्यम्, अनुकरणीयं रमणीयमाचरणम्, संस्कृत-प्रणयिस्वभावञ्च दर्शं दर्शमिदमेव वक्तुं शक्यम्–

कलाकलापप्रचितश्रिया जगत्प्रकाशकत्वेन च चारुमूर्तिना ।
मलीमसध्वान्तनिवारणात्पुनः स पूर्णचन्द्रो द्विजराजवैभवः॥

एषां चतुरस्रं पाण्डित्यं विद्याविनयसम्पत्ति भारतीयपारम्परीपरीतमनोभावं निरन्तरस्वाध्यायधनधन्यजीवनं चाभिलक्ष्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्तत्रभवद्भ्यो 'वाचस्पतिः' (डी.लिट्.) इति सम्मानोपाधि समर्प्य आत्मानं धन्यं मनुते ।

आर्यमिश्राः,

अहं तत्रभवद्भ्यः **श्रीपूर्णचन्द्रोपाध्यायमहोदयेभ्यः** अस्य विश्वविद्यालयस्त्र '**वाचस्पतिः**' (डी.लिट्.) इति सम्मानोपाधि प्रदातुमभ्यर्थये ।

प्रस्तुतम् । तस्याविकलं स्वरूपमधो निर्दिश्यते ।

ॐ नमो वाचे संस्कृतायै तेजस्वि न

श्रीमन्नेपालस्थमहेन्द्रसंस्कृतविश्वविद्यालयोपकुलपतिपदभाजामासेतुहिमाचलाखिलप्रान्तोद्भासितकी नामसङ्ख्यच्छात्रमानससरोवरराजहंसायमानानां संस्कृतसंस्कृत्युद्धरणैकव्यवसायानां समाजोन्नयनानां परमोदारचरितानां प्राचीमार्षी पद्धतिमनुसरतां विविधविद्याविलासिनीविलासायासविश्रुतानिवहानां विविधमानपदवीविभूषितानां विद्वच्चक्रचूडामणीनामिदानीमेव श्रीमत्सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेनापि महितविद्यावाचस्पति (डी.लिट्.) इत्युपाधिना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समादृतानां श्रीमत् पूर्णचन्द्रोपाध्यायढुङ्गेल-
महाभागानां करकमलयोः समुपह्रियमाणः

सम्मानाभिनन्दन-पद्य-प्रसूनाञ्जलिः

काचित् सन्नगरी नगागतनदीगङ्गाप्रवाहाञ्चिता
विद्याबुद्धिविवेकिभिर्बुधजनैः संशोभिता भीतिहृत् ।
भव्या भाग्यवतां निवासधरणी धन्या धरित्र्युत्तमा
भातीयं शुभभोगमोक्षफलदा लोकोत्तरा शाम्भवी ॥
नेपालान्निजधर्मधारणपराद्राष्ट्राच्छुभाद्धैन्दवात्
प्राप्तायातिथये प्रियाय सुहृदे मान्याय धन्याय ते ।
नानाशास्त्रविचक्षणाय जगतां मित्राय चित्राय वै
बूमः स्वागतमत्र प्रीतिसहितं हार्द प्रसन्ना वयम् ॥
कीर्तिर्यस्य दिगन्तगा मतिमतां मान्या च बुद्धिः परा
प्राची पुण्यतमा विचारसरणिर्विद्यानवद्या वरा ।
उद्योगोऽखिललोककष्टदहने यत्नः सतां रक्षणे
सोऽयं भाति लघुर्गुरौ गुरुवरः श्रीपूर्णचन्द्रः सुधीः ॥
रक्ताऽभूत् त्वयि सा मनोरमतमा गोरक्षिकाख्या पुरी
मायाख्यापि च सा धरा मृदुतरा भुक्ता त्वया पार्वती ।
वर्मासामभुटानभारतधरा नेपालदेश श्च नः
त्वत्कार्यैर्विमलैः सुसंस्कृततरैर्धन्यायमाना भृशम् ॥
सर्वे वैदिकधार्मिकास्त्वयि समे विश्वासमाबिभ्रति
हिन्दूनामथ सत्यसद्गुणवतां सन्मानवानामपि ।
नेता धर्मगुरुश्च देशिकवरः प्राध्यापकः पावको
मान्यो धन्यतमो वदान्यद्यरितः कः स्यात् त्वदन्यो जनः ॥
चन्द्रे पूर्णतमे महेन्द्रसुरवाक् श्रीविश्वविद्यालये
नेपाले ह्युदयं प्रयाति निखिलं भूयान्निरस्तं तमः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चमुखी महादेव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मा एवं विष्णुद्वारा शिवस्तवन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महालिङ्गोद्भव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यावाचस्पति-उपाधिद्वारा विभूषित आचार्यपूर्णचन्द्रढुंगेलः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीअवेद्यनाथमहोदयेन साकं आचार्यपूर्णचन्द्रढुङ्गेलः

आचार्यपूर्णचन्द्रढुंगेलः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सपरिवार आचार्यपूर्णचन्द्रढुंगेलः





Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सपरिवार आचार्यपूर्णचन्द्रढुंगेलः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाकविपरिचयः

नाम : आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलः (पदवाक्यप्रमाणपारावारीणः) ।

जन्मतिथिः : वैक्रमाब्दः १९८७।१०।२४ (खैष्टाब्दः १५।१०।१९३२) ।

जन्मस्थानम् : वर्मादेशस्थः (सम्प्रतिम्यानमारदेशस्थः) मखान्ती ग्रामः ।

पिता : नैकविधशास्त्रमर्मज्ञो विद्वत्प्रवरोऽग्निप्रसादोपाध्यायोढुङ्गेलः ।

माता : विदुषीश्रीमतीनर्मदेश्वरीदेवीप्रवरोपाध्यायानी ।

धर्मपत्न्यौ : मनोरमोपाध्यायानी, पार्वतीउपाध्यायानी ।

सन्ततयः : रीतिकेश्वरी, नीतिकेश्वरी, प्रकाशचन्द्रः, आदित्यचन्द्रश्च ।

शिक्षा : नव्यव्याकरण-नव्यन्याय-शाङ्करवेदान्त-साङ्ख्ययोग-पुराणेतिहास-ज्यौतिष-साहित्यशास्त्रेषु आचार्यः (कुत्रचित् प्रथमश्रेण्यां प्रथमत्वेन स्वर्णपदकप्राप्तिश्च) ।

अनुभवः : भारते नेपाले च चतुर्षु स्नातकोत्तरमहाविद्यालयेषु प्राचार्यः, भारतदेशस्य उत्तरप्रदेशे संस्कृतसंरक्षणसमितौ तथा ब्राह्मणमहासभायाञ्चाध्यक्षः । महेन्द्रसंस्कृतविश्वविद्यालयस्यउपकुलपतिः (वि.सं.२०५७ पौष ७-२०६१ पौष ६) ।

सम्मानपुरस्कारौ : अनेकानि स्वर्णपदकानि ।
मानार्थविद्यावाचस्पतिः (सम्पूर्णानन्दसंस्कृतविविद्यालयः) ।
विद्वच्चक्रचूडामणिः (विश्वहिन्दुपरिषद) ।

प्रकाशकः
सनातन प्रेस
वानेश्वर, काठमाडौं
presssanatan@gmail.com

मुख्य वितरकः
दुर्गा पुस्तक भण्डार
बागबजार, काठमाडौं

मूल्यम् : व्यक्तिगतम् रु. ५००।-
संस्थागतम् रु. ८००।-

Jayatu Sanskritam, Kathmandu, Nepal